# व्याकरणम् 2

**COURSE CODE: B21SN05DC**

Discipline Core Course

Undergraduate Programme

Sanskrit Language and Literature




SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# व्याकरणम् 2

Course Code: B21SN05DC

Semester - V

## Discipline Core Course
## Sanskrit Language and Literature
## Self Learning Material
**(With Model Question Paper Sets)**

SGOU

SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# व्याकरणम् 2

Course Code: B21SN05DC
Semester- V
Discipline Core Course
BA Sanskrit and Literature

SREENARAYANAGURU
OPEN UNIVERSITY


**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K.V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.

**Development of the Content**

Dr. Jothi Lekshmi M.
Dr. G. Sahadevan

**Review and Edit**

Dr. G. Sahadevan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Dr. Jothilekshmi M.
Dr. Vijayarajan K.U.
Dr. Sreeja J.
Chitra Bhaskar

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition:**
January 2025



**Copyright:**
© Sreenarayanaguru Open University



ISBN 978-81-982096-8-9

9 788198 209689



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.


www.sgou.ac.m

YouTube

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed “blended format,” a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university’s student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 17-07-2024

# CONTENT

Block-1 लघुसिद्धान्तकौमुद्यां अजन्तपुंलिङ्गप्रकरणम् 1
Unit -1 मुनित्रयम् - लघुसिद्धान्तकौमुद्याः प्राधान्यम् 2
Unit - 2 लघुसिद्धान्तकौमुद्याः अजन्त पुल्लिङ्गप्रकरणे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रात् आरम्भ्य 'न विभक्तौ तुस्माः' इति सूत्रपर्यन्तम् 13
Unit - 3 'एकवचनं सम्बुद्धिः' इति सूत्रादारभ्य 'वाऽवसाने' इति सूत्रपर्यन्तम् 23
Unit - 4 'ओसि च' इति सूत्रादारभ्य 'आदेशप्रत्यययोः' इति सूत्रपर्यन्तम् 35
Block-2 लघुसिद्धान्तकौमुद्याः अजन्तस्त्रीलिङ्गप्रकरणे रमाशब्दस्य निष्पत्तिः अजन्तनपुंसकलिङ्गप्रकरणे ज्ञानशब्दस्य निष्पत्तिश्च 41
Unit - 1 अजन्तस्त्रीलिङ्गशब्दस्य प्राधान्यम् 42
Unit - 2 'औङ आपः' इति सूत्रादारभ्य 'याडापः' सूत्रपर्यन्तम् 48
Unit - 3 अजन्तनपुंसकलिङ्गस्य प्राधान्यम् 57
Unit - 4 'अतोऽम्' सूत्रात् आरभ्य 'मिदचोऽन्त्यात्परः' इति सूत्रपर्यन्तम् 62
Block-3 लघुसिद्धान्तकौमुद्याः भ्वादिप्रकरणे लकाराणां प्रसक्तिः, भूधातोः लटिरूपनिष्पत्तिश्च 74
Unit - 1 दशलकाराः तेषां कालवाचित्वे साङ्गत्यं 75
Unit - 2 लकाराणां प्रकारवाचित्वे साङ्गत्यम् 83
Unit - 3 आत्मनेपदं परस्मैपदञ्च 88
Unit - 4 भूधातोः लटि रूपनिष्पत्तिः 'वर्तमाने लट्' इति सूत्रात् आरम्भ्य 'अतो दीर्घो यञि' इति सूत्रपर्यन्तम् 94
Block-4 लघुसिद्धान्तकौमुद्याः भ्वादिप्रकरणे भूधातोः लिट् - लृट्-लोट्लकारेषु रूपनिष्पत्तिः 107
Unit - 1 'परोक्षे लिट्' इत्यारभ्य 'आर्धधातुकस्येड्वलादेः' इति सूत्रपर्यन्तम् 108
Unit - 2 भूधातोः लृटि रूपनिष्पत्तिः 119
Unit - 3 भूधातोः लोटि रूपनिष्पत्तिः 127
Block-5 लघुसिद्धान्तकौमुद्याः भ्वादिप्रकरणे भूधातोः लङ् लकरे रूपनिष्पत्तिः 137
Unit - 1 भूधातोः लङिरूपनिष्पत्तिः 138
Block-6 लघुसिद्धान्तकौमुद्यां आत्मनेपद - परस्मैपदप्रक्रियाः 144
Unit - 1 आत्मनेपद - परस्मैपदप्रक्रिययोः प्राधान्यम् 145
Unit - 2 आत्मनेपदप्रक्रियायां 'कर्तरि कर्मव्यतिहारे' इति सूत्रादारभ्य 'उदश्चर सकर्मकात्' इति सूत्रपर्यन्तम् 150
Unit - 3 आत्मनेपदप्रक्रियायां शिष्टानि सूत्राणि 158
Unit - 4 परस्मैपदप्रक्रियायां सर्वाणि सूत्राणि 165
Model Question Paper (SET – A) 170
Model Question Paper (SET – B) 173

SGOU

BLOCK-1

# लघुसिद्धान्तकौमुद्यां अजन्तपुंलिङ्गप्रकरणम्

SGOU

# Unit -1

## मुनित्रयम् - लघुसिद्धान्तकौमुद्याः प्राधान्यम्

### उद्देश्यानि (Learning Outcomes)

- व्याकरणशास्त्रकारान् परिचाययति।
- लघुसिद्धान्तकौमुद्याः वैशिष्ट्यं जानाति।
- मुनित्रयमधिकृत्य अवगच्छति।

### प्राग्व्यपेक्षाः (Prerequisites)

परस्पर-मानवविचाराणाम् अभिव्यक्तिं शुद्धां, परिष्कृतां, परिमार्जितां च कर्तुं भाषाविशेषस्य व्याकरणस्य पठनम् आवश्यकम्। षट्सु वेदाङ्गेषु प्रधानं व्याकरणं, न केवलं वेदमन्त्रेषु विद्यमानानां अर्थावबोधनं करोति; परं तु तेषां रक्षणमपि करोति । संस्कृतभाषायाः व्याकरणस्य च अध्ययनाध्यापनस्य परम्परा अतिप्राचीना वर्तते। व्याकरणशिक्षायाः ज्ञानं विना छात्राः शुद्धरूपेण भाषाज्ञानं न प्राप्तुं शक्नुवन्ति । व्याकरणेन भाषाव्यवस्थिता क्रियते। भाषा व्यवस्थितकरणाय व्याकरणस्य विश्लेषणम् आवश्यकं भवति। डॉ० स्वीटमहोदयेन "व्याकरणं भाषायाः विश्लेषणम्" इति उक्तम्। तदनुसारं व्याकरणेन एव भाषारचनाज्ञानं भवति । व्याकरणशिक्षणाभावे रचनायाः अनुवादस्य च शिक्षा अपूर्णा। शब्दरचनायाः वाक्यरचनायाश्च आधारः व्याकरणमेव अस्ति। उद्यानवनस्य मनुष्यपशुपक्ष्यादिभ्यः कण्टकाकीर्णं तन्त्रीकवचं यथा रक्षकं भवति तथा भाषायाः रक्षकमस्ति व्याकरणम्। भाषायाः साधुत्वासाधुत्वज्ञानम् अनेन ज्ञायते।

"व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृति-प्रत्यय-विभागद्वारा निष्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्" इति व्याकरणस्य निर्वचनम्। ये व्याकरणशास्त्रज्ञानं ज्ञातुमिच्छन्ति ते प्रथमं त्रिमुनिं लघुसिद्धान्तकौमुदीं च

ज्ञातव्यम्। अतः अस्मिन् एकके तान् विषयान् अधिकृत्य प्रतिपादितोऽस्ति।

## मुख्यपदानि (Keywords)

पाणिनिः, पतञ्जलिः, कात्यायनः, वरदराजः, अष्टाध्यायी, वार्तिकं, महाभाष्यम्, लघुसिद्धान्तकौमुदी,

## Discussion

### 1.1.1 मुनित्रयं

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।**

**पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम्। इति।**

मुनित्रयमित्यत्र आचार्यः पाणिनिः प्रथमतः अष्टाध्यायीरूपेण सूत्राणि लिखितवान्। तत्र उक्तानुक्तद्विरुक्तानां चिन्तनार्थं महर्षिः कात्यायनः वार्तिकानि रचितवान्। पुनः सूत्रार्थस्य सम्यगवबोधाय महर्षिः पतञ्जलिः महाभाष्यं रचचामास। अतः एषां व्याकारणाचार्यान् मुनित्रयं इत्युच्यते। मुनित्रयेषु प्रथमं पाणिनिं पठामः।

### 1.1.1.2 पाणिनिः

पाणिनिः हि भगवान् व्याकरणशास्त्रस्य केन्द्रबिन्दुः मतः। तत्पूर्वमपि अनेके वैयाकरणाचार्यः आसन्। गार्ग्यः, भारद्वाजः, आपिशालिः, भागुरिः, शाकटायनः, स्फोटायनः शाकल्यः, चाक्रवर्मणादयः पाणिनिना परमृष्टाः। तथाऽपि भगवतः पाणिनेः व्याकरणशास्त्रकेन्द्रबिन्दुत्वं विलसत्येव। पाणिनिः हि भगवान् सर्वाणि प्रचलितव्याकरणशास्त्राणि समालोच्य विशदमपि शब्दप्रयोगविषयं समाहृत्य व्याकरणसूत्राणि प्रणिनाय यत्र निखिलमेव सप्रपञ्चं शब्दानुशासनम् आत्मसाद्भूतमस्ति। तस्य हि व्याकरणसंहिता 'अष्टाध्यायी' नाम्ना प्रसिद्धाऽस्ति। यद्यपि आपिशलव्याकरणं पाणिनेरुपजीव्यमासीत् यथा हरदत्तः सङ्गतयति तथापि तस्य मौलिकत्वम् अक्षुण्णमविहतञ्च अस्त्येव।

पाणिनेः हि गोत्रनाम पाणिनिः, पिता शलङ्कः, माता दाक्षी, विशेषनाम आहिकः, मातुलो व्याडिः स एव दाक्षिर्दाक्षायणो वा, अनुजस्तु पिङ्गलः, आचार्यो वर्षोपाध्यायः, मातामहश्च व्याडः, निवासो वाहिकदेशः, शिष्याः कौत्सप्रभृतयः, निधतिथिस्त्रयोदशी, अभिजनश्च शलातुर इति पण्डिता अनुमान्ति।

पाटलीपुत्रे हि वर्षाचार्यस्यानेके शिष्या आसन्। तेषु पाणिनिर्नाम मूढमतिः सर्वेस्तिरकृतः (यथोक्तं स्कन्दपुराणे) अथ च वररुचिनामा तस्य सहाध्यायी तं शास्त्रचर्चानिमित्तम् आजुहाव। प्रवृत्ते च शास्त्रार्थे यदा

पाणिनिः पराजयद्वारि समुपस्थितः तदा गुरुपत्न्युपदेशेन तपः तप्तुं गोपर्वतं जगाम। भगवता शङ्करेण गगने महान् हुङ्कारः कृतो येन वररुचिः हतप्रभः सञ्जातः पाणिनिश्च विजयम् अवाप। ततश्च खिन्नो वररुचिरपि तपः तप्तुं हिमालयमगादाराधितः शम्भुः स्वल्पेनैव कालेन। ततश्च लब्धकृत्स्नव्याकरणः स पुनः पाटलीपुत्रमा-जगाम। तदा पाणिनिसूत्राणि सम्प्रचलितानि आसन्। वररुचिरपि तत्रानुक्तदुरुक्तपक्षमवलम्ब्य वार्तिकानि प्राणिनायेति।

**कालः** - पाश्चात्यैः विद्वद्भिः पाणिनेः समयो विक्रमाब्दात् ६५७ पूर्वतः २५८ विक्रमवर्षपूर्वं यावत् स्वीकृतोऽस्ति। अन्तःसाक्ष्यभूतेः बहुभिः प्रमाणैः 'संस्कृतव्याकरणशास्त्रस्येतिहासे, श्रीमान् युधिष्ठिरो मीमांसकः प्रमाणयत्ति यत् स्थूलतया पाणिनेः समयो विक्रमाब्दात् २९०० वर्षपूर्व निश्चीयत इति।

सङ्क्षेपेण पाणिनिकालनिर्धारणसम्बन्धीनि सम्माननीयानां केषांश्चित् अन्येषामपि विदुषां मतानि पाठकानां सौकर्याय समुद्ध्रियन्तेऽत्र-

१. सत्यव्रतः सामश्रमी २४०० ई. पूर्वम्

२. गोल्डस्टुकरः ७०० ई. पूर्वम्

३. बेलबेलकरः ७०० ई. पूर्वम्

४. भाण्डारकरः ७०० ई. पूर्वम्

५. बासुदेवशरणः ५०० ई. पूर्वम्

६. मैकडोनलः ५०० ई. पूर्वम्

७. मैक्समूलरः ३५० ई. पूर्वम्

८. बेवरः ३०० ई. पूर्वम्

९. कीथः ३०० ई. पूर्वम्

एवं स्वकीयप्रमाणपुञ्जैः समये समये विद्वद्भिः स्वानि-स्वानि मतानि प्रदर्श्य महर्षिः पाणिनिः समभ्यर्चितः। मन्ये भाविनि काले च गवेषकाः पन्थानमिममनुसृत्य किमपि नवीनं प्रामाणिकश्च पाणिनेः कालनिर्धारणं विधास्यन्तीति।

पाणिनेः मृत्युविषयकः सङ्केतः पञ्चतन्त्रस्य प्रसङ्गविशेषात् समुपलभ्यते। तत्रेत्थम्- 'सिहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः'। अनेन निश्चीयते यत् पाणिनेः प्राणान् सिहो जहारेति। वैयाकरणानां

परम्परामधिकृत्य पाणिनेः निधनतिथिः त्रयोदशी इति। यतोऽद्याप्यनध्याय दिवसोऽयम्। अन्यत् किमपि ऐतिह्यमस्मिन् विषये नैवोपलभ्यते।

**पाणिनेः कृतयः**

संस्कृतव्याकरणेतिहासालोडनेन ज्ञायते यत् पाणिनिना अधोलिखिताः ग्रन्थाः प्रणीताः-

(१) अष्टाध्यायी

(२) शिक्षा (पाणिनीयशिक्षा)

(३) जाम्बवती विजयं (पातालविजयं) महाकाव्यम्।

(५) धातुपाठः

(६) गणपाठः

(७) उणादिसूत्रपाठः

(८) लिङ्गानुशासनम्

(९) अष्टाध्याय्याः स्वोपज्ञवृत्तिः।

पाणिनेः अष्टाध्याय्यां अस्तित्वं तावत् पर्यन्तं स्थास्यति यावत् कालं विश्वस्मिन् संस्कृतस्याध्ययना-ध्यापनप्रवाहः प्रचलिष्यति। पाणिनेरष्टाध्याय्यां चतुःसहस्राणि सूत्राणि सन्ति तथा चेयमष्टसु अध्यायेषु विभक्ताऽस्ति, यत्र प्रत्येकं चत्वारः पादाः सन्ति। पाणिनिना अत्यन्तसरलया, मनोरमया च शैल्या सूत्राणां रचना कृताऽस्ति या वयमनायासेनावगच्छामः।

**1.1.1.2 कात्यायनः**

**"उक्तानुक्तद्विरुक्तानां चिन्ता यत्र प्रवर्तते।**

**तं ग्रन्थं वार्तिकं प्राहुः वातिकज्ञा मनीषिणः"॥** इति लक्षणलक्षितस्य वार्तिकस्य कारकत्वेन स्मृतोऽयं 'कात्यायन' नामको दाक्षिणत्यो महान् वैयाकरणो मुनित्रितये प्राधान्यं भजमानः सूर्य इव व्याकरणाकाशे दृश्यते। वार्तिकं नाम सूत्रे उक्तं विशदयति स्पष्टयति वा, अनुक्तं किन्तु कथनीयं कथयति, दुरुक्तं सूक्तं करोति च।

भर्तृहरि-कुमारिल-क्षीरस्वामी-हेलाराज-सायण-नागेश-पतञ्जलिप्रभृतिभिर्वाक्यकारपदेनाऽप्ययं व्यवह्रियते। अनेन पाणिनीयाष्टाध्यायीसूत्राणि आधारीकृत्या अनेकानि वार्तिकानि लिखितानि। महाभाष्ये यानि अनपेक्षितानि वार्तिकानि, तानि प्रायशो खण्डितानि।

अस्य पर्यावतया नामानि कात्यः, कात्यायनः पुनर्वसुः मेघाजिन् वररुचिः इत्यादीनि संस्कृतव्याकरणशास्त्रे-तिहासे उट्टङ्कितानि तत्प्रणेतृभिः श्री युधिष्ठिरमीमांसकमहोदयैः। तत्र कात्येति नाम गोत्रप्रत्ययान्तम्। कात्यायन इति नाम युवप्रत्ययान्तम्। पुनर्वसु इति नक्षत्रं नाम। वररुचीति नाम सर्वदा बहुपु स्वलेषु विशेषतो महाराजसमुद्रगुप्तस्य कृष्णचरिते स्वर्गारोहणकाव्यस्य कतृत्वेन स्मृतो वर्तते। अयमेव पाणिनीयसुत्रवार्तिककारः कात्यायनः। कथासरित्सागरे, (१/२/६६-७०) बृहत्कथामञ्जर्याञ्च कात्यायनस्य 'श्रुतधर' इति नामाऽप्युपलभ्यते। 'कात्यायन' इति नाम्ना बहवः पुरुषाः संस्कृतवाङ्मये ऐतिहासिकदृष्ट्या कौशिककात्यायन-आङ्गिरसकात्यायन भार्गवकात्यायन याज्ञवल्क्यवाल्क्य कात्यायनेत्यादयः प्रसिद्धाः सन्ति। अयं प्रत्यगतः पश्चिमदिशि कलिन्दजाकुले विलसितां कौशाम्बीं नाम नगरीं स्वजन्मनालञ्चकार। सोमदत्तः अस्य पिता वसुदत्ता च प्रसूरासीदिति प्रसिद्धिः।

कात्यायनस्य वार्तिकपाठः पाणिनीयव्याकरणस्य सर्वथा पोषकः। यो हि सम्प्रति स्वतन्त्ररूपेण नोपलभ्यते। इममेवाश्रित्य पतञ्जलिना महाभाष्यरचनाऽकारि। इदमपि स्पष्टतया वक्तुं न शक्यते यदेतेषां वार्तिकाणां कियतो सङ्ख्याऽस्ति। महाभाष्ये न केवलं कात्यायनस्यैव वार्तिकाणां समावेशोऽपितु अन्येषामपि।

**कालः** - अस्य समयो विक्रमशताब्दीतः २९०० वर्षपूर्वमेव।

**कृतयः** - कात्यायनगोत्रो वररुचिः स्वकीयगोत्रनाम्नैव ख्यातिमुपजगाम। महाभाष्ये पतञ्जलिः किमपि वाररुचं काव्यं निर्दिष्टवान् यस्यापरं नाम स्वर्गारोहणकाव्यमिति। प्रस्तुतस्य काव्यस्योल्लेखः कृष्णचरिते एवमुपलभ्यते।

### 1.1.1.3 पतञ्जलिः

पाणिनेराष्टाध्याय्यां बहुभिः विद्वद्भिः वार्तिका रचिताः। एतेषु वार्तिकेषु परवर्तिभिः आचार्याः भाष्याणि लिखितानि। मूलतन्त्रं भाष्यसूत्राणि च आदाय अनेके भाष्यग्रन्थाः प्रणीताः आसन् येषां स्वरूपं तु सम्प्रति न एव उपलम्यते किन्तु तेषाम् अस्तित्वं महाभाष्यस्मरणात् जायते। महाभाष्यं हि मूलतन्त्रवार्तिकसूत्राणि आधृत्य प्रणीतो महाग्रन्थो यस्य प्रवक्ता पतञ्जलि हि भगवान्। उक्तमेव

भाष्यलक्षणञ्च यथा

**'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥**

अत्र सूत्रानुसारिभिः वाक्यैः इत्यनेन वार्तिकग्रहणम्। महाभाष्यशब्दे महत् पदं सूचयति यदितः पूर्वं कोऽपि भाष्यग्रन्थः आसीत्, तस्मादप्ययं महान् अस्ति इति भावः।

पतञ्जलिविषये अधस्तनमिदं पद्यं सुप्रसिद्धम् अस्ति यदनेन मुनिना योगशास्त्रे, व्याकरणशास्त्रे, वैद्यकशास्त्रे च ग्रन्थरचना व्यधायीति। तत् पद्यं यथा -

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**

**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।**

यद्यप्येतस्य पद्यस्य प्रामाणिकता नास्ति ऐतिह्यकोविदां सम्मुखे तथाप्ययं पतञ्जलिर्महाभाष्यकाररूपेण प्रसिद्धेः पराङ्कोटिमाटीकते। अयं पाणिनीयव्याकरणमाश्रित्य महद्व्याख्यानं लिपिबद्धञ्चकार यच्चमच्चरोकरोति विपश्चिच्चेतांसि। नीरसमपि व्याकरणशास्त्रं स्वकीययाऽभिनवव्याख्यानसरण्याऽयं सुतरां सरसयाञ्चकार। यदधीत्य देशिका वैदेशिकाश्च विद्वांसो महाभाष्यमिदं मुक्तकण्ठतया प्रशंसन्ति।

'यथोत्तरं मुनीनां प्रामाण्यम्' वाक्यमिदं प्रमाणयितुं महाभाष्यग्रन्थः सुतरां समर्थः। प्राच्याः पाश्चात्याः सर्वेऽपि वैयाकरणाः पतञ्जलिकृतमहाभाष्यस्य पुरतः सर्वदा सादरं विनतकन्धरा भवन्ति।

अयं महामुनिः पतञ्जलिः प्राचोनीषु ग्रन्थेषु विविधैः पर्यायैरवगम्यते। तद्यथा-गोनर्दीयः, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः, चूर्णिकारः, पदकारः, चेति।

अत्र नवसु नामसु प्रथमं नामद्वयं चरमश्च नामद्वयं किमपि ऐतिह्यं स्वीकरोतु नाम किन्तु शेषाः पर्यायाः शेषाऽवतारतामस्य व्यञ्जयन्तीति सुविशदम्। क्षीरस्वामी भाष्यशब्दस्य पर्यायत्वेन चूर्णिशब्दं स्वीकरोति।

महाभाष्यकर्तुः पतञ्जलेर्देशकालादिपरिचयविषयेऽलब्धसामग्रीका वयं मौनमालम्बामहे। यदि गोणिकापुत्र-शब्दः पाणिनेः परिचायकस्तर्हि अस्य मातुर्नाम गोणिका इति सम्भाव्यते। गोनर्दीय शब्दविषयेऽपि एवमेव वयं विचारयामः। यदिदं तथ्यं तर्हि गोनर्ददेशः गोण्डामण्डलपरिसरे स्वीकर्तव्य इति। अत्र नैकमत्यं विदुषाम्।

**कालः -** यस्मिन् महाभाष्ये सकलं वाङ्मयं स्पष्टतमं प्रतिभाति तत्र तस्येव प्रन्थकर्तुः परिचयोऽन्विष्यापि नोपलभ्यते। इत्यहो प्राचां विदुषां स्वाभिमानरक्षणपरा काऽप्यलौकिकी परिपाटी।

अत्र संस्कृतव्याकरणशास्त्रस्येतिहासलेखकस्य पण्डितप्रवरस्य युधिष्ठिरमीमांसकस्य मतं सादरमुद्ध्रीयते। महाभागेनाऽनेन बहूनां मतमतान्तराणां ऊहापोहानन्तरं सप्रमाणं यन्मतं स्थिरीकृतं तदिदम्। चन्द्रोगोमि - द्वारापरिष्कृतवर्तमानपाठमाधारीकृत्य महाभाष्यकारस्य पतञ्जलेः कालनिर्धारणं सर्वथाऽन्याय्यम्।

**कृतयः -**

(१) महाभाष्यम्

(२) योगसूत्रम्

(३) महानन्दमयम् इत्यादि काव्यानि।

### 1.1.2 लघुसिद्धान्तकौमुदी

पाणिनेः अष्टाध्यायाः अक्षरक्रमः साधारणरीत्या न भवति। किन्तु क्रमानुसारं शास्त्रानुसारं च भवति। पाणिनेः सूत्राणां व्याख्यानम् आचार्येण भट्टोजिना कृतम्। व्याकरणपठितॄणां छात्राणाम् इच्छानुसारम् आचार्यः भट्टोजिदीक्षितः पाणिनीये इतस्ततः सूचितान् नियमान् आवश्यानुसारं क्रमीकृतवान्। भट्टोजिमहाभागेन रचितः ग्रन्थः भवति 'वैयाकरणसिद्धान्तकौमुदी'। पाणिनीयाद् अत्यन्तमावश्यकानि सूत्राणि चित्वा संक्षिप्ततया रचितः अयं ग्रन्थः व्याकरणशास्त्रे प्रवेष्टुं साहाय्यं करोति। सः प्रथमं संज्ञाप्रकरणं सन्धिप्रकरणानि अजन्तहलन्तशब्दनिष्पत्तिरूपाणि इत्येवं रूपेण परिवर्तनं कृत्वा लिखितवान्।

वरदराजः मध्यसिद्धान्तकौमुदीरचनान्तरं व्याकरणशास्त्रस्य प्रथमसोपानरूपं लघुसिद्धान्तकौमुदीं रचितवान्। लघुसिद्धान्तकौमुदी सिद्धान्तकौमुद्याः संक्षिप्तं संस्करणमस्ति। इयं वरदराजाचार्येण संपादिता। वरदराजाचार्यो दुर्गातनयस्य तनयः आसीत्। दुर्गातनयश्च भट्टोजिदीक्षितस्य शिष्यः आसीत्। एतेषां कालः पञ्चदशशताब्द्यामासीत्।

#### 1.1.2.1 लघुसिद्धान्तकौमुद्याः प्राधान्यम्

व्याकरणस्शास्त्रस्य प्राथमिक ग्रन्थेषु प्रक्रियाक्रमे लघुसिद्धान्तकौमुदी अत्यन्तं मुख्यं स्थानं आवहति। यतः अनेन मार्गेण वयं पाणिनीयव्याकरणं प्रवेष्टुं शक्नुमः। अतः प्राथमिस्तरस्य छात्रान् मनसि निधाय प्रक्रियाक्रमेण रचितः अयं ग्रन्थः।

व्याकरणस्य अध्ययने अष्टाध्यायीक्रमः एकः प्रक्रियाक्रमः अपरः। तत्र अष्टाध्यायीक्रमे - अष्टाध्यायां येन क्रमेण सूत्राणि निमिष्टानि तेनैव क्रमेण अध्ययनं क्रियते। प्रक्रियाक्रमे तु सूत्राणां पुना रचना(क्रमस्य परिवर्तनं क्रियते भिन्नेषु प्रकरणेषु प्रक्रियाज्ञानस्य सौलभ्यार्थंम्)। तत्र प्रक्रियाक्रमस्य ग्रन्थेषु मूर्धन्यस्थानं आवहति भट्टोजिदीक्षितेन विरचिता वैयाकरणसिद्धान्तकौमुदी। यत्र अष्टाध्यायाः सर्वाणि सूत्राणि लौकिकानि वैदिकानि च क्रमान्तरेण व्याख्यातानि सन्ति। सिद्धान्तकौमुद्याः सङ्क्षेपरूपः अयं ग्रन्थः लघुसिद्धान्तकौमुदी इति। प्रायः द्वादशशतं सूत्राणि सन्ति। अयं वृत्तिग्रन्थः इत्युच्यते। वृत्तिग्रन्थः इत्युक्ते - सूत्रं भवति सूत्रस्य अर्थः (वृत्तिः) स्पष्टं दीयते, उदाहरणानि दीयन्ते, कदाचित् किञ्चिदिव सूत्रे विद्यमानानां पदानां विमर्शः अपि

क्रियते। वृत्तिग्रन्थानां मुख्यं प्रयोजनं भवति सूत्रस्य अर्थस्य अवगमनं कुत्र तस्य सूत्रस्य उपयोगः। इदं तु लघुसिद्धान्तकौमुद्याः अध्ययनेन सम्यक् सिद्धयति।

सिद्धान्तकौमुदीमपेक्ष्यात्र प्रकरणविपर्यासो दृश्यते। स च सहेतुकः। तद्यथा ग्रन्थस्यान्ते, स्त्रीप्रकरणस्य निरूपणम्, कृदन्तमनुकारकादितद्धितान्तस्य प्रतिपादनम्, तिङन्तकृदन्तावनुकारकस्य कथनम्। अकथितं च कर्तृकरणयोस्तृतीयेति सूत्राणां सम्यगर्थस्तिङन्तकृदन्तादनन्तरमेव समायाति। अन्यथा तु तिङन्तस्य ज्ञानं विना दुह्यादिधातूनां तथा च तिङ्कृतोर्ज्ञानं विनाऽनभिहितकर्तृत्त्वस्य बोधो झटिति न घटति।

ग्रन्थादौ मङ्गलाचारणद्वारा ग्रन्थस्य प्राधान्यं कथयति वरदराजेन।

**नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।**
**पाणिनीयाप्रवेशाय लघुसिद्धान्तकौमुदीम्।।**

वरदराजाचार्यः इष्टदेवतां वाग्देवतां सरस्वतीं नमस्करोति। इयं सरस्वती शुद्धा, शब्दव्युत्पत्तिज्ञानादिप्रशस्तैः गुणैः युक्ता भवति। तां देवीं नमस्कृत्य पाणिनीये (अष्टाध्यायीं) प्रवेष्टुम् इच्छूनां छात्राणां सुकरया प्रवेशनाय लघुसिद्धान्तकौमुदीं नाम ग्रन्थं रचितुमारभे इति।

ग्रन्थान्ते तेन सूचितमस्ति यत्

**शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका**
**कृता वरदराजेन लघुसिद्धान्तकौमुदी। इति।**

व्याकरणशास्त्रादितरेषु शास्त्रेषु सुकरः प्रवेशः यथा स्यात्, इत्येतर्थमेव बालबुद्धिजनानाम् उपकाराय लघुसिद्धान्तकौमुद्याः रचना कृता वरदराजेन इति भावः। व्याकरणस्य सर्वशास्त्रोपकारत्वादेव शास्त्रमिदं महाशास्त्रपदेन वर्णितं विद्यते। इति श्लोकद्वयेनापि लघुसिद्धान्तकौमुद्याः प्राधान्यं अवगच्छामः।

## पुनरावृत्तिः (Recap)

- महर्षिः पाणिनिः व्याकरणसूत्राणि प्रणीनाय।
- महर्षिः कात्यायनः सूत्रेषु न्यूनादिकमवेक्ष्य वार्तिकग्रन्थं रचयामास।
- महर्षिः पतञ्जलिः सूत्रं वार्तिकञ्चाश्रित्य अतिविशिष्टं व्याख्यानं महाभाष्यं कृतवान्।
- पाणिनिः शलङ्कनामधेयात् पितुः दाक्ष्यां जन्म लेभे।

- पाणिनेः कालविषये मतभेदाः सन्ति।
- पाणिनेः अष्टाध्याय्यां चतुःसहस्राणि सूत्राणि सन्ति।
- कात्यायनस्य श्रुतधरः वररुचिश्चेति अभिधाने श्रूयते।
- सोमदत्तः कात्यायनस्य पिता वसूदत्त च प्रसूः आसीत्।
- पतञ्जलेः गोणिकाख्या जननी, जन्मभूमिश्च गोनर्ददेशः अभवत्।
- प्रक्रियाक्रमः।
- वृत्तिगन्थः।
- प्रकरणानि सन्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अष्टाध्यायीं अधारीकृत्य भट्टोजिना विरचितायाः कौमुद्याः नाम किम्?
2. पाणिनेः आचार्यस्य नाम किम्?
3. पाणिनेः मृत्युः कथं अभूत्?
4. अष्टाध्याय्याः कति सूत्राणि सन्ति?
5. पाणिनेः अन्यानि नामानि लिखत।
6. कात्यायनस्य अपरं नाम किम्?
7. व्याकरणशास्त्रस्य केन्द्रबिन्दुः कः?
8. महाभाष्यं कस्य रचना?
9. गोनर्दीयः कः?
10. लघुसिद्धान्तकौमुद्याः रचयिता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. वरदराजमधिकृत्य लघुटिप्पणीं लिखत।
2. वार्तिकलक्षणम् लिखत।
3. अष्टाध्यायीं अधिकृत्य लघुटिप्पणीं लिखत।
4. पाणिनेः कति कृतयः सन्ति?
5. पतञ्जलिः कस्य उपरि महाभाष्यं लिखितवान्?
6. वृत्तिः नाम का?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. लघुसिद्धान्तकौमुद्याः प्राधान्यं किम्?
2. अष्टाध्यायीम् अधिकृत्य टिप्पणीं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. व्याकरणशास्त्रे सूत्रकारस्य पाणिनेः स्थानम्।
2. भाष्यकारो पतञ्जलिः।
3. वार्तिककारो कात्यायनः।
4. वरदराजस्य लघुसिद्धान्तकौमुदी।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. वैयाकरणसिद्धान्तकौमुदी।
2. वर्षोपाध्यायः।
3. पाणिनेः प्राणान् सिहो जहारेति।

4. चतुःसहस्राणि।
5. पाणिनः, पाणिनिः, दाक्षीपुत्रः, शालङ्किः, शालातुरीयः, आहिकः।
6. वररुचिः।
7. पाणिनिः।
8. पतञ्जलेः।
9. पतञ्जलिः।
10. वरदराजाचार्यः।

## सूचनाग्रन्थौ (References)


1. AShokchandra Goud Sastri. SamskrutaVyakaranasastrethihasa vimarshah, Published by Department of Sanskrit, Shri Rajeev Gandhi, Kendriya Samskruta Vidyapeetom, Sringeri.
2. Acharya Lokamani Dahal. Vyakaranasastrethihasah, Bharateeya Vidya Prakashan, Varanasi, Delhi.


SGOU

# Unit - 2

## लघुसिद्धान्तकौमुद्याः अजन्त पुल्लिङ्गप्रकरणे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रात् आरम्भ्य 'न विभक्तौ तुस्माः' इति सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- अजन्तशब्दानां रूपनिष्पादने प्राविण्योपार्जनम्।
- प्रकृतिं प्रत्यययोः सम्बन्धं च विवेचयति।
- सूत्रस्य व्याख्यां कर्तुं क्षमतोत्पादनम्।

### प्राग्व्यपेक्षाः (Prerequisites)

वयं लोके व्यवहाराय वाक्यानां प्रयोगं कुर्मः। वाक्यं पदानां समूहो भवति। संस्कृतभाषायां पदस्य द्वौ भेदौ स्तः सुबन्तपदं, तिङन्तपदं च। येषां शब्दानाम् अन्ते सुपः भवन्ति ते शब्दाः सुबन्ताः कथ्यन्ते। येषां च अन्ते तिङः भवन्ति ते तिङन्ताः कथ्यन्ते इति पूर्वमपि सुप्तिङन्तं पदमिति सूत्रे पठितमेव। प्रातिपदिकाद् सुपः भवन्ति। प्रातिपदिकशब्दाः च द्विविधाः अजन्तशब्दाः, हलन्तशब्दाः इति भेदात्। येषां शब्दानाम् अन्ते अच् भवति ते अजन्ताः शब्दाः। येषां शब्दानाम् अन्ते हल् भवति ते हलन्ताः। तत्र लिङ्गभेदेन अजन्तशब्दाः हलन्तशब्दाश्च त्रिविधाः भवन्ति। तथाहि अजन्तपुंलिङ्गशब्दाः, अजन्तस्त्रीलिङ्गशब्दाः, अजन्तनपुंसकलिङ्गशब्दाः, हलन्तपुंलिङ्गशब्दाः, हलन्तस्त्रीलिङ्गशब्दाः, हलन्तनपुंसकलिङ्गशब्दाश्चेति। अस्मिन् पाठे अजन्तपुंलिङ्गशब्दानां रूपसाधनप्रक्रियाम् आलोचयामः।

सुप्-प्रत्ययाः प्रातिपदिकाद् भवन्ति। अतः प्रातिपदिकं किम् इति जिज्ञासा भवति। अतः भगवान् पाणिनिः प्रातिपदिकसंज्ञाविधायकं सूत्रद्वयं रचितवान्। प्रातिपदिकं व्युत्पन्नम् अव्युत्पन्नं च भवति। तत्र येषां शब्दानां व्याकरणप्रक्रियया प्रकृतिप्रत्ययादिविभागः कर्तुं शक्यते ते शब्दाः व्युत्पन्नाः। यथा पाचक

इत्यादिशब्दाः। येषां शब्दानां व्याकरणप्रक्रियया प्रकृतिप्रत्ययादिविभागं कर्तुं न शक्यते ते शब्दाः अव्युत्पन्नाः। यथा चैत्र इत्यादिशब्दाः। केचन च शब्दाः व्युत्पन्नाः अव्युत्पन्नाः च भवन्ति। यथा राम इत्यादयः। रामशब्दस्य रूपनिष्पादनं अस्मिन् एकके पश्यामः।

## मुख्यपदानि (Keywords)

प्रातिपदिकम्, कृत्तद्धितान्तौ समासाश्च, स्वादयः, प्रत्ययः, अवसानं, इत्, पूर्वसवर्णदीर्घः

## Discussion

### रामशब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | रामः | रामौ | रामाः |
| **सम्बोधनाप्रथमा** | हे राम | हे रामौ | हे रामाः |
| **द्वितीया** | रामम् | रामौ | रामान् |
| **तृतीया** | रामेण | रामाभ्याम् | रामैः |
| **चतुर्थी** | रामाय | रामाभ्याम् | रामेभ्यः |
| **पञ्चमी** | रामात् | रामाभ्याम् | रामेभ्यः |
| **षष्ठी** | रामस्य | रामयोः | रामाणाम् |
| **सप्तमी** | रामे | रामयोः | रामेषु |

1. **अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१-२-४५)**

अर्थवत्, अधातुः, अप्रत्ययः, प्रातिपदिकम् इति पदच्छेदः। अनेन सूत्रेण प्रातिपदिकसंज्ञा विधीयते। धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् इति सूत्रार्थः। अर्थ अस्य अस्ति इति अर्थवत्। अधातुः इति, अप्रत्ययः इति च तस्य विशेषणम्। न धातुः अधातुः। अप्रत्ययः इत्यनेन प्रत्ययभिन्नं प्रत्ययान्तभिन्नं च विवक्षितं वर्तते। एवं धातुं प्रत्ययं प्रत्ययान्तं च

वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं भवति इति सूत्रार्थः। यथा - 'रामः' इति पदे 'राम' इत्यस्य प्रातिपदिकम्।

**2. कृत्तद्धितसमासाश्च (२.२.४६)**

कृत्तद्धितसमासाः, च इति पदच्छेदः। अनेन सूत्रेण प्रातिपदिकसंज्ञा विधीयते। कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः इति सूत्रार्थः। कृदन्तं, तद्धितान्तं समासाश्च इत्येते प्रातिपदिक-संज्ञकाः स्युः इति सूत्रस्य अर्थः लभ्यते। धातुना सह तृच्प्रत्ययः। तृच् कृति अन्तर्भवन्ति। तस्य प्रातिपदिकसंज्ञा।

**3. स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)**

एकपदं सूत्रम्। अनेन सूत्रेण स्वादयः प्रत्ययाः विधीयन्ते। सु - ओ - जस् - अम् - औट् - शस् - टा - भ्याम् - भिस् - ङे – भ्याम् – भ्यस् - ङसि - भ्याम् - भ्यस् - ङस् - ओस् - आम् - ङि - ओस् - सुप् इति। ङि- अन्ताद् आबन्तात् प्रातिपदिकात् च परे स्वादयः प्रत्ययाः स्युः। एवं सूत्रार्थः भवति - डि-अन्ताद् आबन्तात् प्रातिपदिकात् च परे सु-आदयः एकविंशतिः प्रत्ययाः स्युः। तेषां सु-आदीनाम् एकविंशतेः प्रत्यवानाम् (सुबन्त-प्रत्ययानां) वर्गीकरणम्।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| **प्रथमा** | सु | औ | जस् |
| **द्वितीया** | अम् | औट् | शस् |
| **तृतीया** | टा | भ्याम् | भ्यस् |
| **चतुर्थी** | ङे | भ्याम् | भ्यस् |
| **पञ्चमी** | ङसि | भ्याम् | भ्यस् |

| | | | |
|---|---|---|---|
| **षष्ठी** | ङस् | ओस् | आम् |
| **सप्तमी** | ङि | ओस् | सुप् |

**4. ङ्याप्प्रातिपदिकात् (४.१.१)**

एकपदं सूत्रम्। अनेन सूत्रेण स्वादयाः प्रत्ययाः विधीयन्ते। ङि च, आप् च प्रातिपदिकं च इति ङ्याप्प्रातिपदिकम् (समाहारद्वन्द्वः)। ङि इत्यनेन 'डीप् ङीष् ङि' इत्यादीनां स्त्री-प्रत्ययानां सामान्येन ग्रहणम्। एवमेव आप् इत्यनेन टाप्-डाप्-चाप् इत्येतेषां स्त्रीप्रत्ययानां ग्रहणम्। प्रत्ययग्रहणपरिभाषया च तदन्तग्रहणम्। एवं ङ्यन्ताद् आबन्तात् प्रातिपदिकात् च परे स्वादयः प्रत्ययाः स्युः इति सूत्रार्थः। यथा राम शब्दात् राम सु।

**5. प्रत्ययः (३.१.१)**

प्रत्ययः इति एकपदं वर्तते। एतद् अधिकारसूत्रम् अस्ति। तत् च प्रथमान्तम् अस्ति। इतः ऊर्ध्वम् आपञ्चमाध्यायपरिसमाप्तेः प्रत्ययशब्दः संज्ञात्वेन अधिक्रियते। अर्थात् अस्य सूत्रस्य अधिकारः तृतीयाध्यायस्य प्रथम पादात् पञ्चमाध्यायपरिसमाप्ति यावत् प्रवर्तते। यथा सु औ जस् इत्यादयः प्रत्ययः।

**6. परश्च (३.१.२)**

परः च इति द्विपदं सूत्रम्। ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। एतद् अपि अधिकारसूत्रम् अस्ति। परः इति प्रथमान्तम्। च इति अव्ययम् अस्ति। ततश्च ङ्यन्ताद् आबन्तात् प्रातिपदिकात् च परे स्वादयः प्रत्ययाः स्युः इति सूत्रस्य अर्थः। अर्थात् यस्मात् प्रत्ययः विधीयते ततः प्रत्ययाः परे स्युः इत्यवबोद्धव्याः।

**7. सुपः (२.४.१०३)**

सुपः इति एकपदम् वर्तते। अनेन सूत्रेण एकवचनद्विवचनबहुवचनसंज्ञानि विधीयन्ते। सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचन द्विवचनबहुवचनसंज्ञानि स्युः इति सूत्रार्थः। सुप्सम्बन्धीनि त्रीणि त्रीणि वचनानि क्रमेण एकवचन-द्विवचन-बहुवचन-संज्ञानि स्युः इति सूत्रार्थः। अर्थात् प्रथमादि-

सप्तमीविभक्तिषु प्रथमप्रत्ययस्य एकवचनसंज्ञा, द्वितीयप्रत्ययस्य द्विवचनसंज्ञा तथा तृतीयप्रत्ययस्य च बहुवचनसंज्ञा स्यात्। यथा राम जस् इत्यत्र 'जस्' इत्यस्य बहुवचनसंज्ञत्वम्।

**8. द्व्येकयोर्द्विचनैकवचने (१.४.२२)**

द्व्येकयोः द्विवचनैकवचने इति पदद्वयं वर्तते। द्वित्वैकत्वयोरेते स्तः इति सूत्रार्थः। द्वित्व - एकत्वयोः यथाक्रमं द्विवचनं एकवचनं च भवतः। यतो हि द्विपदेन पदार्थ-द्वयस्य तथा च एकपदेन एकस्य पदार्थस्य बोधः भवेत्। यथा 'राम सु' इत्यत्र सु इत्यैकत्वम्।

**9. विरामोऽवसानम् (१.४.११०)**

विरामः अवसानम् इति पदच्छेदः। अनेन सूत्रेण अवसानसंज्ञः विधीयते। वर्णानामभावोऽव-सानसंज्ञः स्यात् इति सूत्रार्थः। विरामशब्दस्य अर्थद्वयं सम्भवति। प्रथमः विरम्यते अस्मिन्निति विरामः। अर्थात् उच्चारणस्य स्थगनं यत्र क्रियते तद् विरमणम्। उच्चारणस्य स्थगनम् अन्तिमवर्णस्य समीपे क्रियते। अतः एतन्मतानुसारम् अन्तिमवर्णः अवसानसंज्ञकः भवति। द्वितीयः विरमणं विरामः। विरमणं नाम क्रियायाः अभावः। यथा 'राम' इति प्रातिपदिके अकारानन्तरं वर्णः न। अतः तादृशस्य अकारस्यावसानसंज्ञां लभते।

**रामः**

अकारान्तः पुलिङ्गः प्रथमैकवचनम्। रमन्ते योगिनोऽस्मिन्निति विग्रहे रम् धातोः हलश्चेत्यधिकरणे घञ्प्रत्यये अनुबन्धलोपे वृद्धौ कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण 'राम' इत्यस्य प्रातिपदिकसंज्ञा। रामशब्दात् प्रथमैकवचनविवक्षायां 'स्वौजसमौट् .......' इत्यादि सूत्रेण सुप्रत्यये राम सु इति जाते 'उपदेशेऽजनुनासिक इत्' इति इकारस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे 'राम् स्' इति स्थिते 'ससजुषो रुः' इति सूत्रेण रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण पदान्तरेफस्य विसर्गे 'रामः' इति सिद्धम्।

**10. सरूपाणामेकशेष एकविभक्तौ (१.२.६४)**

सरूपाणाम्  एकशेषः एकविभक्तौ इति पदच्छेदः। एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते इति सूत्रार्थः। एकविभक्तौ सरूपाणाम् एकशेषः भवति। यथा - राम राम औ इत्यत्र अनेन सूत्रेण एकः रामशब्दः शिष्यते। राम औ।

**11.प्रथमयोः पूर्वसवर्णः (६.१.१०२)**

प्रथमयोः पूर्वसवर्णः  इति पदच्छेदः। अनेन सूत्रेण पूर्वसवर्णदीर्घमेकादेशः विधीयते। अकः प्रथमाद्वितीययोरचि  पूर्वसवर्णदीर्घः एकादेशः स्यात्। दीर्घः अकः अचि एकः पूर्वपरयोः इत्यादयः अनुवर्तन्ते। प्रथमयोः इति अवयवषष्ठी। यथा राम औ इत्यत्र 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घस्य प्रसक्तिरस्ति।

**12.नादिचि (६.१.१०४)**

न आत् इचि इति पदच्छेदः। अनेन सूत्रेण पूर्वसवर्णदीर्घः न विधीयते। आदिचि परे न पूर्वसवर्णदीर्घः। रामौ। पूर्वसवर्णः दीर्घः इति अनुवर्तेते। यथा  - राम औ प्रत्यये इत्यत्र औ इति इच्प्रत्याहारे परे सवर्णदीर्घस्य निषेधः भवति। ततश्च 'वृद्धिरेचि' इति सूत्रेण वृद्धिः एकादेशे रामौ इति सिद्ध्यति।

**रामौ**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां 'स्वौजसमोट्' .... इत्यादि सूत्रेण प्रथमाद्विवचनविवक्षायां 'औ' प्रत्यये 'राम औ' इत्यत्र 'वृद्धिरेचि' इति सूत्रेण वृद्धिं प्राप्ते तं प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घ प्राप्ते 'नादिचि' इति सूत्रेण निषेधे 'वृद्धिरेचि' इति सूत्रेण वृद्धौ 'रामौ' इति सिद्धम्।

**13.बहुषु बहुवचनम् (१.४.२१)**

बहुषु  बहुवचनम् इति पदच्छेदः। अनेन सूत्रेण बहुवचनं विधीयते। बहुत्वविवक्षायां बहुवचनं स्यात् इति सूत्रार्थः। बहुवचनम् इति प्रथमा एकवचनम्।  यथा - रामश्च रामश्च रामश्च इति एकशेष राम इति शिष्यते। ततः प्रथमा विभक्तौ बहुत्वविवक्षायां बहुषु बहुवचनम् इत्यनेन बहुवचनान्ते जस् प्रत्ययः।

## 14. चुटू (१.३.७)

चुटू इति एकपदं वर्तते। अनेन सूत्रेण इत्संज्ञा विधीयते। प्रत्ययाद्यौ चुटू इतौ स्तः इति सूत्रार्थः। प्रत्ययस्य आदिभूतौ यौ चवर्गटवर्गौ तौ इत्संज्ञकौ भवतः इत्यर्थः। यथा - राम जस् इत्यत्र 'ज्' इत् भवति।

## 15.विभक्तिश्च (१.४.१०४)

विभक्तिः च इति पदच्छेदः। अनेन सूत्रेण विभक्तिसंज्ञौ विधीयेते। सुप्तिङौ विभक्तिसंज्ञौ स्तः इति सूत्रार्थः। सुबन्तस्य तिङन्तस्य च विभक्तिसंज्ञा न भवति किन्तु केवलं सुपः (स्वौजस् इति सूत्रोक्तानाम्) तिङश्च (तिप्-तस्-झि... इति सूत्रोक्तानाम्) भवति इति अवधातव्यम्।

## 16. न विभक्तौ तुस्माः (१.३.४)

न विभक्तौ तुस्माः इति पदच्छेदः। अनेन सूत्रेण इत् न विधीयते। विभक्तिस्थाः तवर्गसकारमकाराः इतो न स्युः इति सूत्रार्थः। इति न इत्वम्। तुस्माः इत्यत्र तु - स्-म् इत्येतेषां तुश्च स् च मश्च इति विग्रहे सति द्वन्द्वसमासः। ततश्च विभक्तिस्थाः तवर्ग- सकार - मकाराः इत्संज्ञकाः न स्युः इत्यर्थः लभ्यते। एवं रामास् इत्यत्र सकारस्य इत्संज्ञाभावे रेफे विसर्गे रामाः इति रूपं सिद्ध्यति।

**रामाः -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां 'स्वौजसमोट्' .... इत्यादि सूत्रेण प्रथमा बहुवचने जस्प्रत्यये 'राम राम राम जस्' इति स्थिते 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकस्मिन् रामशब्दे अवशिष्टे 'राम जस्' इति स्थिते 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण तस्य लोपे, 'अदर्शनं लोपः' इति सूत्रेण तस्य अदर्शने, 'राम अस्' इति जाते सकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा। 'न विभक्तौ तुस्माः' इति सूत्रेण इतः निषेधः। पुनः 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वपरयोः पूर्वसवर्णदीर्घादेशे सकारस्य रुत्वे विसर्ग च कृते 'रामाः' इति सिद्धम्।

## पुनरावृत्तिः (Recap)

- अर्थवदधातुरप्रत्ययः प्रातिपदिकम् - प्रातिपदिकसंज्ञा।
- कृत्तद्धितसमासाश्च - कृदन्तं,तद्धितान्तं समासान्तं च प्रातिपदिकसंज्ञा।
- स्वौजसमौट् .... इत्यनेन एकविंशतिः सुप् प्रत्ययाः विधीयन्ते।
- ङ्याप्प्रातिपदिकात् इत्यनेन ङ्यन्तात् आबन्तात् प्रातिपदिकात् स्वादयः प्रत्ययाः स्युः।
- प्रत्ययः - अधिकारसूत्रम्।
- परश्च - प्रातिपदिकात् परे स्वादयः प्रत्ययाः स्युः।
- सुपः - एकवचन-द्विवचन-बहुवचनानि विधीयन्ते।
- द्व्येकयोर्द्विवचनैकवचने - द्विवचनं, एकवचनं च विधियेते।
- विरामोऽवसानम् - अवसानसंज्ञा।
- सरूपाणामेकशेष एकविभक्तौ - सरूपाणाम् एकशेषः भवति।
- प्रथमयोः पूर्वसवर्णः - पूर्वसवर्णदीर्घमेकादेशः।
- नादिचि - पूर्वसवर्णदीर्घः न भवति।
- बहुषु बहुवचनम् - बहुवचनविधायकम्।
- चुटू - चवर्गटवर्गौ इत्संज्ञा।
- विभक्तिश्च - विभक्तिसंज्ञा।
- न विभक्तौ तुस्माः - तवर्गसकारमकाराः इत् न भवन्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. केन सूत्रेण कृदन्तानां प्रातिपदिकसंज्ञा विधीयते?
2. कयोः विभक्तिसंज्ञा विधियेते?
3. सुप् प्रत्याहारे कति प्रत्ययाः सन्ति?
4. प्रातिपदिकात् परे स्वादयः स्युः - केन सूत्रेण?

5. पूर्वसवर्णदीर्घः न स्यात् - सूत्रं किम्?
6. केन सूत्रेण सरूपाणां एकशेषः भवति?
7. सुपः इति सूत्रेण किं विधीयते?
8. अवसानसंज्ञा विधायकं सूत्रं किम्?
9. तवर्गसकारमकाराः इत् न भवति - केन सूत्रेण?
10. केन सूत्रेण द्विवचनं विधीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. प्रातिपदिकं नाम किम्?
2. न विभक्तौ तुस्माः इति सूत्रेण किं विधीयते?
3. सुप् प्रत्ययाः के?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्राणि व्याख्यात -**

1. न विभक्तौ तुस्माः
2. नादिचि
3. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्
4. प्रथमयोः पूर्वसवर्णः

**सप्रमाणं व्याख्यात**

1. राम- प्रथमा एकवचनम्।

## निर्दिष्टाभ्यासः (Assignments)

1. ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च - एतानि सूत्राणि व्याख्यत।
2. राम- प्रथमा एकवचनद्विवचनबहुवचनरूपाणि सप्रमाणं निष्पदायत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. कृत्तद्धितसमासाश्च।
2. सुप्तिङौ।
3. एकविंशतिः।
4. स्वौजस्....... इत्यादिना सूत्रेण।
5. नादिचि।
6. सरूपाणामेकशेष एकविभक्तौ।
7. वचनानि। (एकवचनद्विवचनबहुवचनानि)।
8. विरामोऽवसानम्।
9. न विभक्तौ तुस्माः।
10. द्व्येकयोर्द्विचनैकवचने।

## सूचनाग्रन्थाः (References)

1. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००
2. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी व्याख्या-समन्विता व्याख्याकारः गोविन्दप्रसादशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
3. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत-कलालयः, तृप्पूणित्तुरा, १९९३

# Unit - 3
## ‘एकवचनं सम्बुद्धिः’ इति सूत्रादारभ्य ‘वाऽवसाने’ इति सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- रामशब्दस्य सम्बोधनप्रथमादिविभक्तीनां प्रक्रियां जानाति।
- स्वयमपि सूत्रस्य व्याख्यानं कर्तुं प्रभवति।
- सम्बोधनप्रथमाम् आरभ्य पञ्चमी पर्यन्तं विभक्तेः परिचयं ज्ञात्वा पाणिनीयव्याकरणे प्रवेष्टुं क्षमता।

### प्राग्व्यपेक्षाः (Prerequisites)

पूर्वस्मिन् एकके अजन्तपुंलिङ्गशब्दस्य रामशब्दस्य प्रथमा विभक्तेः रुपनिष्पादनं तदर्थं सहायकान् सूत्राणि च अपठाम। अस्मिन् एकके अजन्तपुंलिङ्गरामशब्दस्य सम्बोधनप्रथमाम् आरभ्य षष्ठ्यैकवचनपर्यन्तं रूपाणि कथं इति पश्यामः, तदर्थं सहायकसूत्राणां अर्थमपि ज्ञातुमवसरः सम्प्राप्ता। पाठभागं प्रविश्यामः।

### मुख्यपदानि (Keywords)

सम्बुद्धिः, अङ्गम्, लोपः, पूर्वरूपमेकादेशः, इत् , नः, नस्य णः, णो न, इनादयः, दीर्घः, भिसः ऐस्, ङेर्यादेशः, स्थानिवद्भावः, एत्वं, चर्त्वं विकल्पेन।

### Discussion

**1. एकवचनं सम्बुद्धिः (२.३.४९)**

एकवचनं सम्बुद्धिः इति पदच्छेदः। अनेन सूत्रेण सम्बुद्धिसंज्ञं विधीयते। सम्बोधने प्रथमायाः एकवचनं सम्बुद्धिसंज्ञं स्यात् इति सूत्रार्थः। सम्बोधनप्रथमायाः एकवचनस्य सम्बुद्धिसंज्ञा। अर्थात् सम्बोधने सुप्रत्ययस्य सम्बुद्धिसंज्ञा भवति। यथा हे राम।

**2. यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१.४.१३)**

यस्मात् प्रत्ययविधिः तदादि प्रत्यये अङ्गम् इति पदच्छेदः। अनेन सूत्रेण अङ्गसंज्ञा विधीयते। यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं स्यात् इति सूत्रार्थः। तत् प्रकृतिरूपम् आदिर्यस्य शब्दस्वरूपस्य तत् तदादि। यः प्रत्ययः यस्मात् पदाद् विधीयते तस्मिन् प्रत्यये परे सति तदादि शब्दस्वरूपस्य अङ्गसंज्ञा भवति। यथा - हे राम सु इत्यवस्थायां राम इत्यस्य अकारस्य अङ्गसंज्ञा, सु परत्वेन वर्तमानत्वात्।

**3. एङ्ह्रस्वात्सम्बुद्धेः (६.१.६९)**

एङ् ह्रस्वात् सम्बुद्धेः इति पदच्छेदः। अनेन सूत्रेण लोपः विधीयते। एङन्ताद् ह्रस्वान्तात् च अङ्गात् परः हल् लुप्यते सम्बुद्धेश्चेत् इति सूत्रार्थः। लुप्यते इति लोपः। एङ् च ह्रस्वश्च एङ्ह्रस्वम्, तस्मात् एङ्ह्रस्वात्। एङन्ताङ्गात् ह्रस्वान्ताङ्गात् परस्य सम्बुद्धेः हलः लोपः भवति इति सूत्रार्थः। यथा - हे राम सु इत्यवस्थायां 'एङ्ह्रस्वात्सम्बुद्धेः' इत्यनेन सु इत्यस्य लोपः। हे राम इति हे रामौ, हे रामाः।

**हे राम**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां सम्बोधनप्रथमैकवचनविवक्षायां 'स्वौजसमौट्....' इत्यादिसूत्रेण सु प्रत्यये अनुबन्धलोपे 'हे राम स्'। स् इत्यस्य 'एकवचनं सम्बुद्धिः' इति सूत्रेण सम्बुद्धिसंज्ञायां हल् किञ्च ह्रस्वान्तात् अङ्गात् परम् अस्ति। तस्मात् 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रेण सकारस्य लोपे 'हे राम' इति रूपम्।

**हे रामौ**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां सम्बोधनद्विवचनविवक्षायां 'स्वौजसमोट्....' इत्यादि सूत्रेण औप्रत्यये अनुबन्धलोपे 'हे राम औ'। सम्बोधनद्विवचने सम्बुद्धिसंज्ञा स्तः। अतः 'राम औ' इत्यत्र 'वृद्धिरेचि' इति सूत्रेण वृद्धिं प्राप्ते तं प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घ प्राप्ते 'नादिचि' इति सूत्रेण निषेधे 'वृद्धिरेचि' इति सूत्रेण वृद्धौ 'हे रामौ' इति सिद्धम्।

**हे रामाः**

रामशब्दात् बहुवचनविवक्षायां सम्बोधनप्रथमा बहुवचने जस्प्रत्यये 'हे राम जस्' इति स्थिते सम्बोधनबहुवचने सम्बुद्धिसंज्ञा स्तः। अतः 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण तस्य लोपे, 'अदर्शनं लोपः' इति सूत्रेण तस्य अदर्शने, 'हे राम अस्' इति जाते सकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा। 'न विभक्तो तुस्माः' इति सूत्रेण निषिद्धा, अथ च 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वपरयोः पूर्वसवर्णदीर्घादेशे सकारस्य रुत्वे विसर्ग च कृते 'रामाः' इति सिद्धम्।

**4. अमि पूर्वः (६.१.१०७)**

अमि पूर्वः इति पदच्छेदः। अनेन सूत्रेण पूर्वरूपमेकादेशः विधीयते। अकोऽम्यचि पूर्वरूपमेकादेशः स्यात्। (अकः अमि अचि पूर्वरूपम् एकादेशः स्यात्)। यथा- रामम्। रामशब्दात् द्वितीयैकवचनप्रत्यये राम अम् इत्यत्र 'अमि पूर्वः' इति पूर्वरूपे रामम् इति।

**रामम्**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां द्वितीयाविभक्तेरेकवचने 'स्वौजसमौट्....' इत्यादिसूत्रेण अम्प्रत्यये 'राम-अम्' इति स्थिते 'हलन्त्यम्' इति सूत्रेण मकारस्य इत्संज्ञायां प्राप्तायां 'विभक्तिश्च' इति सूत्रेण विभक्तिसंज्ञायां 'न विभक्तौ तुस्माः' इति सूत्रेण मकारस्य इत्संज्ञानिषेधे 'अकः सवर्णे दीर्घः' इति सूत्रेण पूर्वसवर्णदीर्घे च प्राप्ते तम् उभयम् अपि प्रबाध्य 'अमि पूर्वः' इति सूत्रेण पूर्वरूपे 'रामम्' इति सिद्धम्।

**रामौ**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां द्वितीयाविभक्तेः द्वित्वविवक्षायाम् 'स्वौजसमौट् .......' इत्यादिसूत्रेण औट्प्रत्यये 'राम राम औट्' इति स्थिते ततः अनुबन्धलोपे 'सरूपाणामेकशेष एकविभक्तौ' इत्येकशेषे 'राम-औ' इति स्थिते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ प्राप्तायां ताम् प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति सूत्रेण तन्निषेधे 'वृद्धिरेचि' इति सूत्रेण वृद्धौ 'रामौ' इति रूपम्।

**5. लशक्वतद्धिते (२.३.८)**

लशकु अतद्धिते इति पदच्छेदः। अनेन सूत्रेण इत् विधीयते। तद्धितवर्जप्रत्ययाद्या लशकवर्गाः इतः स्युः इति सूत्रार्थः। लशकु इति समस्तपदम्। अत्र 'लश्च शश्च कुश्च' इति एषां समाहारद्वन्द्वः। न तद्धिते अतद्धिते इति नञ्समासः। तद्धितभिन्नस्य प्रत्ययस्य आदिभूतं लकारशकारकवर्गाः इत्संज्ञं भवति। यथा राम शस् इत्यत्र श् इत्यस्येत्संज्ञा

**6. तस्माच्छसो नः पुंसि (६.२.१०३)**

तस्मात् शसः नः पुंसि इति पदच्छेदः। अनेन सूत्रेण नकारः विधीयते। पूर्वसवर्णदीर्घात् परो यः शसः सकारस्तस्य नः स्यात्पुंसि इति सूत्रार्थः। ततश्च पूर्वसवर्णदीर्घात् परः यः शसः सकारः तस्य स्थाने नकारः स्यात् पुंलिङ्गे इत्यर्थः लभ्यते। यथा राम शब्दात् द्वितीयाबहुवचने राम शस्। अनुबन्धलोपे राम अस्। सवर्णदीर्घे रामास्। अत्र सकारस्य नकारादेशः। 'रामान्' इति रूपम्

**7. अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२)**

अट्कुप्वाङ्नुम्व्यवाये अपि इति पदच्छेदः। अनेन सूत्रेण नस्य णः विधीयते। अट् कवर्गः पवर्ग आङ् नुम् एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे इति सूत्रार्थः। तेन च सूत्रेण रषाभ्याम् अव्यवहितपरस्य णत्वं विहितम्। रामेण इत्यादौ अडादि व्यवधाने अपि णत्व प्राप्त्यर्थम् इदम् आरब्धम्। अट्प्रत्याहारः, कुः कवर्गः, पुः पवर्गः। अट् च कुश्च पुश्च, आङ् च, नुम् च इति अटुकुप्वाङ्नुम् (इतरेतर-द्वन्द्वः)। एते व्यवधानं अटकुवानुम्व्यवायः (तृतीया तत्पुरुषः)। तस्मिन् अट्कुप्वाङ्नुम्व्यवाये। तैः यद् व्यवधानं तस्मिन् सत्यपि रषाभ्यां परस्य नस्य णत्वं स्यात् इत्यर्थः। यथा - रामान् इत्यत्र नस्य णत्वप्रसक्तिः।

**8. पदान्तस्य (८.४.३७)**

पदान्तस्य इति एकपदं सूत्रम्। अनेन सूत्रेण नस्य णत्वं न विधीयते। पदान्तस्य नस्य णो न स्यात् इति सूत्रार्थः। रामान्। ततश्च अट् कवर्गः पवर्गः आङ्नुम् एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधाने अपि रेफषकाराभ्यां परस्य पदान्तस्य नकारस्य स्थाने णकारः न स्यात् इत्यर्थः लभ्यते। यथा- रामान्। अत्र

यद्यपि पूर्वसूत्रेण नकारस्य णकारः प्राप्नोति। तथापि तस्य सुबन्तत्वात् सुप्तिङन्तं पदमिति सूत्रेण पदसंज्ञायां पदान्तत्वात् च अनेन सूत्रेण तस्य निषेधे रामान् इति रूपं सिद्ध्यति।

**रामान् -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां द्वितीया बहुवचने 'स्वौजमौट् ......' इत्यादि सूत्रेण शस्प्रत्यये 'राम शस्' इति जाते 'लशक्वतद्धिते' इति सूत्रेण शस्य इत्संज्ञायां लोपे च कृते 'राम अस्' इत्यत्र 'अकः सवणे दीर्घः' इति सूत्रेण दीर्घे, 'अतो गुणे' इति सूत्रेण पररूपञ्च प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घादेशे 'रामास्' इति स्थिते 'तस्माच्छो नः पुंसि' इति सूत्रेण सकारस्य नकारे 'अट्कुप्वाड्नुम्व्यवायेऽपि' इति सूत्रेण नस्य णत्वे प्राप्ते 'पदान्तस्य' इति सूत्रेण निषेधे 'रामान्' इति सिद्धम्।

**9. टाङसिङसामिनात्स्याः (७.१.१२)**

टाङसिङसाम् इनात्स्याः इति पदच्छेदः। अनेन सूत्रेण इनादयः विधीयन्ते। अदन्तात् टादीनाम् इनादयः क्रमात् स्युः इति सूत्रार्थः। अङ्गस्य इति पञ्चम्यन्तं विशेषणम्। ततः तदन्तविधिः। अकारान्ताद् अङ्गाद् इति। क्रमादिति च यथासंख्यमनुदेशाः समानाम् इति सूत्रलभ्यम्'। टादीनाम् (टा-ङसि- ङसाम्) इनादयः (इन-आत्-स्य इत्येते प्रत्ययाः) भवन्ति। अर्थात् अकारान्ताद् अङ्गात् परेषां टा ङसि ङस् इत्येतेषां स्थाने क्रमाद् इन आत् स्य इत्येते आदेशाः स्युः इत्यर्थः लभ्यते। यथा रामेण। अत्र राम इति अदन्ताङ्गम्। अतः परं टा इत्यस्य इनादेशः भवति। 'आद्गुणः' इति सूत्रेण गुणे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्व णकारे च रामेण इति सिध्यति।

**रामेण -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकत्वात् तृतीयाविभक्तेः एकवचनविवक्षायां 'स्वौजसंमौट् .......... इत्यादि' सूत्रेण टाप्रत्यये 'टाङसिङसामिनात्स्याः' इति राम इन इति। ततः 'आद्गुणः' इति सूत्रेण गुणः एकादेशे रामेन इति स्थिते ततः 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नस्य णत्वे 'रामेण' इति सिद्धम्।

## 10. सुपि च (७.३.१०२)

सूपि च इति पदद्वयं वर्तते। अनेन सूत्रेण दीर्घः विधीयते। यञादौ सुप्यतोऽङ्गस्य दीर्घः स्यात् इति सूत्रार्थः। यथा रामाभ्याम्। राम - भ्याम् इति स्थिते भ्याम् इति यञादि सुप् वर्तते। अतः अदन्ताङ्गस्य रामस्य अनेन सूत्रेण दीर्घे सति रामाभ्याम् इति सिद्ध्यति।

**रामाभ्याम्**

रामशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां 'स्वौजसमौट् .........' इत्यादि सूत्रेण भ्याम्प्रत्यये एकशेषे 'राम भ्याम्' इत्यत्र मकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा प्राप्नोति। 'तस्याः न विभक्तौ तुस्माः' इत्यनेन निषेधः भवति। रामशब्दः अदन्तः भवति। तस्य च भ्याम् इति प्रत्यये परे 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण अङ्गसंज्ञा भवति। भ्याम् यञादिः सुप्। तस्मात् यञादौ सुपि भ्याम् परे 'सुपि च' इति सूत्रेण अदन्तस्य अङ्गस्य अन्त्यस्य अतः दीर्घः भवति। तेन अकारस्य आकारे रामा भ्याम्। संयोगे 'रामाभ्याम्' इति सिद्धं भवति।

## 11. अतो भिस ऐस् (७.१.९)

अतः भिसः ऐस् इति पदच्छेदः। अनेन सूत्रेण भिसः ऐस् विधीयते। अदन्तात् अङ्गात् परस्य भिसः ऐस् स्यात् इति सूत्रार्थः। (अकारान्तात् अङ्गात् भिसः ऐस् स्यात्) अनेकाल्शित्सर्वस्य रामैः। 'अङ्गस्य इति पञ्चमी। ततश्च अकारान्तात् अङ्गात् परस्य भिसः स्थाने ऐस् इति आदेशः स्यात् इत्यर्थः अनेकाल्शित्सर्वस्य इति सूत्रसामर्थ्यात् अनेकाल्त्वाद् भिसः ऐस् इति सर्वादेशः भवति। यथा राम - ऐस्। वृद्धौ रुत्वे विसर्गे च रामैः।

**रामैः -**

रामशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकत्वात् तृतीयाबहुवचनविवक्षायां 'स्वौजसमौट् ...... ' इत्यादि सूत्रेण भिस्प्रत्यये, एकशेषे 'राम भिस्' इति स्थिते सकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा प्राप्ते 'न विभक्तौ तुस्माः' इत्यनेन निषेधः भवति। रामशब्दः अदन्तः भवति। रामशब्दस्य अङ्गसंज्ञापि भवति। 'अनेकाल्शित् सर्वस्य' इति परिभाषया 'अतो भिस ऐस्' इति सूत्रेण भिसः ऐसादेशे 'राम ऐस्'

इति स्थिते ‘वृद्धिरेचि’ इति सूत्रेण वृद्धौ ‘रामैस्’ इति स्थिते सकारस्य ‘ससजुषो रुः’ इति सूत्रेण रुत्वे ‘खरवसानयोर्विसर्जनीयः’ इति विसर्गे च ‘रामैः’ इति सिद्धम्।

## 12. ङेर्यः (७.१.१३)

ङेः यः इति पदच्छेदः। अनेन सूत्रेण ङेः यकारादेशः विधीयते। अतोऽङ्गात्परस्य ङेर्यादेशः स्यात् इति सूत्रार्थः। 'ङेः' इति एकारान्तात् षष्ठ्यैकवचनम्, न तु ङिशब्दस्य सप्तम्येकवचनं व्याख्यानात्। अतः इति पञ्चम्यन्तम् अनुवर्तते। ततश्च अकारान्ताद् अङ्गात् परस्य ङेः इत्यस्य यकारादेशः स्यात् इति सूत्रार्थः। यथा- चतुर्थीविभक्तौ राम ङे। यकारादेशे जाते यञादेः यकारस्य सुप्त्वाभावात् सुपि च इत्यनेन दीर्घः न स्यात्। अत एव यकारे सुप्त्वधर्मम् आनेतुं स्थानिवद्भावं सूत्रं प्रवर्तते।

## 13. स्थानिवदादेशोऽनल्विधौ (१.१.५६)

स्थानिवत् आदेशः अनल्विधौ इति पदच्छेदः। अनेन सूत्रेण स्थानिवद्भावः विधीयते। आदेशः स्थानिवत् स्यात्, न तु स्थान्यलाश्रयविधौ इति सूत्रार्थः। स्थानिना तुल्यं स्थानिवत्। अला विधिः अल्विधिः (तृतीया तत्पुरुषः), अलः परस्य विधिः अल्विधिः (पञ्चमी तत्पुरुषः), अलः (स्थाने) विधिः अल्विधिः (षष्ठीतत्पुरुषः), अलि (परे) विधिः अल्विधिः (सप्तमी तत्पुरुषः) इति च चतुर्विधसमासेन अल्विधिः इत्यस्य अलाश्रयविधिः इत्यर्थः भवति। न अल्विधिः अनल्विधिः (नञ्- तत्पुरुषः)। एवम् आदेशः स्थानिवद् भवति अलाश्रयविधौ तु न भवति इत्यर्थः। ततः स्थानिवत्त्वात् सुपि च इत्यनेन सूत्रेण दीर्घः। एवं रामाय इति रूपम्।

**रामाय-**

रामशब्दात् ‘कृत्तद्धितसमसाश्च’ इति सूत्रेण प्रातिपदिकसंज्ञायां चतुर्थ्यैकवचने ‘स्वौजसमौट् ......’ इत्यादि सूत्रेण ङेप्रत्यये ‘राम ङे’ इति स्थिते अदन्तात् अङ्गात् परस्य ङेप्रत्ययस्य ‘ङेर्यः’ इति सूत्रेण यादेशे ‘राम य’ इत्यत्र ‘स्थानिवदादेशोऽनल्विधौ’ इति सूत्रेण स्थानिवद्भावेन सुप्त्वात् ‘सुपि च’ इति सूत्रेण अदन्तस्य अङ्गस्य दीर्घे ‘रामाय’ इति रूपं सिद्धम्।

**रामाभ्याम्**

रामशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् चतुर्थीद्विवचनविवक्षायां 'स्वौजसमौट् .........' इत्यादि सूत्रेण भ्याम्प्रत्यये एकशेषे 'राम भ्याम्' इत्यत्र मकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा प्राप्नोति। तस्याः 'न विभक्तौ तुस्माः' इत्यनेन इत्संज्ञायाः निषेधः भवति। तस्मात् यञादौ सुपि भ्याम् परे 'सुपि च' इति सूत्रेण अदन्तस्य अङ्गस्य दीर्घे आकारे 'रामा भ्याम्'। संयोगे 'रामाभ्याम्' इति सिद्धं भवति।

**14. बहुवचने झल्येत् (७.३.१०३)**

बहुवचने झलि एत् इति पदच्छेदः। अनेन सूत्रेण एत्वं विधीयते। झलादौ बहुवचने सुप्यतोऽङ्गस्य एकारः स्यात् इति सूत्रार्थः। रामेभ्यः। 'झलि' इत्यनेन 'सुपि' इति विशेष्यते। अदन्ताङ्गस्य एकारः स्यात् झलादौ बहुचवचने सुपि परे इत्यर्थः। यथा रामेभ्यः। राम भ्यस् इत्यत्र भ्यस् इत्यस्य भकारस्य झल्त्वात् झलादि सुपि परे अदन्तस्य रामगतस्य अकारस्य एकारे रामेभ्यः इति रूपं सिद्ध्यति।

**रामेभ्यः -**

रामशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकत्वे चतुर्थीविभक्तेः बहुवचनविवक्षायां 'स्वौजसमौट् ......' इत्यादि सूत्रेण भ्यस्प्रत्यये 'राम-राम-राम भ्यस्' इति स्थिते 'सरूपाणामेकशेष एकविभक्तौ' इत्येकशेषे 'राम भ्यस्' इति स्थिते (अदन्तत्वात्) आदित्वात् सुप्त्वाच्च 'सुपि च' इति सूत्रेण दीर्घे प्राप्ते, 'बहुवचने झल्येत्' इति सूत्रेण एत्वे, अनुबन्धलोपे सकारस्य रुत्वे विसर्गे च कृते 'रामेभ्यः' इति सिद्धम्।

**15. वाऽवसाने (८.४.५६)**

वा अवसाने इति पदच्छेदः। अवसाने झलां चरो वा स्युः इति सूत्रार्थः। एवम् अवसाने झलां स्थाने चरः विकल्पेन स्युः इत्यर्थः लभ्यते। विकल्पनिर्देशात् पक्षे चर्त्वे सति रामात्। अन्यथा रामाद् इति रूपं सिद्ध्यति।

**रामात् -**

रामशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकत्वात् पञ्चम्येकवचनविवक्षायां 'स्वौजसमौट्......' इत्यादि सूत्रेण ङसिप्रत्यये 'राम ङसि' इति जाते 'टाङसिङसमिनात्स्याः' इति सूत्रेण ङसेः आत् इत्यादेशः। तत्र 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घमेकादेशे 'रामात्' इति स्थिते रामात् इत्यस्य पदसंज्ञा भवति। तत्र पदान्ते झलः तकारस्य 'झलां जशोऽन्ते' इत्यनेन दकारे रामाद्। 'विरामोऽवसानं' इति सूत्रेण दकारात् परं वर्णोच्चारणस्य अभावस्य अवसानसंज्ञा। तत्र 'वाऽवसाने' इति सूत्रेण झलः दकारस्य वैकल्पिकेन चर्त्वे तकारे रामात् इति रूपम्।

**रामाभ्याम्**

रामशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् पञ्चमीद्विवचनविवक्षायां 'स्वौजसमौट् .........' इत्यादि सूत्रेण भ्याम्प्रत्यये एकशेषे 'राम भ्याम्' इत्यत्र मकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा प्राप्नोति। तस्याः 'न विभक्तौ तुस्माः' इत्यनेन इत्संज्ञायाः निषेधः भवति। तस्मात् यञादौ सुपि भ्याम् परे 'सुपि च' इति सूत्रेण अदन्तस्य अङ्गस्य दीर्घे आकारे 'रामा भ्याम्'। संयोगे 'रामाभ्याम्' इति सिद्धं भवति।

**रामेभ्यः -**

रामशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकत्वे चतुर्थीविभक्तेः बहुवचनविवक्षायां 'स्वौजसमौट् ......' इत्यादि सूत्रेण भ्यस्प्रत्यये 'राम-राम-राम भ्यस्' इति स्थिते 'सरूपाणामेकशेष एकविभक्तौ' इत्येकशेषे 'राम भ्यस्' इति स्थिते (अदन्तत्वात्) आदित्वात् सुप्त्वाच्च 'सुपि च' इति सूत्रेण दीर्घे प्राप्ते, 'बहुवचने झल्येत्' इति सूत्रेण एत्वे, अनुबन्धलोपे सकारस्य रुत्वे विसर्गे च कृते 'रामेभ्यः' इति सिद्धम्।

**रामस्य -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठ्येकवचनविवक्षायां ङस्प्रत्यये 'राम ङस्' इति स्थिते 'टाङसिङसामिनात्स्याः' इति सूत्रेण ङसः स्थाने स्य इत्यादेशे 'रामस्य' इति सिद्धम्।

## पुनरावृत्तिः (Recap)

- एकवचनं सम्बुद्धिः - सम्बुद्धिसंज्ञा।
- यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् - अङ्गसंज्ञा।
- एङ्ह्रस्वाद्सम्बुद्धेः - सम्बुद्धिसंज्ञकस्य हलः लुप्यते।
- अमि पूर्वः - पूर्वरूपमेकादेशः।
- लशक्वतद्धिते - लशकवर्गाः इतः भवन्ति।
- तस्माच्छसो नः पुंसि - शसः नः स्यात्।
- अट्कुप्वाङ्नुम्व्यवायेऽपि - णत्वं विधीयते।
- पदान्तस्य - नकारस्य णः स्यात्।
- स्थानिवदादेशोऽनल्विधौ - स्थानिवद्भावम्।
- टाङसिङसामिनात्स्याः - इनादयः विधीयन्ते।
- सुपि च - अङ्गस्य दीर्घः।
- अतो भिस ऐस् - भिसः ऐस् स्यात्।
- बहुवचने झल्येत् - एत्वं विधीयते।
- वाऽवसाने - चरः वा स्यात्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. प्रथमायाः कस्य वचनस्य सम्बुद्धिसंज्ञं स्यात्?

2. राम + अम् इत्यत्र केन सूत्रेण पूर्वरूपं सिद्ध्यति?
3. शसः शकारस्य इत् संज्ञा केन सूत्रेण?
4. ङे इत्यस्य कः आदेशः भवति?
5. शसः सकारस्य नकारादेशः कथं भवति?
6. अङ्गसंज्ञाविधायकं सूत्रं किम्?
7. रामेण इत्यत्र नकारस्य णकारः केन सूत्रेण?
8. रामाभ्याम् इत्यत्र दीर्घः केन सूत्रेण भवति?
9. हे राम + सु इत्यत्र अङ्गं किम्?
10. स्थानिवद्भावः केन सूत्रेण विधीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
**(Answer the following questions in one or two sentences)**

1. वाऽवसाने इति सूत्रस्य अर्थं लिखत।
2. रामेभ्यः इत्यत्र एत्वं कथम् भवति?
3. स्थानिवदादेशोऽनल्विधौ इत्यत्र अनल्विधौ इत्यस्य कः अर्थः?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

**सूत्राणि सोदाहरणं व्याख्यात -**

1. एङ्ह्स्वात्सम्बुद्धेः।
2. अट्कुप्वाङ्नुम्व्यवायेऽपि।
3. अमि पूर्वः।

1. रामशब्दस्य सम्बोधनप्रथमा सप्रमाणं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. प्रदत्तानि रूपाणि ससूत्रं साधयत - रामान्, रामेण, रामेभ्यः।
2. सोदाहरणं सूत्रं व्याख्यात- बहुवचने झल्येत्, पदान्तस्य, सुपि च।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. एकवचनस्य।
2. अमि पूर्वः।
3. लशक्वतद्धिते।
4. यादेशः।
5. तस्माच्छसो नः पुंसि।
6. यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।
7. अट्कुप्वाङ्नुम्व्यवायेऽपि।
8. सुपि च।
9. राम इत्यत्रअकारस्य।
10. स्थानिवदादेशोऽनल्विधौ।

## सूचनाग्रन्थाः (References)


1. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००
2. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्दप्रसादशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
3. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३

# Unit - 4
## ‘ओसि च’ इति सूत्रादारभ्य ‘आदेशप्रत्यययोः’ इति सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- अकारान्तरामादिशब्दानां रूपसाधने सहायकसूत्राणि अवगच्छति।
- रामशब्दस्य षष्ठीद्विवचनादिरूपाणां प्रक्रियां जानाति।
- अजन्तपुंलिङ्गशब्दानां पदस्वरूपं, तद्भेदान् च अवगच्छति।

### प्राग्व्यपेक्षाः (Prerequisites)

पूर्वस्मिन् एकके रामशब्दस्य सम्बोधनप्रथमा इत्यारभ्य षष्ठ्येकवचनपर्यन्तानां रूपाणां सिद्धिः कथं इति अपठाम। तदर्थं सहायकसूत्राण्यपि ज्ञातानि। सम्बुद्धिसंज्ञा, अङ्गसंज्ञा, स्थानिवद्भावः, णत्वविधानं लशकवर्गाणां इत्संज्ञा इत्यादि सूत्राणां विशेषताः च अवगच्छति। अस्मिन् एकके अकारान्तरामशब्दस्य षष्ठीद्विवचनादिषु रूपाणां प्रक्रियां ज्ञास्यामः। तदर्थं सहायकसूत्राणां विशेषताः अर्थान् च पठामः।

### मुख्यपदानि (Keywords)

एकारः, नुडागमः, नामि अङ्गस्य दीर्घः, मूर्धन्यादेशः।

### Discussion

**1. ओसि च (७.३.१०४)**

ओसि च इति पदच्छेदः। अनेन सूत्रेण एत्वं विधीयते। ओसि परेऽतोऽङ्गस्य एकारः स्यात् इति सूत्रार्थः। अदन्ताङ्गस्य एकारः स्यात् ओसि परे। अलोऽन्त्यस्य इत्यनेन अन्त्यस्य अलः अकारस्य एकारादेशः।

यथा रामयोः। राम् ओस्। 'ओसि च' इत्यनेन राम् ए ओस्। एचोऽयवायावः इति सूत्रेण अयादेशे राम् अय् ओस्। रुत्वे विसर्गे च रामयोः इति रूपम्।

**रामयो: -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां प्रातिपादिकत्वात् षष्ठी विभक्तेः द्विवचनविवक्षायाम् 'स्वौजसमौट् ...........' इत्यादि सूत्रेण ओस्प्रत्यये 'राम ओस्' इति स्थिते 'ओसि च' इति सूत्रेण अदन्ताङ्गस्य एकारे प्राप्ते 'अलोऽन्त्यस्य' इति नियमात् अकारस्य एकारे 'रामे ओस्' इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'रामयोस्' इति स्थिते सकारस्य 'ससजुषो रुः' इत्यनेन रुत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गे च 'रामयोः' इति सिद्धम्।

**2. ह्रस्वनद्यापो नुट् (७.१.५४)**

ह्रस्वनद्यापः नुट् इति पदच्छेदः। अनेन सूत्रेण नुडागमः विधीयते। ह्रस्वान्तात् नद्यन्ताद् आबन्ताद् चाङ्गात्परस्यामो नुडागमः स्यात् इति सूत्रार्थः। ह्रस्वश्च नदी च आप् च इति ह्रस्वनद्याप्। तस्मात् ह्रस्वनद्यापः (समाहारद्वन्द्वः)। आप् इत्यनेन टाप् चाप् याप् इत्येतेषां स्त्रीप्रत्ययानां ग्रहणम्। 'परस्य' इति अध्याहार्यम्। ह्रस्वान्ताद् नद्यन्ताद् आबन्तात् च अङ्गात् परस्य आमः नुडागमः स्यात् इत्यर्थः। यथा - राम आम् इत्यत्र नुडागमे राम् न् आम् इति।

**3. नामि (६.४.३)**

नामि इति एकपदं वर्तते। अनेन सूत्रेण दीर्घः विधीयते। नामि परेऽजन्ताङ्गस्य दीर्घः स्यात् इति सूत्रार्थः। अत्र दीर्घः,अङ्गस्य च इति अनुवर्तते। अङ्गं विशेष्यते। अतः तदन्तविधिः। ततश्च अजन्ताङ्गस्य दीर्घः स्यात् नामि परे इत्यर्थः। यथा - राम आम् इति स्थिते नुडागमे राम नाम् इति जाते अजन्ताङ्गस्य रामस्य दीर्घे सति 'अट्कुप्वाङ्.......' इति नकारस्य णकारे रामाणाम् इति रूपं सिद्ध्यति।

**रामाणाम् -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां 'स्वौजसमौट्.....' इत्यदि सूत्रेण षष्ठीबहुवचने आम्प्रत्यये 'राम आम्' इति स्थिते 'ह्रस्वनद्यापोनुट्' इति सूत्रेण नुडागमे 'राम नाम्' इति जाते 'नामि' इति सूत्रेण दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्य णत्वे 'रामाणाम्' इति सिद्धम्।

**रामे -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् 'स्वैजसमौट् ..........' इत्यादि सूत्रेण सप्तमी विभक्तौ एकवचने ङिप्रत्यये 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे च कृते 'राम इ' इति स्थिते 'आद्गुणः' इति सूत्रेण अकार-इकारयोः गुणे एकारे 'रामे' इति रूपम्।

**रामयोः -**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां प्रातिपादिकत्वात् सप्तमी विभक्तेः द्विवचनविवक्षायाम् 'स्वौजसमौट् ...........' इत्यादि सूत्रेण ओस्प्रत्यये 'राम ओस्' इति स्थिते 'ओसि च' इति सूत्रेण अदन्ताङ्गस्य एकारे प्राप्ते 'अलोऽन्त्यस्य' इति नियमात् अकारस्य एकारे 'रामे ओस्' इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'रामयोस्' इति स्थिते सकारस्य 'ससजुषोरुः' इत्यनेन रुत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गे च 'रामयोः' इति सिद्धम्।

4. **आदेशप्रत्यययोः (८.३.५९)**

आदेशप्रत्यययोः इति एकपदं वर्तते। अनेन सूत्रेण मूर्धन्यादेशः विधीयते। इण्कवर्गाभ्यां परस्याऽपदान्तास्याऽदेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात् इति सूत्रार्थः। ईषद्विवृतस्य सस्य तादृशः एव षः। रामेषु। आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ तयोः आदेशप्रत्यययोः (इतरेतर द्वन्द्वः)। अत्र आदेशस्य इत्यत्र अभेदात्मिका षष्ठी तथा प्रत्ययस्य इत्यत्र अवयवषष्ठी। अतः आदेशस्य इत्यनेन आदेशरूपसकारस्य तथा प्रत्ययस्य इत्यनेन प्रत्ययावयवस्य सकारस्य इत्यर्थः लभ्यते। ततश्च इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशरूप सकारस्य प्रत्ययावयव सकारस्य च स्थाने मूर्धन्यादेशः स्यात् इत्यर्थः।

**रामेषु**

रामशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् 'स्वौजसमौट् ......' इत्यादि सूत्रेण सप्तमीविभक्तौ बहुवचने सुप्प्रत्यये 'हलन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे च कृते 'राम सु' इति स्थिते 'बहुवचने झल्येत्' इति सूत्रेण एकारे 'रामे सु' इति जाते 'स्थानेऽन्तरतमः' इति परिभाषया मकारोत्तरवर्तिनः एकाराद् इणः परस्य सुप्प्रत्ययावयवस्य विवृताघोषप्रयत्नवतः सकारस्य स्थाने विवृतघोप्रयत्नवति मूर्धन्यादेशे षकारे रामेषु इति रूपं सिद्ध्यति।

## पुनरावृत्तिः (Recap)

- ओसि च - एत्वम्।
- ह्रस्वनद्यापो नुट् - नुडागमः।
- नामि - अङ्गस्य दीर्घः।
- आदेशप्रत्यययोः - सकारमूर्धन्यदेशः(षकारः)।
- राम इत्यस्य षष्ठीद्विवचनं - रामयोः।
- राम इत्यस्य षष्ठीबहुवचनं - रामाणाम्।
- राम इत्यस्य सप्तम्येकवचनं - रामे।
- राम इत्यस्य सप्तमीबहुवचनं - रामेषु।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. रामाणां इत्यत्र णत्वं केन सूत्रेण भवति?
2. ओसि च सूत्रेण किं विधीयते?
3. रामाणां इत्यत्र दीर्घः केन सूत्रेण भवति?

4. नामि इत्यस्य अर्थं लिखत।
5. रामेषु इत्यत्र सकारस्य षकारः कथं भवति?
6. काभ्यां परस्य सकारस्य मूर्धन्यः भवति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. ओसि च इति सूत्रस्य अर्थं लिखत।
2. रामाणाम् इत्यत्र नुडागमः कथं भवति?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सोदाहरणं सूत्राणि व्याख्यात**

1. नामि।
2. ह्रस्वनद्यापो नुट्।
3. आदेशप्रत्यययोः।

**सप्रमाणं प्रदर्शयत**

1. राम षष्ठीद्विवचनम्।
2. राम सप्तम्येकवचनम्।

## निर्दिष्टाभ्यासः (Assignments)

1. सप्रमाणं प्रक्रियां साधयत - रामयोः, रामाणां, रामेषु।
2. एतानि सूत्राणि सोदाहरणं व्याख्यात - ओसि च, नामि, आदेशप्रत्यययोः।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. अट्कुप्वाङ्नुम्व्यवायेऽपि।
2. एत्वम्।
3. नामि।
4. नामि परे अजन्तस्य अङ्गस्य दीर्घः भवति।
5. आदेशप्रत्यययोः इति सूत्रेण।
6. इण्कवर्गाभ्याम्।

## सूचनाग्रन्थाः (References)


1. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००
2. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्दप्रसादशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
3. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत-कलालयः, तृप्पूणित्तुरा, १९९३

BLOCK-2

# लघुसिद्धान्तकौमुद्याः अजन्तस्त्रीलिङ्गप्रकरणे रमाशब्दस्य निष्पत्तिः अजन्तनपुंसकलिङ्गप्रकरणे ज्ञानशब्दस्य निष्पत्तिश्च

SGOU

# Unit - 1
## अजन्तस्त्रीलिङ्गशब्दस्य प्राधान्यम्

### उद्देश्यानि (Learning Outcomes)

- कतिपयानि स्त्रीलिङ्गपदानि परिचिनोति ।
- स्त्रीलिङ्गपदानि क्रियापदैः साकं वचनानुसारं वाक्ये प्रयोक्तुं जानाति ।
- अजन्त स्त्रीलिङ्गशब्दस्य प्राधान्यं अवगच्छति ।

### प्राग्व्यपेक्षाः (Prerequisites)

भाषा आशयविनिमयाय उपयुज्यते । 'भाषा व्यक्तायां वाचि' इत्यस्मात् धातोः 'भाषा' इति पदम् । भाषायां वाक्यानि सन्ति । वाक्येषु पदानि । 'सुप्तिङन्तम्' इति सूत्रेण पाणिनिः पदसंज्ञा विधीयते । सुबन्तं तिङन्तं च पद संज्ञं स्यात् । सुप् अन्ते यस्य तत् सुबन्तम् । तिङन्तं क्रियापदजनकम् । तिङ् अन्ते यस्य तत् तिङ् । सप्त विभक्तयः । त्रयः पुरुषः । प्रथम - मध्यम - उत्तमाः चेति । प्रतिविभक्ति प्रतिपुरुषं त्रीणि वचनानि । एकवचन - द्विवचनबहुवचनानि चेति । सुबन्तानि द्विप्रकारकाः । अजन्ताः हलन्ताः चेति । अजन्तानां हलन्तानां च प्रत्येकं पुंलिङ्ग स्त्रीलिङ्ग नुंसकलिङ्गश्च सन्ति । एवं सुबन्तानि षड्विधाः ।

अजन्तपुंलिङ्गस्थाः केचन शब्दाः वयमपठाम । अजन्ते अनेकाः स्त्रीलिङ्गशब्दाः सन्ति । तेषां सर्वेषां शब्दानां पठनं ललितया रूपेण कार्यम् । तदर्थं सदृशानां कतिपयानां पठनेन इतरन् शब्दान् झटिति अवगन्तुं शक्यते । भाषां सरलतया पठनाय व्याकरणपठनं कार्यम् । व्याकरणं भाषां शुद्धीकरोति । एकस्य शब्दस्य पठनेन तत्सदृशात् अनेकान् शब्दान् तथा च तेषामर्थाः च ज्ञातुं शक्यते ।

अस्मिन्प्रकरणे कतिपयानां स्त्रीलिङ्गशब्दानां परिचयः क्रियापदैः साकं वचनानुसारं वाक्यप्रयोगः अजन्तस्त्रीलिङ्गस्य प्राधान्यं च विशदयति । तदत्र प्रविशामः ।

## मुख्यपदानि (Keywords)

लिङ्गव्यवस्था, लौकिकवन्न, त्रयः लिङ्गाः, प्रत्ययानुसारं लिङ्गनिर्णयः, कदाचित् कानिचन पदानि त्रिषु लिङ्गेषु, केषाञ्चित् स्त्रीलिङ्गे पुंलिङ्गे च, कतिपयाः नपुंसके पुंसि च, प्राधान्यं, अल्पेन यत्नेन अधिकपदलाभाः, पदस्वाधीनशक्तिः, निर्भयं भाषां प्रयोक्तुमुत्साहः।

## Discussion

प्रकृतौ पुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गवस्तूनी अनेकानि। पुरुषः, स्त्री, पाषाणं, लता, बाला, पुस्तकं, मातुलः, अध्यापकः, अध्यापिका, चषकं, वनं, काननं, देवालयः, कुटुम्बं, वासरः इत्यादीनि। संस्कृते लोके दृश्यमाना लिङ्गव्यवस्था सर्वत्र न। प्रत्ययानुसारमेव भाषायां, विशिष्य संस्कृते, लिङ्गव्यवस्था। यथा 'भार्या' इत्यर्थे पुंलिङ्गरूपं नपुंसकलिङ्गरूपमप्यस्ति। दाराः इति पुंलिङ्गे बहुवचनरूपं विकल्पेन प्रयुज्यते। 'कलत्रम्' इति नपुंसकलिङ्गपदस्यापि अर्थः 'भार्या' इत्येव।

अजन्ते हलन्तवत् पुंलिङ्ग - स्त्री - नपुंसकलिङ्गानि पदानि अनेकानि। लता, बाला, कन्या, माला, महिला, वनिता, पाठशाला, कलाशाला, सर्वकलाशाला इत्यादीनी आकारान्तस्त्रीलिङ्ग पदानि। जन्मभूमिः, भूमिः, मूर्त्तिः, पङ्क्तिः, संस्कृतिः इत्यादीनि इकारान्त पदानि। नदी, देवी, राजधानी, सखी, पुत्री, पत्नी इत्यदीनि ईकारान्तानि। धेनुः, चञ्चुः, तनुः इत्यादिनि उकारान्तस्त्रीलिङ्ग पदानि। वधू, श्वश्रू, भ्रूः, पङ्गू इत्यादीनि ऊकारान्त स्त्रीलिङ्गपदानां प्रातिकदिकानि। एवम् ओकारान्तः गोशब्दः। गौः इति प्रथमायाम्। ओकारन्तः पुंलिङ्गा शब्दमपि। तस्य बलीवर्दः इति।

भाषापठने प्रयोगविधिः नाम विधिः वर्तते। प्रयोगद्वारा भाषां सहसा स्वधीनीकर्तुं शक्यते। अतः क्रियापदैः साकं नामपदानां योजनं कार्यम्। यथा लता शोभते। बालिका पठति। कण्ठे माला शोभते। कन्यका गायति। माता पचति। पाठशालां गच्छति। व्यासस्य कृतिः भवति महाभारतम्। अस्माकं संस्कृतिः श्रेष्ठा। नदी प्रवहति। श्यामला सखी भवति। विद्यायाः देवी भवति सरस्वती। धेनुः चरति। रज्जुः अस्ति। गौः चरति।

पुनः पूर्वोक्तानां वचनानां द्विवचन - बहुवचनरूपाणि विलिख्य पठ्यते चेत् भाषायां क्रमेण व्युत्पत्तिं सम्पादयितुं शक्यते।

त्रिषु लिङ्गेषु समानतया प्रयुज्यमानौ शब्दौ भवतः युष्मदस्मदौ। यत् - तद् - एतद् - किम् इत्यादीनां शब्दानां पुंलिङ्गे स्त्रीलिङ्गे च रूपाणि सन्ति। 'यः' इति पुंलिङ्गे, 'या' इति स्त्रीलिङ्गे, 'यत्' इति नपुंसकलिङ्गे च रूपाणि सन्ति। एवं सः - सा- तद्। एषः - एषा - एतत्। अयम् - इयम् - इदम्।

कतिपयानां शब्दानां पुंलिङ्गे स्त्रीलिङ्गे च रूपाणि सन्ति। यथा अंसः अंसम्। अक्षः अक्षम्। दयः - दया। घोटः - घोटम्। आकाशः - आकाशम्। त्रणेरुः इति पदं पुलिङ्गे स्त्रियामपि। एवमेव त्रण्डुः इति पदमपि।

केचन शब्दाः लिङ्गत्रयेऽपि उपयुज्यन्ते। यथा अंसलः - अंसला - अंसलम्। अक्तः - अक्ता - अक्तम्। इज्यः इज्या - इज्यम्। चतुरश्रः - चतुरश्रा - चतुरश्रम्। तटः - तटी - तटम्।

मित्रः इति शब्दः पुंलिङ्गे सूर्यः इत्यर्थे। मित्रम् इति सुहृदर्थे। पदानि मित्राणीव भवन्ति। सुहृदः अस्मभ्यं साहाय्यकाः भवन्ति। पदानि तु सभायां साहाय्यकानि एव। साधुशब्दानां प्रयोगे धर्मः वर्तते। अतः स्थरीलिङ्गशब्दानां प्रयोगे श्रद्धा कार्या।

धातोः पदव्यवस्थामिव लिङ्गयवस्थापि आचार्याणां प्रयोगानुसारमेव निश्चीयन्ते। भाषायां येन रुपेण पदानि सन्ति तदनुकूलरीत्या एव व्याकरणप्रयोगः। भाषायै भवति व्याकरणम्। अचार्याणां पन्थान : अस्माभिः अनुसर्तव्याः। सामान्यतया घञ्, अच्, क्तिन्, क्तः, कन्, ण्वुल् इत्याद्यैः प्रत्ययैः पुंलिङ्गपदानि निष्पादितुं शक्यते। क्तिन् , इन्, इत्यादिभिः स्त्रीलिङ्गशब्दाः, ल्युट्, त्रल्, इत्यादिभिः नपुंसकलिङ्गशब्दाः निष्पद्यन्ते। किन्तु सर्वत्र अनेन रुपेणेति वक्तुं न शक्यते।

स्त्रीत्वं बोधयितुं प्रातिपदिकेन साकं स्त्रीप्रत्ययाः प्रयुज्यन्ते। शास्त्रविहिताः, अष्टौ स्त्रीप्रत्ययाः।

टाप् डाप् आप् च आकारान्तस्त्रीलिङ्गशब्दान् निष्पादयन्ति। यथा अजा लता इत्यादिः।

ङीप् ङीष् ङीन् च ईकारान्तस्त्रीलिङ्गशब्दान् निष्पादयन्ति। यथा गौरी देवी इत्याद्याः।

ऊङ् इति स्त्रीप्रत्ययः वर्तते। पङ्गूः इत्युदाहरणाम्। तिः इति स्त्रीप्रत्ययेन युवतिः इति पदं निष्पाद्यते।

अजन्त स्त्रीलिङ्गस्य प्राधान्यं किमिति प्रश्नः। पदानि सुबन्तानि तिङन्तानि अव्ययानि च। द्विशतमानपदानि अव्ययत्वेन परिगणितुं शक्यते। सुबन्तानि तु पञ्चाशच्छतमानं भवेयुः। तिङन्तानि तु अष्टचत्वारिंशच्छतमानं भवितुं अर्हन्ति। तेषु पदेषु न्यूनाधिन्यूनं विंशतिशतमानं अजन्तस्त्रीलिङ्गपदानि भवन्ति।

स्त्रीलिङ्गशब्दरूपेषु प्रथमानां कतिपयानां शब्दानां निष्पत्तिज्ञानेन संस्कृते सामान्यव्युत्पत्तिं सम्पादयितुं शक्यते। कवित्वरचनायां प्रबन्धरचनायां सः प्रवीणः भविष्यति। विज्ञानसागरं तर्त्तुं व्याकरणपठनं अवश्यं कार्यम्। तदर्थं स्त्रीलिङ्गशब्दानां निष्पत्तिज्ञानं साहाय्यक भवेत्।

## पुनरावृत्तिः (Recap)

- भाषा आशयविनिमायाय भाषायां वाक्यानि वाक्येषु पदानि च सन्ति।
- अजन्तपुंलिङ्गे यानि शब्दरूपाणि सन्ति, तावत्पर्यन्तं अजन्तस्त्रीलिङ्गशब्दरूपाणि शब्दाः सन्ति।
- लोके इव संस्कृतभाषायां लिङ्गव्यवस्था पुंलिङ्ग- स्त्रीलिङ्ग - नपुंसकलिङ्गानुसारेण न भवन्ति। प्रत्ययानुसारमेव लिङ्गव्यवस्था। भाषायाः प्रयोगानुसारं लिङ्गनिर्णयः कार्यः।
- त्रिषु लिङ्गेषु समानौ युष्मदस्मच्छब्दौ वर्तेते।
- केचन शब्दाः लिङ्गत्रये प्रयुज्यन्ते।
- धातोः पदव्यवस्थामिव लिङ्गव्यवस्थापि आचार्याणां प्रायोगानुसारं निर्णायति।
- समस्तेषु पदेषु पञ्चाशच्छतमानं पदानि सुबन्तानि भवन्ति। तेषु न्यूनाधिन्यूनं विंशतिशतमानं स्त्रीलिङ्गपदानि भवेयुः।
- स्त्रीलिङ्गशब्दानां रूपनिष्पत्तिपठनेन व्युत्पत्तिमत्वं सम्पादयितुं शक्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अष्टौ स्त्रीप्रत्ययाः के?
2. क्तिन् कः लिङ्गः आयाति ?
3. सर्वेषु लिङ्गेषु समानरूपेण वर्तमानौ शब्दौ कौ ?
4. द्विविधाः स्त्रीलिङ्गशब्दाः के?
5. लता बाला अध्यापिका इत्यादीनां पदानां लिङ्गः कः?
6. यत् शब्दस्य पुलिङ्ग - स्त्रीलिङ्ग नपुंसकलिङ्गे प्रथमैकवचने रूपाणि कानि ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. कतिपयानि आकारान्तस्त्रीलिङ्गरूपाणि लिखत।
2. त्रीणि इकारान्तस्त्रीलिङ्गरुपाणि लिखत।

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. त्रिप्रकाराः स्त्रीलिङ्गशब्दाः के ?
2. संस्कृते लिङ्गव्यवस्था कीदृशी ?

## निर्दिष्टाभ्यासः (Assignments)

1. पुंलिङ्गे स्त्रीलिङ्गे नपुंसकलिङ्गे च वर्तमानानि कतिपयान् शब्दान् निर्दिश्य तेषां रूपाणि लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति।
2. स्त्रीलिङ्गः।
3. युष्मदस्मदौ
4. अजन्तस्त्रीलिङ्गशब्दाः, हलन्तस्त्रीलिङ्गशब्दाः।
5. स्त्रीलिङ्गः।
6. पुंलिङ्गे यः , स्त्रीलिङ्गे या, नपुंसकलिङ्गे यत्।

## सूचनाग्रन्थाः (References)


1. वाक्यतत्त्वम् । पण्डितः एस् अनन्तनारायणशास्त्री, मलयालपरिभाषा जि विश्वनाथशर्मा, संस्कृतमहाविद्यालयः तृप्पूणित्तुरा १९९८
2. लघुसिद्धान्तकौमुदी ।प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३


SGOU

# Unit - 2
## 'औङ आपः' इति सूत्रादारभ्य 'याडापः' सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- अजन्तस्त्रीलिङ्गशब्दरूपाणां प्रक्रियाम् अवगच्छति।
- अजन्तस्त्रीलिङ्गपदानि ज्ञात्वा तेषां प्रयोगमपि कर्त्तुं प्रभवति।
- अजन्तस्त्रीलिङ्गपदस्य रमाशब्दस्य रूपनिष्पत्तिं जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

गतैकके अस्माभिः अजन्तस्त्रीलिङ्गशब्दानां वैशिष्ट्यं किमिति ज्ञातम्। स्त्रीलिङ्गवाचकशब्दाः द्विधा विभक्ताः। केचन शब्दाः पुंलिङ्गे विद्यन्ते। तेषु एव स्त्रीत्वविवक्षायै स्त्रीलिङ्गप्रत्ययाः प्रयुज्यन्ते। ते टाबादयः भवन्ति। यथा रमा, सर्वा इत्यादयः। केचन शब्दः स्वतः एव स्त्रीलिङ्गवाचकाः, येषु कोऽपि विशेषप्रत्ययः न प्रयुज्यते। यथा लक्ष्मीः श्रीः मतिः इत्यादयः। स्त्रीलिङ्गबाचकशब्दानां रूपाणि कथं भवन्ति इति विचाराय इदं एककं साहाय्यति।

### मुख्यपदानि (Keywords)

शी, आबन्तः, एकारः, याट्, आपः

### Discussion

#### रमाशब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |

| | | | |
|---|---|---|---|
| **सम्बोधनप्रथमा** | हे रमे | हे रमे | हे रमाः |
| **द्वितीया** | रमाम् | रमे | रमाः |
| **तृतीया** | रमया | रमाभ्याम् | रमाभिः |
| **चतुर्थी** | रमायै | रमाभ्याम् | रमाभ्यः |
| **पञ्चमी** | रमायाः | रमाभ्याम् | रमाभ्यः |
| **षष्ठी** | रमायाः | रमयोः | रमाणाम् |
| **सप्तमी** | रमायाम् | रमयोः | रमासु |

### 1. औङ आपः (७.१.१८)

औङ आपः इति पदच्छेदः। अनेन शी विधीयते। आबन्तादङ्गात् परस्य औङः शी स्यात्। एवम् आबन्तात् अङ्गात् परस्य औङः शी स्यात् इति सूत्रार्थः। यथा - रमे। रमाशब्दात् शीभावे रमा ई। गुणे रमे।

### रमा

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां 'स्वौजसमौट्' इत्यादि सूत्रेण 'रमा सु' इति जाते 'उपदेशेऽजनुनासिक इत्' इत्यनेन उकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण तस्य लोपे 'रमा स्'। अत्र सु प्रत्ययः अनुबन्धविनिर्मुक्तः एकाल् भवति। अतः 'अपृक्त एकाल्प्रत्ययः' इति सु इत्यस्य सकारस्य अपृक्तसंज्ञायां 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सुलोपे 'रमा' इति भवति।

### रमे

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् प्रथमाद्विवचनविवक्षायां 'स्वौजसमौट्......' इत्यादि सूत्रेण औप्रत्यये 'रमा औ' इति जाते 'वृद्धिरेचि' इति सूत्रेण वृद्धिः प्राप्ते तं प्रबाध्य 'औङ आपः' इति सूत्रेण अङ्गसंज्ञकात् आबन्तात् रमाशब्दात्परस्य 'औङः' स्थाने अनेकाल्त्वात् 'शी' इति सर्वादेशे 'रमा शी'। ततः स्थानिवद्भावेन प्रत्ययत्वात् 'लशक्वतद्धिते' इत्यनेन शस्य इत्संज्ञायां 'तस्य लोपः' इति लोपे 'रमा ई'। 'आद्गुणः' इति सूत्रेण पूर्वपरयोः आकारेकारयोः स्थाने गुणे एकारे 'रमे' इति रूपं सिद्ध्यति।

**रमाः -**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण प्रातिपदिकत्वात् प्रथमा बहुवचने ‘स्वौजसमौट्....’ इत्यादि सूत्रेण जसि ‘रमा जस्’ इति जाते 'चुटू' इति जकारस्य इत्संज्ञायां 'तस्य लोपः' इति लोपे 'रमा अस्' इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते ‘दीर्घाज्जसि च’ इति सूत्रेण तं बाधित्वा ‘अकः सवर्णे दीर्घः’ इत्यनेन सवर्णदीर्घे रमास्। सकारस्य रुत्वे विसर्गे च ‘रमाः' इति सिद्धम्।

**2. सम्बुद्धौ च (७.३.१०६)**

सम्बुद्धौ च इति पदच्छेदः। अनेन एत्वं विधीयते। आप एकारः स्यात् सम्बुद्धौ इति सूत्रार्थः। हे रमे। ‘एङ्ह्रस्वात्सम्बुद्धेः’ इति लोपे हे रमे। रमाशब्दात् संबोधनप्रथमायाम् एकवचने ‘सम्बुद्धौ च’ इति एत्वे हे रमे सु।

**हे रमे**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण सम्बोधनप्रथमैकवचने ‘स्वौजसमौट्.....’ इत्यादि सूत्रेण सुप्रत्यये ‘हे रमा सु' इति जाते सुप्रत्ययस्य ‘एकवचनं सम्बुद्धिः' इति सम्बुद्धिसंज्ञायां ‘अलोऽन्त्यस्य’ इति परिभाषया आबन्तस्य अन्त्यस्य अलः आकारस्य एकारादेशे ‘हे रमे स्’। ततः ‘एङ्ह्रस्वात्सम्बुद्धेः’ इत्यनेन सूत्रेण एङः परस्य सम्बुद्धिलोपे ‘हे रमे’ इति रूपं सिद्ध्यति।

**हे रमे**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण सम्बोधनप्रथमाद्विवचने ‘स्वौजसमौट्....’ इत्यादि सूत्रेण औप्रत्यये ‘हे रमा औ' इति जाते 'औङ आपः’ इति सूत्रेण ‘शी’ आदेशे अनुबन्धलोपे ‘हे रमा ई’। ततः ‘आद्गुणः’ इति सूत्रेण गुणे एकारादेशे ‘हे रमे’ इति रूपं सिद्ध्यति।

**हे रमाः**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् सम्बोधनप्रथमाबहुवचने 'स्वौजसमौट्.....' इत्यादि सूत्रेण जसि 'हे रमा जस्' अनुबन्धलोपे 'हे रमा अस्' । सवर्णदीर्घे रुत्वे विसर्गे च कृते 'हे रमाः' इति रूपम् ।

**रमाम्**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् द्वितीया-एकवचने 'स्वौजसमौट्.....' इत्यादि सूत्रेण 'अम्' प्रत्यये ' रमा अम्' इति स्थिते 'अकः सवर्णेदीर्घः' इत्यनेन दीर्घे प्राप्ते तं प्रबाध्य 'अमि पूर्वः' इत्यनेन पूर्वरूपे 'रमाम्' इति रूपम् ।

**रमे**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् द्वितीयाद्विवचने 'स्वौजसमौट्.....' इत्यादि सूत्रेण 'औट्' प्रत्यये अनुबन्धलोपे औङः श्यादेशे अनुबन्धलोपे 'रमा ई' । 'आद्गुणः' इति सूत्रेण गुणे एकारे 'रमे' इति रूपम् ।

**रमाः**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् द्वितीयाबहुवचने 'स्वौजसमौट्.....' इत्यादि सूत्रेण जस्प्रत्यये अनुबन्धलोपे 'रमा अस्' इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे रुत्वे विसर्गे च कृते 'रमाः' इति रूपम् ।

**3. आङि चापः (७.३.१०५)**

आङि च आपः इति पदच्छेधदः। अनेन एत्वं विधीयते। आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात् इति सूत्रार्थः। रमया। एत् ओसि अङ्गस्य इति अनुवर्तन्ते। 'आपः' इति षष्ठी। तेन च तदन्तविधिः। आपः तदन्तविधिना आबन्तस्य अङ्गस्य इत्यर्थः। एवम् आङि ओसि च परे आपः (आबन्तस्य अङ्गस्य) एकारः स्यात् इति सूत्रार्थः। यथा रमया।

**रमया**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् तृतीयैकवचने 'स्वौजसमौट्....' इत्यादि सूत्रेण टाप्रत्यये 'रमा टा' इति जाते अनुबन्धलोपे 'रमा अ'। अत्र रमाशब्दः आबन्तः अतः 'आङि चापः' इति आकारस्य एकारे 'रमे आ' इति स्थिते 'एचोऽयवायावः' इति अयादेशे 'रम् अय् आ'। संयोगे 'रमया' इति सिद्धम्।

**रमाभ्याम्**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् तृतीयाद्विवचने 'स्वौजसमौट्' इत्यादि सूत्रेण भ्याम्प्रत्यये 'रमा भ्याम्' संयोगे 'रमाभ्याम्' इति रूपम्।

**रमाभिः**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् तृतीयाबहुवचने 'स्वौजसमौट्......' इत्यादि सूत्रेण भिस्प्रत्यये 'रमा भिस्'। सकारस्य रुत्वे विसर्गे च कृते 'रमाभिः' इति रूपम्।

**4. याडापः (७.३.११३)**

याट् आपः इति पदच्छेदः। अनेन याडागमः विधीयते। 'आपः' इति पञ्चमी। ङिति इति अनुवृत्तं षष्ठ्या विपरिणम्यते ङित इति। एवम् आपः (आबन्तादङ्गात् परस्य) ङितः याट् स्यात् इति सूत्रार्थः। याट् इत्यस्य टकारस्य इत्। यथा रमायै।

**रमायै**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् चतुर्थ्यैकवचने 'स्वौजसमौट्....' इत्यादि सूत्रेण ङेप्रत्यये अनुबन्धलोपे 'रमा ए' इति स्थिते वृद्धौ प्राप्ते तं प्रबाध्य ङेप्रत्ययस्य ङित्वात् 'याडापः' इत्यनेन याडागमे अनुबन्धलोपे 'रमा या ए' इति। ततः वृद्धिरेचि इति सूत्रेण वृद्धौ ऐकारे 'रमायै' इति रूपम्।

**रमाभ्याम्**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण प्रातिपदिकत्वात् चतुर्थीद्विवचने ‘स्वौजसमौट्.....’ इत्यादि सूत्रेण भ्याम्प्रत्यये ‘रमा भ्याम्' संयोगे ‘रमाभ्याम्’ इति रूपम्।

**रमाभ्यः**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण प्रातिपदिकत्वात् चतुर्थीबहुवचने ‘स्वौजसमौट्...’ इत्यादि सूत्रेण भ्यस्प्रत्यये ‘रमा भ्यस्'। संयोगे सकारस्य रुत्वे च कृते ‘रमाभ्यः’ इति रूपम्।

**रमायाः**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण प्रातिपदिकत्वात् पञ्चम्येकवचने ‘स्वौजसमौट्....’ इत्यादि सूत्रेण ङसिप्रत्यये अनुबन्धलोपे ‘रमा अस्’ इति जाते 'याडापः' इत्यनेन याडागमे अनुबन्धलोपे 'रमा या अस्' इति जाते सवर्णदीर्घे सस्य रुत्वे विसर्गे च ‘रमायाः’ इति पदं सिद्धम्।

**रमाभ्याम्**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण प्रातिपदिकत्वात् पञ्चमीद्विवचने ‘स्वौजसमौट्.....’ इत्यादि सूत्रेण भ्याम्प्रत्यये ‘रमा भ्याम्'। संयोगे ‘रमाभ्याम्’ इति रूपम्।

**रमाभ्यः**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण प्रातिपदिकत्वात् पञ्चमीबहुवचने ‘स्वौजसमौट्..’ इत्यादि सूत्रेण भ्यस्प्रत्यये ‘रमा भ्यस्'। संयोगे सकारस्य रुत्वे च कृते ‘रमाभ्यः’ इति रूपम्।

**रमायाः**

रमाशब्दात् ‘ङ्याप्प्रातिपदिकात्’ इति सूत्रेण प्रातिपदिकत्वात् षष्ठ्येकवचने ‘स्वौजसमौट्......’ इत्यादि सूत्रेण ङस्प्रत्यये अनुबन्धलोपे ‘रमा अस्’ इति जाते 'याडापः' इत्यनेन याडागमे अनुबन्धलोपे 'रमा या अस्' इति जाते सवर्णदीर्घे सस्य रुत्वे विसर्गे च ‘रमायाः’ इति पदं सिद्धम्।

**रमयोः**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् षष्ठीद्विवचने 'स्वौजसमौट्….' इत्यादि सूत्रेण ओस्प्रत्यये 'आङि चापः' इति आकारस्य एत्वे 'रमे ओस्' इति जाते 'एचोऽयवायावः' इति अयादेशे सकारस्य रुत्वे विसर्गे च 'रमयोः' इति सिद्धम्।

**रमाणाम्**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् षष्ठीबहुवचने 'स्वौजसमौट्…' इत्यादि सूत्रेण आम्प्रत्यये 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमे अनुबन्धलोपे 'रमा न् आम्' इति जाते 'नामि' इत्यनेन दीर्घे नकारस्य णत्वे च कृते 'रमाणाम्' इति सिद्धम्।

**रमायाम्**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् सप्तम्येकवचने 'स्वौजसमौट्….' इत्यादि सूत्रेण ङिप्रत्यये 'ङेराम्नद्याम्नीभ्यः' इति सूत्रेण ङेः सर्वादेशे आमि 'रमा आम्' इति। ततः स्थानिवद्भावात् ङितः 'याडापः' इत्यनेन 'याडागमे' अनुबन्धलोपे 'रमा या आम्' इति स्थिते सवर्णदीर्घे 'रमायाम्' इति सिद्धम्।

**रमयोः**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् सप्तमीद्विवचने 'स्वौजसमौट्….' इत्यादि सूत्रेण ओस्प्रत्यये 'आङि चापः' इति आकारस्य एत्वे 'रमे ओस्' इति जाते 'एचोऽयवायावः' इति अयादेशे सकारस्य रुत्वे विसर्गे च 'रमयोः' इति सिद्धम्।

**रमासु**

रमाशब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण प्रातिपदिकत्वात् सप्तमीबहुनवचने 'स्वौजसमौट्…..' इत्यादि सूत्रेण सुप्प्रत्यये अनुबन्धलोपे 'रमा सु'। संयोगे 'रमासु' इति रुपम्।

## पुनरावृत्तिः (Recap)

- हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इत्यनेन अपृक्तं हल् लुप्यते।
- औङ आपः इत्यनेन शी विधीयते।
- सम्बुद्धौ च इत्यनेन एत्वं विधीयते।
- आङि चापः इति सूत्रेण आबन्तस्य अङ्गस्य एकारः।
- याडापः इति सूत्रेण याडागमः विधीयते।
- ङेराम्नद्याम्नीभ्यः इति सूत्रेण ङेः आम् भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. रमा + औ इति स्थिते केन सूत्रेण शी विधीयते?
2. सम्बुद्धौ च इत्यनेन सूत्रेण किं विधीयते?
3. रमायै इत्यत्र याडागमः केन सूत्रेण भवति?
4. रमा + ङे इत्यत्र आमादेशः केन सूत्रेण भवति?
5. रमा + सु इत्यत्र स् लोपः केन सूत्रेण सिद्धम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. औङः आपः इति सूत्रस्य अर्थं लिखत।
2. सम्बुद्धौ च इति सूत्रस्य अर्थं लिखत।
3. आङि चापः इति सूत्रस्य अर्थं लिखत।
4. याडापः इति सूत्रस्य अर्थं लिखत।

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्राणि व्याख्यात**

1. सम्बुद्धौ च ।
2. आङि चापः ।
3. याडापः ।

## निर्दिष्टाभ्यासः (Assignments)

प्रदत्तानि रूपाणि ससूत्रं साधयत - रमा, रमायै, रमायाम्

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. औङ् आपः ।
2. एकारः ।
3. याडापः ।
4. ङेराम्नद्याम्नीभ्यः ।
5. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ।

## सूचनाग्रन्थाः (References)


1. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १००० 
2. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्दप्रसादशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
3. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३

# Unit - 3
## अजन्तनपुंसकलिङ्गस्य प्राधान्यम्

### उद्देश्यानि (Learning Outcomes)

- अजन्तनपुंसकलिङ्गशब्दान् परिचाययति।
- अजन्तनपुंसकलिङ्गस्य प्राधान्यम् अवगच्छति।
- नपुंसकलिङ्गशब्दानां रुपाणां च विशेषतां जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

लिङ्गाः त्रयः भवन्ति। पुंलिङ्गः स्त्रीलिङ्गः नपुंसकलिङ्गः चेति। तेषु पुंलिङ्गशब्दानां रुपनिष्पत्तिः सहकारकसूत्राणि च अस्माभिः अधीतानि। तदनन्तरं गतैकके अजन्तस्त्रीलिङ्गस्य प्राधान्यं, अजन्तस्त्रीलिङ्गशब्दानां रूपनिष्पत्तिः तत्र सहकारकसूत्राणि च कथमिति ज्ञातम्। इदानीं अस्मिन् एकके अजन्तनपुंसकलिङ्गस्य प्राधान्यं किमिति पश्यामः।

### मुख्यपदानि (Keywords)

नपुंसको भवतीति, लिङ्गत्वं, तुल्यरूपेणावस्थानात् नपुंकत्वम्।

### Discussion

'नपुंसको भवतीति' महाभाष्यप्रयोगात् अस्य पुंस्त्वमपि। लिङ्गस्य शब्दगतत्वेऽपि शब्दार्थे तद्व्यवहारस्तु अभेदारोपात् तदेतच्छब्दार्थरत्नेऽस्माभिः समर्थितं यथा 'लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मकोधर्म एव तद्विशेषश्चपुंनपुंसकत्वादिः'। तथा हि सर्वेषां त्रिगुणप्रकृतिकार्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु विशेष इति कल्प्यते। स च विशेषः शास्त्रे इत्थमभ्यधायि। विकृतसत्वादीनां

तुल्यरूपेणावस्थानात् नपुंसकत्वं, सत्वस्याधिक्ये पुंस्त्वम्, रजसः आधिक्ये स्त्रीत्वमिति। एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपात् असति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्वत्र तस्य विशेषणत्वम्। शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्यनामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् 'नसोऽस्ति प्रत्ययोलोके यः शब्दानुगमादृते हर्य्युक्तेः' इति।

'शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा। नोचेत्श्रोत्रादिभिः सिद्धोऽप्यसावर्थऽवभासते' इति। शब्दानां तदर्थतावगतेः। तथा प्रातिपदिकार्थः। अभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थ प्रकारतया भासते इति तदर्थः। युक्तञ्चैतत् पुंलिङ्गः शब्दः इति व्यवहारात् 'स्वमोर्नपुंसकादिति' पा० सूत्रेशब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयवाधाच्च लिङ्गस्य शब्दधर्मत्वमन्यथैतेषु लिङ्गानन्वयापत्तेर्व्यवहारसूत्रनिर्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्मविशेषरूपभेदकसद्भावात्। उक्तञ्च भाष्ये 'एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमिति'। एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानापूर्वीकत्वेनैव। वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्। अर्थरूपनंपुसकस्योत्पत्तौ कारणं उक्तं यथा "विन्दुरेको विशेद्गर्भमुभयात्मा क्रमादसौ। रजोऽधिको भवेन्नारी भवेद्रेतोऽधिकः पुमान्। उभयोः समतायां तु नपुंसकमितिस्मृतम्। 'सुडनपुंसकस्य' पा० 'नपुंसकमनपुंसकेनेत्यादि' पा०। तत्र पुंसि 'नैव स्त्री न पुमानेष न चैवायं नपुंसकः' श्वेताश्व०। क्लीवे 'न वामनाः कुब्जकुणा नखञ्जाः नान्धो जडः स्त्री न नपुंसकञ्च' भा० शा०।

संस्कृतभाषायां लिङ्गं शब्दाधारितं भवति न तु लौकिकलिङ्गाधारितम्। यथा मित्रं इति शब्दः नपुंसकलिङ्गैव प्रयोगः भवति। एवमेव पत्नी इत्यर्थे तथापि कलत्रं इति नपुंसकलिङ्गेऽपि शब्दः भवति। दाराः इत्यपि पुंलिङ्गे शब्दः अस्ति। शिला माला इत्यादीनां अचेतनवस्तूनामपि स्त्रीलिङ्गत्वं भवति। एवञ्च शब्दस्य किं लिङ्गं इत्येव अस्माभिः ज्ञातव्यं भवति, न तु अर्थमाश्रित्य लिङ्गनिर्णयः शक्यते। अपि च लिङ्गनिर्णयः प्रायेण व्याकरणात् बाह्यं भवति। यथा सन्धिसूत्राणि, रुपनिष्पत्यर्थसूत्राणि च सन्ति। तथा अस्य शब्दस्य इदमेव लिङ्गं भवेत् इति वक्तुं सूत्राणि न जानन्ति। यद्यपि लिङ्गानुशासनं इति कश्चन भागः विद्यते व्याकरणस्य अष्ठाध्यायाः सहायकरूपेण यथा धातुपाठः गणपाठः इत्यादिभिः। एवमेव लिङ्गानुशासनं इत्यस्ति तत्र कानिचन सूत्राणि यैः केचन सामान्यनियमाः उच्यन्ते। तथापि सर्वेषां शब्दानां लिङ्गनिर्णयः किमर्थं अयं शब्दः पुंलिङ्गे एव प्रयुज्यते, किमर्थं अयं शब्दः स्त्रीलिङ्गे इत्यस्य उत्तरं नास्ति। तत्र प्रयोगः एव प्रमाणं भवति।

तत्र नपुंसकलिङ्गप्रत्ययान्तशब्दाः सन्ति। नपुंसके भावे क्तः इति सूत्रेण भावार्थके क्तप्रत्यायान्तशब्दाः नपुंसके एव भवन्ति। यथा - गतं, शयितं, हसितम्। ल्युट् च इति सूत्रेण भावार्थके ल्युट् प्रत्ययान्तशब्दोऽपि नपुंसकलिङ्गे भवति। यथा - हसनम्, शयनम् इत्यादिः।

नपुंसकलिङ्गशब्दानां अधिकः भेदः नास्ति। नपुंसकलिङ्गशब्दानां इदं वैशिष्टं यत् प्रथमाद्वितीययोः विभक्त्योः समानरूपाणि भवन्ति। किञ्च तृतीयादिषु विभक्तिषु प्रायः पुंलिङ्गवत् रूपाणि भवन्ति। नपुंसकलिङ्गे विद्यमानानां शब्दानां पुंलिङ्गशब्देभ्यः येषु स्थलेषु विशेषता वर्तते।

मनः तपः इत्यादि सकारान्तनपुंसकलिङ्गशब्दानां एकवचनं प्रथमदृष्ट्या अकारान्तपुंलिङ्गः एकवचनं इव प्रतीयते। परन्तु मनस्, तपस् इत्यादि शब्दानां सकारस्य विसर्गो भवति। अतः मनः तपः इत्यादि रूपाणि। प्रकरणं, अन्यपदबन्धः इत्यतः एषां शब्दानां भेदः ज्ञायते।

भाषायां व्यवहराय पदानां रूपाणि सम्यक् पठन्ति चेत् पदस्वाधीनता वर्धते। पदानि मित्राणि भवन्ति। आपदि मित्राणां साहाय्यम् आवश्यकं खलु। सदसि पदानां साहाय्यं महदेव। अकारान्तनपुंसकलिङ्गशब्दानां पठनेन संस्कृते वर्तमानेषु पदेषु दश शतमानं पदं ज्ञातुं शक्यते। एवम् अनेकानि प्रयोजनानि सन्तीत्यतः ज्ञानादिशब्दानां पठनाय सन्नद्धाः भवन्तु।

## पुनरावृत्तिः (Recap)

- संस्कृतभाषायां लिङ्गं शब्दगतं भवति, लौकिकलिङ्गानुसारं न भवति।
- शब्दस्य लिङ्गं तदर्थस्य अभेदनिमित्तं भवति, अतः शब्दार्थयोः संबंधः घनिष्ठः अस्ति।
- सत्त्व, रजस्, तमस् गुणानां विकारात् पुंस्त्वं, स्त्रीत्वं, नपुंसकत्वस्य कारणं शास्त्रेषु उक्तं अस्ति।
- शब्दानां लिङ्गनिर्णयः व्याकरणसूत्रैः सर्वत्र संभवः न, प्रयोगः एव मुख्यप्रमाणं।
- क्तः तथा ल्युट् प्रत्ययान्तः शब्दाः सामान्यतः नपुंसकलिङ्गे प्रयोगं कुर्वन्ति।
- पुंलिङ्ग, स्त्रीलिङ्ग, नपुंसकलिङ्ग इत्येतदनुसारं शब्देषु भेदः दृश्यते।
- नपुंसकलिङ्गशब्दानां प्रथमाद्वितीययोः समानरूपाणि, तृतीयादिषु पुंलिङ्गवत् रूपाणि भवन्ति।
- शब्देन सह अर्थस्य अभेदविवक्षा श्रोत्रादिभिः सिद्धा।

- लिङ्गनिर्णयाय व्याकरणे लिङ्गानुशासनं नामक भागः अस्ति।
- मित्रं, दाराः, माला इत्यादिशब्देषु लिङ्गं अर्थानुसारं न, किन्तु शब्दगतं निश्चितं भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. लिङ्गं संस्कृतभाषायां किमाश्रितम्?
2. 'नपुंसके भावे क्तः' सूत्रेण कः प्रत्ययः नपुंसकलिङ्गे भवति?
3. 'दाराः' शब्दः कस्य लिङ्गे प्रयुक्तः?
4. लिङ्गस्य मुख्यनिर्णायकघटकः कः?
5. नपुंसकलिङ्गे प्रथमाद्वितीययोः विभक्त्योः रूपं कीदृशं भवति?
6. ल्युट् प्रत्ययः नपुंसकलिङ्गे कस्य अर्थे प्रयुक्तः?
7. "मित्रं" शब्दः कस्य लिङ्गे भवति?
8. कासु कासु विभक्तिषु नपुंसकलिङ्गशब्दाः प्रायः पुंलिङ्गवत् भवन्ति?
9. शब्दलिङ्गभेदस्य कारणं किम्?
10. व्याकरणे लिङ्गनिर्णयाय कः विभागः अस्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. नपुंसकलिङ्गे कयोः विभक्तयोः पुंलिंगवत् भवन्ति?
2. प्रथमान् इव द्वितीयाविभक्तिः कस्मिन् लिंङ्गे?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

नपुंसकलिङ्गशब्दानां विशेषताः काः?

## निर्दिष्टाभ्यासः (Assignments)

नपुंसकलिङ्गशब्दानां वैशिष्ट्यम् प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. शब्दः।
2. क्त।
3. पुंलिङ्गे।
4. प्रयोगः।
5. समानम्।
6. भावः।
7. नपुंसकलिङ्गे।
8. तृतीयादिषु।
9. अर्थभेदः।
10. लिङ्गानुशासनं।

## सूचनाग्रन्थौ (References)


1. वाक्यतत्त्वम्। पण्डितः एस् अनन्तनारायणशास्त्री, मलयालपरिभाषा जि विश्वनाथशर्मा, संस्कृतमहाविद्यालयः तृप्पुणित्तुरा १९९८।
2. लघुसिद्धान्तकौमुदी।प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३

# Unit - 4

## ‘अतोऽम्’ सूत्रात् आरभ्य ‘मिदचोऽन्त्यात्परः’ इति सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- अजन्तनपुंसकलिङ्गशब्दरूपाणं प्रक्रियां साधयितुं क्षमता।
- अजन्तनपुंसकलिङ्गशब्दान् ज्ञात्वा वाक्येषु तेषां प्रयोगं कर्तुं शक्नुमः।
- सूत्राणि व्याख्यातुं जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

गतैकके अजन्तनपुंसकलिङ्गशब्दस्य प्राधान्यं अधीतम्। सम्प्रति अस्मिन् एकके वयं अजन्तनपुंसकलिङ्गशब्दानां रूपाणां प्रक्रियान् कथं सिद्ध्यन्ति, तेषां सहायकसूत्राणां अर्थान् च पठामः।

### मुख्यपदानि (Keywords)

स्वमोः, अम्, क्लीबाद्, शी, औङः, भस्य, इवर्णावर्णयोः, श्यां, जस्शसोः, सर्वनामस्थानं, नुम्, मित्।

### Discussion

**ज्ञानशब्दस्य रूपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | ज्ञानम् | ज्ञाने | ज्ञानानि |
| **सम्बोधनप्रथमा** | हे ज्ञान | हे ज्ञाने | हे ज्ञानानि |
| **द्वितीया** | ज्ञानम् | ज्ञाने | ज्ञानानि |

| | | | |
|---|---|---|---|
| **तृतीया** | ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| **चतुर्थी** | ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| **पञ्चमी** | ज्ञानात् | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| **षष्ठी** | ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| **सप्तमी** | ज्ञाने | ज्ञानयोः | ज्ञानेषु |

**1. अतोऽम् (७.१.२४)**

अतः अम् इति पदच्छेदः। अतोऽङ्गात् क्लीबात् स्वमोरम् इति सूत्रार्थः। अनेन सूत्रेण अम् विधीयते। अत्र अतः इति पञ्चमी। अङ्गस्य इत्यधिकृतं पञ्चम्या विपरिणम्यते। तेन तदन्तविधिः। स्वमोर्नपुंसकात् इत्यनुवर्तते। ह्रस्वाकारान्तात् नपुंसकात् अङ्गात् स्वमोः अमादेशः भवति इति सूत्रार्थः लभ्यते। यथा ज्ञानम्।

**ज्ञानम् -**

ज्ञा अवबोधने इति धातोः भावे ल्युटि अनुबन्धलोपे ज्ञा यु। 'युवोरनाकौ' इत्यनेन अनादेशे ज्ञान इति शब्दः निष्पाद्यते। ज्ञानशब्दः कृदन्तः भवति। अतः ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्....' इत्यादि सूत्रेण प्रथमैकवचनविवक्षायां सुप्रत्यये 'ज्ञान स्'। 'स्वमोर्नपुंसकात्' इति सोर्लुकि प्राप्ते तं बाधित्वा 'अतोऽम्' इति अमि 'ज्ञान अम्'। 'अमिपूर्वः' इति पूर्वरूपे 'ज्ञानम्' इति सिद्धम्।

**2. नपुंसकाच्च (७.१.१९)**

नपुंसकात् च इति पदच्छेदः। अनेन सूत्रेण शी विधीयते। क्लीबाद् औङः शी स्यात् इति सूत्रार्थः। नपुंसकात् इति पञ्चम्येकवचनान्तम्। च इति अव्ययपदम्। अत्र 'शी' औङ्' इति, च अनुवर्तते। औकारविभक्तेः संज्ञा इति। अस्य सूत्रस्य अर्थो भवति नपुंसकात् अङ्गात् परस्य औङ्प्रत्ययस्य शी इत्यादेशो भवति। यथा ज्ञाने। ज्ञान औ इत्यवस्थायाम् अनेन सूत्रेण शीभावे अनुबन्धलोपे 'आद्गुणः' इति गुणे ज्ञाने।

**3. यस्येति च (६.४.१८४)**

यस्य इति च इति पदच्छेदः। अनेन सूत्रेण अवर्णस्य लोपः विधीयते। ईकारे तद्धिते च परे भस्य इवर्णावर्णयोः लोपः स्यात् इति सूत्रार्थः। यथा ज्ञान औ इत्यत्र 'नपुंसकाच्च' इति शीभावे अनुबन्धलोपे ज्ञान ई। अत्र 'यस्येति च' इति अकारस्य लेपप्रसक्तिः।

### 4. औङः श्यां प्रतिषेधो वाच्यः (वार्तिकम्)

औङः श्यां प्रतिषेधः वाच्यः इति चतुष्पदं वार्तिकम्। औङः यः 'शी'आदेशः तस्मिन् परतः यस्येति च इति लोपस्य प्रतिषेधः वक्तव्यः इति वार्तिकार्थः। यथा ज्ञाने। ज्ञान ई इत्यत्र यस्येति च इत्यनेन प्राप्तस्य अकारलोपस्य प्रस्तुतवार्तिकेन निषेधे सति 'आद्गुणः' इत्यनेन गुणे एकारे च 'ज्ञाने' इति सिद्ध्यति।

**ज्ञाने -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्.....' इत्यादि सूत्रेण प्रथमा-द्विवचनविवक्षायां औप्रत्यये 'ज्ञान औ' इति। 'नपुंसकाच्च' इति श्यादेशे ज्ञानेत्यस्य यचि भम् इत्यनेन ज्ञानशब्दस्य भसंज्ञायाम् 'यस्येति च' इत्यकारलोपे प्राप्ते 'औङः श्यां प्रतिषेधो वाच्यः' इति निषेधे 'आद्गुणः' इति गुणे ज्ञाने इति सिद्धम्।

### 5. जश्शसोः शिः (७.१.२०)

जस्शसोः  शिः इति पदच्छेदः। अनेन सूत्रेण शिः विधीयते। क्लीबाद् अनयोः जश्शसोः शिः स्यात् इति सूत्रार्थः। जश्च शश्च जश्शसौ तयोः जश्शसोः। यथा ज्ञान जस् इत्यत्र जश्शसोः शिः इति शीभावे ज्ञान शि। अनुबन्धलोपे गुणे ज्ञाने इति।

### 6. शि सर्वनामस्थानम् (१.१.४१)

शि सर्वनामस्थानम् इति द्विपदं सूत्रम्। अनेन सूत्रेण सर्वनामस्थानसंज्ञं विधीयते। शि इत्येतद् सर्वनामस्थानसंज्ञं स्यात् इति सूत्रार्थः। यथा ज्ञान जस् इत्यत्र शिभावे 'शि सर्वनामस्थानम्' इति सूत्रेण सर्वनामस्थामसंज्ञा। तेन नुमादयः आगमाः स्युः। सर्वनामस्थानेऽचासम्बुद्धौ इत्यादावस्य प्रयोजनम्।

**7. नपुंसकस्य झलचः (७.१.७२)**

नपुंसकस्य झलचः इति पदच्छेदः। अनेन सूत्रेण नुम् विधीयते। झलन्तस्याजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने इति सूत्रार्थः। झल् च अच्च इति झलचः इति। तेन च अङ्गस्य इत्यधिकृतं विशेष्यते। नपुंसकस्य विशेषणत्वात् झलचः तदन्तविधिः। नुम् सर्वनामस्थाने इत्येतौ अनुवर्तेते। यथा ज्ञानानि। ज्ञानशब्दात् जसि, जसः शिभावे, नुमागमे उपधादीर्घे च ज्ञानानि।

**8. मिदचोऽन्त्यात्परः (१.१ .४६)**

मित् अचः अन्त्यात् परः इति पदच्छेदः। अनेन सूत्रेण मित् विधीयत। अचां मध्ये योऽन्त्यः, तस्मात्परस्तस्यैवान्तावयवो मित् स्यात् इति सूत्रार्थ। म् (मकार) इत् यस्य सः मित् (बहुव्रीहि समासः। अचः इति निर्धारणे षष्ठ। तेन अन्यादचः परः भवति इत्यर्थः। यथा ज्ञानानि।( शेषं पुंवत्)। एवं धनवनफलादयः।

**ज्ञानानि -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्......' इत्यादि सूत्रेण प्रथमाबहुवचनप्रत्यये 'ज्ञान जस्'। 'जश्शसोः शिः' इति शिभावे 'ज्ञान शि'। 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमागमे 'मिदचोऽन्त्यात्परः' इति सूत्रसाहाय्येन अन्त्यावयवे 'ज्ञानान् शि'। अनुबन्धलोपे 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे 'ज्ञानानि' इति सिद्ध्यति।

**हे ज्ञान**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां सम्बोधनप्रथमैकवचनविवक्षायां 'स्वौजसमोट्....' इत्यादि सूत्रेण सु प्रत्यये अनुबन्धलोपे 'हे ज्ञान स्'। स् इत्यस्य 'एकवचनं सम्बुद्धिः' इति सूत्रेण सम्बुद्धिसंज्ञायां, 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रेण सकारस्य लोपे 'हे ज्ञान' इति रूपम्।

**हे ज्ञाने**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्....' इत्यादि सूत्रेण सम्बोधनप्रथमाद्विवचनविवक्षायां औप्रत्यये 'हे ज्ञान औ' इति। 'नपुंसकाच्च' इति श्यादेशे ज्ञानेत्यस्य

भसंज्ञायाम् 'यस्येति च' इत्यकारलोपे प्राप्ते 'औङः श्यां प्रतिषेधो वाच्यः' इति निषेधे 'आद्गुणः' इति गुणे 'हे ज्ञाने' इति सिद्धम् ।

**हे ज्ञानानि**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्.......' इत्यादि सूत्रेण सम्बोधनप्रथमाबहुवचनप्रत्यये 'हे ज्ञान जस्'। 'जश्शसोः शिः' इति शिभावे 'हे ज्ञान शि'। 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमागमे 'मिदचोऽन्त्यात्परः' इति सूत्रसाहाय्येन अन्त्यावयवे 'हे ज्ञानन् शि'। अनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इत्युपधादीर्घे 'हे ज्ञानानि' इति सिद्ध्यति ।

**ज्ञानम् -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्......' इत्यादि सूत्रेण द्वितीयैकवचनविवक्षायां अम्प्रत्यये 'ज्ञान अम्' । 'स्वमोर्नपुंसकात्' इति सोर्लुकि प्राप्ते तं बाधित्वा 'अतोऽम्' इति अमि 'ज्ञान अम्' । 'अमिपूर्वः' इति पूर्वरूपे 'ज्ञानम्' इति सिद्धम् ।

**ज्ञाने -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्......' इत्यादि सूत्रेण द्वितीयाद्विवचनविवक्षायां औप्रत्यये अनुबन्धलोपे 'ज्ञान औ' इति। 'नपुंसकाच्च' इति श्यादेशे ज्ञानेत्यस्य भसंज्ञायाम् 'यस्येति च' इत्यकारलोपे प्राप्ते 'औङः श्यां प्रतिषेधो वाच्यः' इति निषेधे 'आद्गुणः' इति गुणे 'ज्ञाने' इति सिद्धम् ।

**ज्ञानानि -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् 'स्वौजसमौट्.....' इत्यादि सूत्रेण द्वितीयाबहुवचनप्रत्यये 'ज्ञान शस्' । 'जश्शसोः शिः' इति शिभावे 'ज्ञान शि' । 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमागमे 'मिदचोऽन्त्यात्परः' इति सूत्रसाहाय्येन अन्त्यावयवे 'ज्ञानन् शि, अनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इत्युपधादीर्घे 'ज्ञानानि' इति सिद्ध्यति ।

**ज्ञानेन –**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयाविभक्तेः एकवचनविवक्षायां 'स्वौजसंमौट् ..........' इत्यादि सूत्रेण टाप्रत्यये 'चुटू' इति सूत्रेण प्रत्ययाद्यस्य टकारस्य इत्संज्ञायां 'तस्य लोपः' इति टलोपे 'ज्ञान आ' इति स्थिते 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इत्यनेन ज्ञानशब्दस्य अङ्गसंज्ञा । तस्मात् अदन्तात् अङ्गात् परस्य टाप्रत्ययस्य 'टाङसिङसामिनात्स्याः' इति इन इति सर्वादिशे ज्ञान इन इति । ततः 'आद्गुणः' इति सूत्रेण गुणः एकादेशे 'ज्ञानेन' इति सिद्धम् ।

**ज्ञानाभ्याम्**

ज्ञानशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां 'स्वौजसमौट् .........' इत्यादि सूत्रेण भ्याम्प्रत्यये 'ज्ञान भ्याम्' इत्यत्र मकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा प्राप्नोति । तस्याः 'न विभक्तौ तुस्माः' इत्यनेन निषेधः भवति । ज्ञानशब्दः अदन्तः भवति । तस्य च भ्याम् इति प्रत्यये परे 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण अङ्गसंज्ञा भवति । भ्याम् यञादिः सुप् । तस्मात् यञादौ सुपि भ्याम् परे 'सुपि च' इति सूत्रेण अदन्तस्य अङ्गस्य अन्त्यस्य अतः दीर्घः भवति । तेन अकारस्य आकारे 'ज्ञाना भ्याम्' । संयोगे 'ज्ञानाभ्याम्' इति सिद्धं भवति ।

**ज्ञानैः**

ज्ञानशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकत्वात् तृतीयाबहुवचनविवक्षायां 'स्वौजसमौट् ......' इत्यादि सूत्रेण भिस्प्रत्यये, एकशेषे 'ज्ञान भिस्' । 'अनेकाल्शित् सर्वस्य' इति परिभाषया 'अतो भिस् ऐस्' इति सूत्रेण भिसः ऐसादेशे 'राम-ऐस्' इति स्थिते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ 'ज्ञानैस्' इति स्थिते सकारस्य रुत्वे विसर्गे कृते च 'ज्ञानैः' इति सिद्धम् ।

**ज्ञानाय-**

ज्ञानशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां चतुर्थ्यैकवचने 'स्वौजसमौट् ......' इत्यादि सूत्रेण ङेप्रत्यये 'ज्ञान - ङे' इति स्थिते अदन्तात् अङ्गात् परस्य ङेप्रत्ययस्य 'ङेर्यः' इति सूत्रेण यादेशे 'ज्ञान य'

इत्यत्र ‘स्थानिवदादेशोऽनल्विधौ’ इति सूत्रेण स्थानिवद्भावेन सुप्त्वात् ‘सूपि च’ इति सूत्रेण अदन्तस्य अङ्गस्य दीर्घे ‘ज्ञानाय’ इति रूपं सिद्धम्।

**ज्ञानाभ्याम्**

ज्ञानशब्दात् ‘कृत्तद्धितसमसाश्च’ इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् चतुर्थीद्विवचनविवक्षायां ‘स्वौजसमौट् ........’ इत्यादि सूत्रेण भ्याम्प्रत्यये ‘ज्ञान भ्याम्’ इत्यत्र मकारस्य ‘हलन्त्यम्’ इति सूत्रेण इत्संज्ञा प्राप्नोति। तस्याः ‘न विभक्तौ तुस्माः’ इत्यनेन निषेधः भवति। ज्ञानशब्दः अदन्तः भवति। तस्य च भ्याम् इति प्रत्यये परे ‘यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्’ इति सूत्रेण अङ्गसंज्ञा भवति। भ्याम् यञादिः सुप्। तस्मात् यञादौ सुपि भ्याम् परे ‘सुपि च’ इति सूत्रेण अदन्तस्य अङ्गस्य अन्त्यस्य अतः दीर्घः भवति। तेन अकारस्य आकारे ज्ञाना भ्याम्। संयोगे ‘ज्ञानाभ्याम्’ इति।

**ज्ञानेभ्यः -**

ज्ञानशब्दात् ‘कृतद्धितसमसाश्च’ इति सूत्रेण प्रातिपदिकत्वे चतुर्थीविभक्तेः बहुवचनविवक्षायां ‘स्वौजसमौट् ......’ इत्यादि सूत्रेण भ्यस्प्रत्यये ज्ञान भ्यस् इति स्थिते (अदन्तत्वात्) आदित्वात् सुप्त्वाच्च ‘सुपि च’ इति सूत्रेण दीर्घे प्राप्ते, ‘बहुवचने झल्येत्’ इति सूत्रेण एत्वे, अनुबन्धलोपे सकारस्य रुत्वे विसर्गे च कृते ‘ज्ञानेभ्यः’ इति सिद्धम्।

**ज्ञानात् -**

ज्ञानशब्दात् ‘कृत्तद्धितसमसाश्च’ इति सूत्रेण प्रातिपदिकत्वात् पञ्चम्येकवचनविवक्षायां ‘स्वौजसमौट्......’ इत्यादि सूत्रेण ङसिप्रत्यये ‘ज्ञान ङसि’ इति जाते ‘टाङसिङसामिनात्स्याः’ इति सूत्रेण ङसेः आत् इत्यादेशः। तत्र ‘अकः सवर्णे दीर्घः’ इति सूत्रेण सवर्णदीर्घमेकादेशे 'ज्ञानात्' इति स्थिते ज्ञानात् इत्यस्य पदसंज्ञा भवति। तत्र पदान्ते झलः तकारस्य ‘झलां जशोऽन्ते’ इत्यनेन दकारे ज्ञानाद्। ‘विरामोऽवसानम्’ इति सूत्रेण दकारात् परं वर्णोच्चारणस्य अभावात् अवसानसंज्ञा। तत्र ‘वाऽवसाने’ इति सूत्रेण झलः दकारस्य वैकल्पिकेन चर्त्वे तकारे ज्ञानात् इति रूपम्। वैकल्पिकाभावपक्षे ज्ञानाद् इति।

**ज्ञानाभ्याम्**

ज्ञानशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् चतुर्थीद्विवचनविवक्षायां 'स्वौजसमौट् ......... इत्यादि' सूत्रेण भ्याम्प्रत्यये 'ज्ञान भ्याम्' इत्यत्र मकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा प्राप्नोति। तस्याः 'न विभक्तौ तुस्माः' इत्यनेन निषेधः भवति। ज्ञानशब्दः अदन्तः भवति। तस्य च भ्याम् इति प्रत्यये परे 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण अङ्गसंज्ञा भवति। भ्याम् यञादिः सुप्। तस्मात् यञादौ सुपि भ्याम् परे 'सुपि च' इति सूत्रेण अदन्तस्य अङ्गस्य अन्त्यस्य अतः दीर्घः भवति। तेन अकारस्य आकारे 'ज्ञाना भ्याम्'। संयोगे 'ज्ञानाभ्याम्' इति।

**ज्ञानेभ्यः -**

ज्ञानशब्दात् 'कृत्तद्धितसमसाश्च' इति सूत्रेण प्रातिपदिकत्वे चतुर्थीविभक्तेः बहुवचनविवक्षायां 'स्वौजसमौट् ......' इत्यादि सूत्रेण भ्यस्प्रत्यये ज्ञान भ्यस् इति स्थिते (अदन्तत्वात्) आदित्वात् सुप्त्वाच्च 'सुपि च' इति सूत्रेण दीर्घे प्राप्ते, 'बहुवचने झल्येत्' इति सूत्रेण एत्वे, अनुबन्धलोपे सकारस्य रुत्वे विसर्गे च कृते 'ज्ञानेभ्यः' इति सिद्धम्।

**ज्ञानस्य -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठ्येकवचनविवक्षायां ङस्प्रत्यये 'ज्ञान ङस्' इति स्थिते 'टाङसिङसामिनात्स्याः' इति सूत्रेण ङसः स्थाने स्य इत्यादेशे 'ज्ञानस्य' इति सिद्धम्।

**ज्ञानयोः -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां प्रातिपादिकत्वात् षष्ठी विभक्तेः द्विवचनविवक्षायाम् 'स्वौजसमौट् ...........' इत्यादि सूत्रेण ओस्प्रत्यये ज्ञान ओस् इति स्थिते 'ओसि च' इति सूत्रेण अदन्ताङ्गस्य एकारे प्राप्ते 'अलोऽन्त्यस्य' इति नियमात् अकारस्य एकारे ज्ञाने ओस् इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'ज्ञानयोस्' इति स्थिते सकारस्य रुत्वे विसर्गे च कृते 'ज्ञानयोः' इति सिद्धम्।

**ज्ञानानाम् –**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां 'स्वौजसमौट्......' इत्यादि सूत्रेण षष्ठीबहुवचने आम्प्रत्यये 'ज्ञान आम्' इति स्थिते 'ह्रस्वनद्यापोनुट्' इति सूत्रेण नुडागमे 'ज्ञान नाम्' इति जाते 'नामि' इति सूत्रेण दीर्घे 'ज्ञानानाम्' इति सिद्धम्।

**ज्ञाने**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् 'स्वैजसमौट् ..........' इत्यादि सूत्रेण सप्तमीविभक्तौ एकवचने ङिप्रत्यये 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे च कृते 'ज्ञान इ' इति स्थिते 'आद्गुणः' इति सूत्रेण अकार-इकारयोः गुणे एकारे 'ज्ञाने' इति रूपम्।

**ज्ञानयोः -**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां प्रातिपादिकत्वात् सप्तमीविभक्तेः द्विवचनविवक्षायाम् 'स्वौजसमौट् ...........' इत्यादि सूत्रेण ओस्प्रत्यये 'ज्ञान ओस्' इति स्थिते 'ओसि च' इति सूत्रेण अदन्ताङ्गस्य एकारे प्राप्ते 'अलोऽन्त्यस्य' इति नियमात् अकारस्य एकारे 'ज्ञाने ओस्' इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'ज्ञानयोस्' इति स्थिते सकारस्य रुत्वे विसर्गे च कृते 'ज्ञानयोः' इति सिद्धम्।

**ज्ञानेषु**

ज्ञानशब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् 'स्वौजसमौट् ......' इत्यादि सूत्रेण सप्तमीविभक्तौ बहुवचने सुप्प्रत्यये 'हलन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे च कृते 'ज्ञान सु' इति स्थिते 'बहुवचने झल्येत्' इति सूत्रेण एकारे 'ज्ञाने सु' इति जाते 'आदेशप्रत्यययोः' इति सूत्रेण सकारस्य स्थाने विवृतघोप्रयत्नवति मूर्धन्यादेशे षकारे 'ज्ञानेषु' इति रूपम्।

**पुनरावृत्तिः (Recap)**

- अतोऽम् इत्यनेन क्लीबात् स्वमोरम् स्यात्।
- नपुंसकाच्च इत्यनेन क्लीबाद् औङः शी स्यात्।
- यस्येति च इत्यनेन इवर्णावर्णयोः लोपःस्यात्
- औङः श्यां प्रतिषेधो वाच्यः (वार्तिकम्) इत्यनेन वार्तिकेन लोपस्य प्रतिषेधः भवति।
- जश्शसोः शिः इत्यनेन जश्शसोः शिः स्यात्।
- शि सर्वनामस्थानम् इति सूत्रेण सर्वनामस्थानसंज्ञा स्यात्।
- नपुंसकस्य झलचः इति सूत्रेण क्लीबस्य नुमागमः स्यात्।
- मिदचोऽन्त्यात्परः अन्तावयवो मित्स्यात्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. ज्ञानम् इत्यत्र अमादेशः केन सूत्रेण विधीयते?
2. नपुंसकाच्च इति सूत्रेण किं विधीयते?
3. नपुंसकलिङ्गे जसः शि आदेशः केन सूत्रेण भवति?
4. अतोऽम् इति सूत्रं कस्य अपवादः?
5. ज्ञानानि इत्यत्र उपधादीर्घः केन सूत्रेण विधीयते?
6. शि इत्यादेशस्य सर्वनामस्थानसंज्ञाविधायकं सूत्रं किम्?
7. ज्ञानानि इत्यत्र नुमागमः केन सूत्रेण विधीयते?
8. जश्शसोः शिः इति सूत्रेण किं विधीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. नपुंसकाच्च इति सूत्रस्य अर्थं लिखत।
2. यस्येति च इति सूत्रस्य अर्थं लिखत।

3. औङः श्यां प्रतिषेधो वाच्यः इति वार्तिकस्य अर्थं लिखत।

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्रं व्याख्यात -**

1. अतोऽम्।
2. नपुंसकस्य झलचः
3. मिदचोऽन्त्यात्परः।

**सप्रमाणं प्रक्रियां साधयत-**

1. ज्ञानशब्द - सम्बोधनप्रथमैकवचनम्
2. ज्ञानशब्द - प्रथमा बहुवचनम्
3. ज्ञानशब्द - तृतीयैकवचनम्

## निर्दिष्टाभ्यासः (Assignments)

1. सोदाहरणं सूत्रं व्याख्यात - जश्शसोः शिः,नपुंसकाच्च, शि सर्वनामस्थानम्।
2. रूपाणि ससूत्रं साधयत - ज्ञाने, ज्ञानानाम्, ज्ञानात्।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. अतोऽम्।
2. शि।
3. जश्शसोः शिः।
4. स्वमोर्नपुंसकात्।
5. सर्वनामस्थाने चासम्बुद्धौ।

6. शि सर्वनामस्थानम् ।

7. नपुंसकस्य झलचः ।

8. शिः ।

## सूचनाग्रन्थाः (References)


1. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः,'बालमनोरमा' संस्कृत-हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००
2. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्दप्रसादशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
3. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत-कलालयः, तृप्पूणित्तुरा, १९९३

BLOCK-3

# लघुसिद्धान्तकौमुद्याः भ्वादिप्रकरणे लकाराणां प्रसक्तिः, भूधातोः लटि रूपनिष्पत्तिश्च

SGOU

# Unit - 1
## दशलकाराः तेषां कालवाचित्वे साङ्गत्यं च

### उद्देश्यानि (Learning Outcomes)

- दशलकारान् परिचाययति।
- कालवाचिलकारान् अर्थान् च अवगच्छति।
- कालवाचिलकारान् वाक्येषु प्रयोक्तुं क्षमतोत्पादनम्।

### प्राग्व्यपेक्षाः (Prerequisites)

जगति मानवानां वाग्व्यवहारः वाक्यं विना न सम्भवति। भाषारचनायां वाक्यसंरचनायां च तिङन्तपदानां प्रयोगस्य महत्त्वं सर्वविदितम्। यतो हि वाक्यरचनायां क्रियापदस्य अपरिहार्यता सर्वसिद्धा। धातुभ्यः एव विविधप्रकारकाणि क्रियारूपाणि कृदन्तरूपाणि च निष्पाद्यते। शाकटायनप्रभृतिभिः वैयाकरणैस्तु प्रत्येकं शब्दस्य निष्पत्तिः धातुभ्यः स्वीक्रियते। नामानि आख्यातजानि इति च वदता यास्केन अपि तदेव मतं प्रतिपादितम्।

क्रियारूपाणां कालद्योतनार्थं अर्थाञ्च क्रियते लकारः। ते लकाराः कुत्र प्रयुज्यन्ते? किमर्थं प्रयुज्यते? के के लकाराः कालवाचिनः इति पश्यामः।

### मुख्यपदानि (Keywords)

लकारः, सकर्मकधातवः, अकर्मकधातवः, लट्, लिट्, लुट्, लृट्, लङ्, लृङ्।

### Discussion

लकारः इत्येतस्य प्रयोगः कालद्योतनार्थ क्रियारूपार्थञ्च क्रियते। प्रत्येकं धातोः दशलकारेषु रूपाणि भवन्ति। ते च दश लकाराः लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ् तथा लृङ् चेति। एषु पञ्चमः लकारो

(लेट्) न लोको प्रयुज्यते। वेदे तस्य प्रयोगः सुलभः। विध्याशीर्भेदेन लिङ्ः पुनः द्विविधः। एवं लोकेऽपि दश लकाराः भर्वन्ति।

लट्, लिट् इत्यादिषु टकाराद्यनुबन्धकरणं प्रक्रियानुगमनायेति विशदं व्याकरणस्वरूपवेद्यानाम्। लकारस्य तु आदेशतया तिङ्गत्ययाः भवन्ति।

अकर्मकेभ्यो धातुभ्यो भावे कर्तरि चार्थे, तथा सकर्मकेभ्यः कर्तरि कर्मणि चार्थे लकाराः भवन्ति।

**सकर्मकः अकर्मकः च धातुः -**

यस्य धातोः कर्म सम्भवति स धातुः सकर्मकः इति कथ्यते। यस्य कर्म न सम्भवति स धातुः अकर्मकः कथ्यते। धातोः फलं व्यापारः चेति अर्थद्वयम्। तत्र व्यापारः हि क्रिया। अयं व्यापारः फलजनकः भवति। अतः फलानुकूलः व्यापारः कथ्यते। व्यापारस्य आश्रयः एकम् कारकम् भवति। फलस्य आश्रयः अपि एकं कारकं भवति। यस्य धातोः फलम् एकस्मिन् कारके वर्तते, व्यापारः अपरस्मिन् कारके वर्तते, स धातुः सकर्मकः कथ्यते। यस्य धातोः फलम् यस्मिन् कारके वर्तते, व्यापारः अपि तस्मिन्नेव कारके वर्तते स धातुः अकर्मकः कथ्यते।

यथा तक्षा कुठारेण काष्ठं छिनत्ति। अस्मिन् उदाहरणे कुठारस्य उद्यमननिपातनरूपं व्यापारं तक्षा करोति। तक्षाणं विना अयं व्यापारः विरतः भवति। अतः व्यापारः तक्षणि वर्तते। व्यापारेण जायमानं छेदनरूपं फलं तु काष्ठे वर्तते। अतः व्यापारः तक्षणि, फलं काष्ठे इति फलव्यापारयोः आश्रयौ भिन्नौ। अतः छिद्धातुः सकर्मकः। रामः तिष्ठति। अत्र स्थाधातोः गतिनिवृत्तिः अर्थः। गतिविरामः फलम्। तदनुकूलः च व्यापारः स्थितिरूपः। उभयमपि रामे एव वर्तते। अतः फलव्यापारयोः आश्रयौ न भिन्नौ अपि तु राम एक एव। अतः स्थाधातुः अकर्मकः।

**कर्तरि ,कर्मणि, भावे**

द्विकर्मकेभ्यः कर्मणि लकारः समुत्पद्यमानः कर्त्ता कर्म प्रतिपादयेदिति समुदियात् जिज्ञासा। तामत्र समाधातुं प्रवर्तामहे। प्रथमत एव के द्विकर्मका इत्यालोचयामः। (१) दुह्याच् इति पद्यपठितानां, गतिबुद्धिभक्षणार्थक शब्दकर्माकर्मकधातुप्रकृतिकण्यन्तानां च भवति द्विकर्मकता। तेषु कर्मण्येवं नियमः। दुह्याच् इति पद्ये पूर्वार्धपठितानामप्रधाने कर्मणि लकारः। नी, हृ, कृ ष्, वह् एतेषां प्रधाने कर्मणि। गत्यर्थकानामकर्मकाणां च ण्यन्तानां प्रयोगे कर्मणि लकारः। बुद्धिभक्षणार्थधातुप्रकृतिकानां ण्यन्तानां चान्यतरे यथेष्टं लकारः। क्रमेण उदाह्रियते। गां पयो दोग्धि। अत्र गौरप्रधानं कर्मेति तस्मिन् कर्मणि लकारः। गौर्दुह्यते पयः। पय इति

द्वितीयान्तम्। अजां ग्रामं नयति। इह प्रधानेऽजारूपे कर्मणि लकारः। अजा ग्रामं नीयते। देवदत्तं ग्रामं गमयति । देवदत्तः प्रयोज्यकर्म। तस्मिन् लकारे सति कर्मणि देवदत्तो ग्रामं गम्यत इति भवति। माणवकं धर्मम् बोधयति। न केवलं लकाराणां किंतु क्तप्रत्ययप्रभृतीनामपि कर्मवाचकानामुत्पत्तावेष एव नियम इत्यवगन्तव्यम्।

उदाहरणम् -

पठ्-धातुः सकर्मकः - रामः वेदं पठति इत्यत्र पठ्-धातुतः लकारः कर्तरि विहितः अस्ति। रामेण वेदः पठ्यते इति वाक्ये पठ्-धातुतः लकारः कर्मणि विहितः अस्ति। रामः तिष्ठति इति वाक्ये स्थाधातुः अकर्मकः। तस्मात् धातोः लकारः कर्तरि विहितः अस्ति। रामेण स्थीयते इति वाक्ये स्था-धातुतः लकारः भावे विहितः अस्ति। रामः खादति इति वाक्ये कर्म उल्लिखितं नास्ति। अतः खाद्-धातुः अत्र अविवक्षितकर्मकः अस्ति। अत्र खाद्-धातोः लकारः कर्तरि विहितः अस्ति। रामेण खाद्यते इति अस्मिन् वाक्ये कर्मणः उल्लेखो नास्ति। अतः खाद्-धातुः अविक्षितकर्मकः। अतः अत्र खाद्-धातोः लकारः भावे विहितः अस्ति।

**लकाराः**

**लट् वर्तमाने लेट् वेदे भूते लुङ्-लङ्-लिटस्तथा।**
**विध्याशिषोस्तु लिङ्लोटौ लुट्-लृट्-लृङ् च भविष्यति।।**

एतेषु दशलकारेषु लट् ,लोट्, लङ्, विधिलिङ् च इत्येते चत्वारः लकाराः सार्वधातुकाः तथा लिट्, लुट्, लृट्, आशीर्लिङ्, लुङ्, लृङ् च इत्येते षट् लकाराः आर्धधातुकाः सन्ति।

समेषामपि लकाराणां कालवाचकाः प्रेरणादिवाचाकाः इति भेदद्वयं भवति। लट् लिट् लुट् लृट् लङ्, लुङ् लृङ् चेति लकाराः कालवाचकाः। कालस्य वर्तमानकालः भविष्यत्कालः भूतकालः चेति विभागत्रयं भवति। भविष्यत्कालस्य अद्यतनभविष्यत्कालः अनद्यतनभविष्यत्कालः इति प्रकारद्वयम्। भूतकालस्यापि अद्यतनभूतकालः अनद्यभूतकालः इति प्रकारद्वयम् वर्तते।

वर्तमानकाले एकः लकारः - लट्।

भूतकालो त्रयः लकाराः - लिट् लङ् लुङ् च।

लिट् लकरः - अनद्यतनपरोक्षभूते।

लुट्लकारः - अनद्यतनभविष्यत्काले।

लृट् - सामान्यभविष्यत्काले।

लङ् लकारः - अनद्यतनभूतकाले।

लुङ् - सामान्यभूतकाले।

लृङ् - लिङ्निमित्ते क्रियायाः अनिष्पत्तौ।

**लट्**

तेषु एव लट् वर्तमानक्रियाबोधतात्पर्येण प्रयुज्यमानात् धातोः भवति। चैत्रो गच्छति। इह शब्दप्रयोगकाले गमनक्रिया वर्तत इति वर्तमानार्थको लट् प्रत्याययति।

**लिट्**

भूतानद्यतनपरोक्षक्रियातात्पर्यकात् धातोः लिट् भवति। भूतत्वं अतीतकालवृत्तित्वम्। अनद्यतनत्वमद्यतन-भिन्नत्वम्। अद्यतनत्वं नाम अतीतरात्रेः अपरार्धे नागामिरात्रेः पूर्वार्धेन चान्विते दिने निष्पन्नम्। परोक्षत्वं तु प्रयोक्तुः प्रत्यक्षागोचरत्वम्। एतादृशधर्मत्रयसहिता या क्रिया तद्वृत्तेर्धातोर्लिट् भवति। रामो राज्यं पालयामास। रामस्य हि राज्यपालनं नाद्यतनम्। एवं प्रयोक्तुः परोक्ष एव राम तत्क्रियां कृता इत्यतः परोक्षत्वम्।

अतीतकालनिष्पन्नत्वमप्यस्ति तस्याः क्रियायाः। अतो लिट् उपपद्यते।

**लुट्, लृट्, लृङ्**

भविष्यत्यनद्यतनेऽर्थे वर्तमानात् धातोर्लुट् स्यात्। चैत्रो गन्ता। श्वः ततः परं वा गमनमित्यर्थः।

केवले भविष्यति लृट्। अहं गमिष्यामि। उत्तरक्षणे गमनेऽप्येवं वचनं युज्यते। अनद्यतनभाविनोऽपि केवलभविष्यत्रूपतया विवक्षायां तत्रापि लृट् भवतीति वेदितव्यम्।

**लङ् , लुङ् च**

भूतेऽनद्यतनेऽर्थे लङ्। युधिष्ठिरो ऽभवत्। युधिष्ठिरभवनं नाद्यतनं भूतं चेति लङ्। क्रियेयं परोक्षापि भवतीति लिडेव स्यादिति नाशङ्कनीयम्। परोक्षस्यापि परोक्षत्वाविवक्षायां लिडनुत्पत्तेः। वस्तुतः सतोऽपि संभवत्यविवक्षा। असतस्तु विवक्षा प्रायेण न स्वीक्रियते।

भूतसामान्ये लुङ्।

पाणिनोक्तं कालवाचिलकाराणां सूत्राणि अधो दीयते।

**वर्तमाने लट् (३.२.१२३)**

वर्तमानक्रियावृत्तेः धातोः लट् स्यात्।

यथा - गौरवः गच्छति।

**परोक्षे लिट् (३.२.११५)**

भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट् स्यात्।

यथा - रामः जघान रावणम्।

**अनद्यतने लुट् (३.३.१५)**

भविष्यति अनद्यनते अर्थे धातोः लुट् स्यात्।

यथा - गौरवः श्वः गन्ता।

**लृट् शेषे च (३.३.१३)**

भविष्यत् सामान्ये अर्थे वर्तमानात् धातोः लृट् स्यात्।

यथा - गौरवः गमिष्यति।

**अनद्यतने लङ् (३.२.१११)**

अनद्यतनभूतार्थवृत्तेः धातोः लङ् स्यात्।

यथा - गौरवः अगच्छत्।

**लुङ्। (३.२.११०)**

भूतार्थवृत्तेः धातोः लुङ् भवति।

यथा - गौरवः अगमत्।

## पुनरावृत्तिः (Recap)

- लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ् लृङ् चेति दश लकाराः सन्ति।
- लेट् लकारः वेदे एव प्रयुङ्क्ते।
- कालवाचिलकाराः षट् भवन्ति।
- लट्, लिट्, लुट्, लृट्,लङ्, लुङ् एते कालवाचिलकाराः।

- वर्तमाने काले - लट् ।
- भूतानद्यतनपरोक्षार्थवृत्तेः - लिट् ।
- भविष्यति अनद्यनते अर्थे - लुट् ।
- भविष्यत्सामान्ये अर्थे वर्तमानात् - लृट् ।
- अनद्यतनभूतार्थवृत्तेः - लङ् ।
- भूतार्थवृत्तेः - लुङ् ।
- हेतुहेतुमद्भावादिलिङ्गिमित्तं तत्र भविष्यत्यर्थे - लृङ् ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. वर्तमानकाले प्रयुज्यमानः लकारः कः?
2. कालवाचिलकाराः के?
3. भूतकाले कति लकाराः प्रयुज्यन्ते?
4. वेदे एवायं लकारः प्रयुज्यते - कः?
5. लिट् लकारः कस्मिन् काले प्रयुज्यते?
6. सकर्मकधातोः लक्षणं किम्?
7. क्रियायाः अनुष्पत्तौ कः लकारः प्रयुज्यते?
8. लकाराः कति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. लकाराः कति ? तेषां नामानि लिखत ।
2. अकर्मकधातोः लक्षणं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. भूतकाललकाराः के ? विशदयत।
2. सकर्मक-अकर्मकधातुः - विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

लकाराः कति? तेषां कालवाचित्वे साङ्गत्यम्।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. लट्।
2. षट्।
3. त्रयः।
4. लेट्।
5. अनद्यतनपरोक्षभूते।
6. यस्य धातोः कर्म सम्भवति स धातुः सकर्मकः कथ्यते।
7. लृङ्।
8. दश।

## सूचनाग्रन्थाः (References)


1. वाक्यतत्त्वम्। पण्डितः एस् अनन्तनारायणशास्त्री, मलयालपरिभाषा जि विश्वनाथशर्मा, संस्कृतमहाविद्यालयः तृप्पुणित्तुरा १९९८।
2. लघुसिद्धान्तकौमुदी।प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३

3. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००

SGOU

# Unit - 2
## लकाराणां प्रकारवाचित्वे साङ्गत्यम्

### उद्देश्यानि (Learning Outcomes)

- प्रकारवाचिलकारान् अवगच्छति।
- लकाराणां सामान्यपरिचयः।
- प्रकारवाचिलकारान् वाक्येषु प्रयोक्तुं क्षमतोत्पादनम्।

### प्राग्व्यपेक्षाः (Prerequisites)

धातुभ्यः दशलकाराः सन्ति। लकाराः कालवाचकाः प्रेरणादिवाचकाः इति द्विधाः। तेषु कालवाचिलकाराः षट्। वर्तमानकाले लट्, भविष्यत्काले द्वौलकारौ लुट्, लृट्। भूतकाले त्रयः लकाराः। लिट् लङ् लुङ् च। अकर्मकेभ्यो धातुभ्यो भावे कर्तरि चार्थे, तथा सकर्मकेभ्यः कर्तरि कर्मणि चार्थे लकाराः भवन्ति इत्यादि-विषयाः गतैकके अस्माभिः अधीताः। अद्य प्रकारवाचिलकारान् के? तेषां साङ्गत्यं च अधिकृत्य पठामः।

### मुख्यपदानि (Keywords)

आज्ञा, अनुमतिः, प्रशंसा, प्रार्थनादिषु, आशिर्वादः, विधिः, लोट्, विधिर्लिङ्, आशिर्लिङ्, लृङ्।

### Discussion

लकारणां कालवाचकाः प्रेरणादिवाचकाः इति भागद्वयं वर्तते। काश्चन क्रियाः केवलं कालं सूचयन्ति। केचन लकाराः क्रियायाः कल्पनां, शासनां, अनुवादं इत्यादिन् अर्थविशेषान् अपि सूचयन्ति। उदा - बालः गच्छति इत्यत्र गमनक्रिया तत्काले एव भवति। परन्तु बालः गच्छतु इत्यत्र कालात् परं कल्पना, शासना, अनुवादः इत्यादि अर्थविशेषोऽपि वर्तते। तानि क्रियारूपाणि प्रकारवाचकाः इति। प्रकारवाचिलकाराः चत्वारः भवन्ति। लोट्, आशिरर्थे आशिर्लिङ्, विध्यादि अर्थे विधिलिङ्, लृङ् च। लिङ् द्विधा - विधिलिङ्, आशीर्लिङ् च।

विधौ, प्रार्थनायामाशिषि च लोट् भवति। त्वं गच्छ, मां पाहि, स्वस्ति भूयात् इति क्रमेण उदाहरणानि। विध्यादयः प्रवर्तना क्वचित् अनुनयेन क्वचिद् भयजननेनेत्यादिकमुदाहरणविशेषेषु स्वयमालोचनीयम्। लोडर्थेषु लिङपि भवतीति एव लिङर्थाः।

हेतुहेतुमद्भावापन्नयोः क्रिययोरसंभवे गम्यमाने भूते भविष्यति च लृङ् भवेत्। सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्। सुवृष्टिभवनसुभिक्षभवनयोः हेतुहेतुमद्भावोऽस्ति। तयोराद्यं नाभूदिति द्वितीयमपि नोत्पन्नमित्यर्थः।

पाणिनिना विधीयमानानि प्रकारवाचि लकाराणां सूत्राणि।

**लोट् च। (३.३.१६२)**

विध्याद्यर्थेषु आशिषि च धातोः लोट् भवति।

लोट् लकारः आज्ञार्थकः। लोट् लकारस्य प्रयोगः सामान्यतया आज्ञार्थे, आदेशार्थे उत वा प्रवर्तनार्थे।

यथा - इदं कार्यं करोतु।

**विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्। (३.३.१६१)**

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु धातोः लिङ् भवति।

विधिलिङ् लकारः प्रेरणार्थकः। विधिलिङ्लकारस्य प्रयोगः सामान्यतया सम्भावनार्थे, सामथ्यार्थे, भवितव्यं इति अर्थे च भवति।

सम्भावनार्थे - यथा - अद्य वृष्टिः भवेत्।

सामथ्यार्थे - यथा - भवान् महाभारं वहेत्।

भवितव्यम् इत्यर्थे - यथा - गौरवः पठेत्।

**आशिषि लिङ्लोटौ। (३.३.१७३)**

आशीरर्थे धातोः लिङ् भवति।

आशिर्लिङ् लकारः आशिर्वादार्थे प्रयुज्यते।

आशीरर्थे - यथा - गौरवः चिरं जीवतु।

**लिङ्निमित्ते लृङ् क्रियातिपत्तौ (३.३.१३९)**

हेतुहेतुमद्भावादिलिङ्निमित्ते तत्र भविष्यत्यर्थे क्रियातिपत्तौ सत्यां धातोः लृङ् भवति।

हेतुमद्भावार्थे यदा तु क्रियया अनिष्पत्तिः गम्यमाना भवति। तदर्थे लृङ् लकारः। भूतकालस्य प्रभावे लृङ् लकारः। यथा - यदि गौरवः अपठिष्येत् तर्हि विद्वान् अभविष्यत्। यदि सुवृष्टिः अभविष्येत् तर्हि सुभिक्षमभविष्यत्।

## पुनरावृत्तिः (Recap)

- लकारणां कालवाचकाः प्रेरणादिवाचकाः इति भागद्वयं वर्तते।
- प्रकारवाचिलकाराः चत्वारःभवन्ति।
- ते लोट्, आशिर्लिङ्, विधिलिङ्, लृङ् च प्राकरवाचिलकाराः।
- विध्याद्यर्थेषु आशिषि च धातोः लोट् भवति।
- विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु धातोः विधिलिङ् भवति।
- आशीरर्थे धातोः आशिर्लिङ् भवति।
- लिङ् निमित्ते लृङ् क्रियातिपत्तौ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. क्रियायाः अनिष्पत्तौ कः लकारः?
2. प्रकारवाचिलकाराः के?
3. आशीरर्थे कः लकारः प्रयुज्यते?
4. हेतुमद्भावार्थे यदा तु क्रियया अनिष्पत्तिः गम्यमाना भवति - तदर्थे कः लकारः प्रयुज्यते?
5. लोट्लकारं विधीयमानं सूत्रं किम्?
6. विधिलिङ्लकारस्य प्रयोगः कः?
7. लृङ्लकारं विधीयमानं सूत्रं किम्?
8. आशिषिलिङ्लोटौ इत्यस्य अर्थः कः?
9. लृङ्लकारस्य एकमुदाहरणम् लिखत।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. प्रकारवाचिलकाराः के? तेषां नामानि लिखत।
2. विधिलिङ्लकारः कस्मिन् अर्थे प्रयुज्यते?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

विधिलिङ्- आशिर्लिङ्लकारयोः प्रयोगं ससूत्रं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

लकाराणां प्रकारवाचित्वे साङ्गत्यम्।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. लृङ्।
2. 4(चत्वारः)
3. आशिर्लिङ्।
4. लृङ्।
5. लोट् च।
6. विधिलिङ्लकास्य प्रयोगः सामान्यतया सम्भावनार्थे, सामथ्यार्थे, भवितव्यं इति अस्मिन् अर्थे च भवति।
7. लिङ्निमित्ते लृङ् क्रियातिपत्तौ।
8. आशिरर्थे धातोः लिङ् भवति।

9. यथा - यदि गौरवः अपठिष्येत् तर्हि विद्वान् अभविष्यत् ।

## सूचनाग्रन्थाः (References)


1. वाक्यतत्त्वम् । पण्डितः एस् अनन्तनारायणशास्त्री, मलयालपरिभाषा जि विश्वनाथशर्मा, संस्कृतमहाविद्यालयः तृप्पुण्णित्तुरा १९९८ ।
2. लघुसिद्धान्तकौमुदी ।प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३
3. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००

# Unit - 3
## आत्मनेपदं परस्मैपदञ्च

## उद्देश्यानि (Learning Outcomes)

- परस्मैपदम् आत्मनेपदञ्च परिचाययति।
- आत्मनेपदानां प्रयोगवैशिष्ट्यज्ञानम् अर्थविवेचनञ्च अवगच्छति।
- परस्मैपदानां प्रयोगवैशिष्ट्यज्ञानम् अर्थविवेचनञ्च अवगच्छति।

## प्राग्व्यपेक्षाः (Prerequisites)

उचित अर्थसहितवर्णसमूहः एव पदं भवति। पदं तु द्विविधं भवति। प्रकृतिः प्रत्ययः चेति। प्रकृतिः नाम पदस्य मूलरूपं भवति। प्रत्ययः नाम प्रकृत्या सह यद् वयं योजयामः तद् भवति। यथा - राम सु इत्यत्र राम इति प्रकृतिः सु इति प्रत्ययः। पुनः पदस्य तु नामपदं क्रियापदं इति विभागद्वयं अस्ति। क्रियां यत् पदं सूचयति तत् भवति क्रियापदम्। यस्य पदस्य अन्ते तिङ्प्रत्ययाः भवति। तत् तिङन्तम्। तिङः अन्ते यस्य तत् तिङन्तम्। धातुभ्यः तिङ्प्रत्ययस्य योजनेन क्रियापदं भवति। अतः प्रथमं धातुः कः? सः कतिविधः? परस्मैपदं आत्मनेपदं इत्यस्य अर्थः कः ? परस्मैपदं आत्मनेपदं इति संज्ञा कुतः लब्धा? इत्यादि विषयान् अस्मिन् एकके पश्यामः।

## मुख्यपदानि (Keywords)

धातुजानि, भ्वादयो धातवः, सनाद्यन्ताः धातवः, औपदेशिकाः धातवः, आतिदेशिकाः धातवः, परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः।

## Discussion

### धातुः

धीयते सर्वम् अस्मिन् इति धातुः। धात्वानुसारेणैव पदनिष्पत्तिः अर्थकथनं च। सर्वाणि पदानि धातुजानि

इति शकटायनाचार्चः। डुधाञ् धारणपोषणयोः इत्यतः तुन् प्रत्यये धातुः इति पदं निष्पद्यते। धातु नाम क्रियावाचको गणादिपठितः शब्दविशेषः। पाणिनिना धातुपाठे प्रायेण २००० धातवः उपदिष्टाः। पाणिनिना धातोः लक्षणं द्विधा विहितम्। भूवादयो धातवः (१.३.१) सनाद्यन्ताः धातवः (३.२.३२) चेति। समान्यतया धातोः विभागद्वयं वर्तते। औपदेशिकाः धातवः आतिदेशिकाः धातवः च इति। तत्र भ्वादिगणपठिताः क्रियावाचकाः शब्दाः औपदेशिकाः धातवः। यथा - भू, पठ्, गम्, पच् इति। सनाद्यन्ताः धातवः इति सूत्रेण येषां धातुसंज्ञा भवति ते अत्र आतिदेशिकाः धातवः। सन्, क्यच्, काम्यच्, क्यङ्, क्यष्, क्विप्, णिच्, यङ्, यक्, अय्, इयङ्, णिङ् इत्येते द्वादश प्रत्ययाः उपदिष्टाः ते सनादयः।

स्वरूपानुसारं धातवः त्रिधा। परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः चेति। यद्यपि परस्मै सूचकः धातुः परस्मैपदमिति, आत्मने सूचकं आत्मनेपदमिति वक्तुं शक्यते तथापि अयमर्थः सर्वत्र न युज्यते। संक्षेपात् ज्ञातुं शक्यते यत् केचन धातवः परस्मैपदिनः, केचन आत्मनेपदिनः अन्ये केचन उभयपदिनः। पुरुषाः पुरुषोचितं वस्त्रधारणं स्त्रियः स्त्रीजनोचितं वस्त्रधारणं, अन्येभ्यः कतिपयेभ्यः उभयरीत्यापि वर्तमानं वस्त्रं धरन्ति तद्वत्।

लः परस्मैपदम् ,तङानावात्मनेपदम्, अनुदात्तङित आत्मनेपदम्,स्वरितञितः कर्त्रभिप्राये क्रियाफले, शेषात् कर्तरि परस्मैपदम् इत्यादि सूत्राणि एव अत्र प्रमाणम्।

**परस्मैपदम्।**

लः परस्मैपदम्। (१.४.९८) इत्यनेन सूत्रेण लस्य स्थाने तिप्तस्झिसिप्थस्थमिब्वस्मस् - तातञ्झ - थासाथांध्वम् -इड्वहिमहिङ् इति सूत्रेण प्राप्ताः १८ आदेशाः परस्मैपदसंज्ञां लभन्ते।

शेषात् कर्तरि परस्मैपदम्॥ (१.३.७८) शेषात् (५/१), कर्तरि (७/१), परस्मैपदम् (१/१)। उक्ताद् अन्यः शेषः। किं किम् उक्तम्। आत्मनेपदप्रत्ययस्य विधानस्य निमित्तानि उक्तानि। अनुदात्तङित आत्मनेपदम् (१.३.१२) इति सूत्रम् आरभ्य विभाषोपपदेन प्रतीयमाने (१.३.७७) इति सूत्रं यावत् आत्मनेपदप्रत्ययविधानस्य बहूनि निमित्तानि उक्तानि। तानि निमित्तानि यस्य धातोः न सन्ति स धातुः आत्मनेपदनिमित्तेन हीनः। स एव शेषः। एवञ्च आत्मनेपदनिमित्तहीनाद् धातोः परस्मैपदसंज्ञकः तिङ् विधीयते। परस्मैपदम् तिङ् एव। अतः लस्य इति षष्ठ्येकवचनान्तं पदम् आक्षिप्यते। एवञ्च ईदृशात् आत्मनेपदनिमित्तहीनाद् धातोः लस्य स्थाने कर्त्रर्थे परस्मैपदस्य विधानं प्रकृतं सूत्रं करोति। अत्र धातोः परं

लस्य स्थाने ९ परस्मैपदसंज्ञकाः आदेशाः प्रकृतसूत्रेण विधीयन्ते। ते च अव्यवहितपरम् एव निवेशनीयाः। धातोः परम् लस्य स्थाने एकदा एक एव आदेशः निवेशयितुं शक्यः।

**आत्मनेपदम्**

तङानावात्मनेपदम् । (१.४.९९) सूत्रार्थो भवति लस्य स्थाने जायमानः तङ् प्रत्याहारः शानच्-कानचौ च आत्मनेपदसंज्ञाः स्युः। तिङ्-प्रत्याहारे तङ् अन्तर्भवति। तिङाम् परस्मैपदसंज्ञा विहिता एव। तेषु नवानाम् तङाम् अनेन प्रकृतसूत्रेण आत्मनेपदसंज्ञा प्राप्ता। आकडारादेका संज्ञा इति अधिकारे एतानि सूत्राणि। अतः पूर्वसंज्ञां बाधित्वा प्रकृतसूत्रेण तङः आत्मनेपदसंज्ञा विधीयते। एवञ्च पारिशेष्यात् तिप् तस् झि सिप् थस् थ मिप् वस् मस् इति एतेषां नवानां परस्मैपदसंज्ञा। त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति नवानाम् एवञ्च शानच् कानच् इति एतयोः च आत्मनेपदसंज्ञा फलति।

पुनः अनुदात्तङित आत्मनेपदम्॥ (१.३.१२) सूत्रार्थो भवति अनुदात्तेतो ङितश्च धातोः लस्य स्थाने आत्मनेपदं विधेयम्। अर्थात् यस्य धातोः अनुदात्तः अच् इत् अस्ति सः अनुदात्तेत्, यस्य धातोः ङकारः इत् अस्ति स ङित्। एवम् अनुदात्तेत् डित् यदि धातुः स्यात् तर्हि तस्मात् परस्य लस्य स्थाने आत्मनेपदनामकाः प्रत्ययाः आदेशत्वेन विधेयाः इति।

पुनः स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ (१.३.७२) सूत्रार्थो भवति लस्य स्थाने तिङ् विधीयते। आत्मनेपदम् तिङ् एव। अतः लस्य इति षष्ठ्येकवचनान्तं पदम् आक्षिप्यते। सूत्रार्थो भवति स्वरितेतः ञितः च धातोः लस्य स्थाने आत्मनेपदं विधेयम् कर्तृगामिनि क्रियाफले। अर्थात् यस्य धातोः स्वरितः अच् इत् अस्ति सः स्वरितेत्, यस्य धातोः ञकारः इत् अस्ति स ञित्। एवम् स्वरितेत् ञित् वा यदि धातुः स्यात् तर्हि तस्मात् परस्य लस्य स्थाने आत्मनेपदनामकाः प्रत्ययाः आदेशत्वेन विधेयाः इति यदि क्रियायाः फलं कर्ता प्राप्नोति।

कर्तारम् अभिप्रैति (गच्छति) इति कर्त्रभिप्रायम् (फलम्)। तस्मिन् कर्त्रभिप्राये। क्रियायाः फलं क्रियाफलम्। तस्मिन् क्रियाफले इति षष्ठीतत्पुरुषः समासः। पदयोजना भवति स्वरितेतः ञितः धातोः आत्मनेपदं भवति कर्त्रभिप्राये क्रियाफले। क्रियायाः फलं कर्ता प्राप्नोति चेत् ईदृशधातोः आत्मनेपदं विधेयम्। अत्र क्रियायाः व्यापारः फलं चेति अर्थद्वयमिति उक्तमेव। परन्तु इदं फलं नात्र अभिप्रेतम्। यतः अस्य फलस्याश्रयः कर्म इति उच्यते। यदि इदं फलं कर्तारं गच्छेत् तर्हि कर्तुः कर्मसंज्ञापत्तिः। अतः यत् प्रयोजनम् उद्दिश्य क्रिया आरभ्यते तत् फलमेवात्र फलपदेन ग्राह्यम्। यथा स्वर्गादिलाभाय यागः आरभ्यते। परन्तु पुरोहितः तु दक्षिणालाभाय

यागं करोति। यजमानस्य स्वर्गः फलम्। पुरोहितस्य दक्षिणा फलम्। अत्र स्वर्गः एव फलम् अत्र फलपदेन ग्राह्यम्। अत्र स्वर्गः एव फलम् यदि यज्ञकर्तारं प्रति गच्छति तर्हि इदं कर्त्रभिप्रायं क्रियाफलम्। एवं सति यज्-धातोः आत्मनेपदस्य विधानं भवति।

**परस्मैपदं**

| | | | | | |
|---|---|---|---|---|---|
| तिङ् प्रत्ययाः | - | प्रथमः | तिप् | तस् | झि |
| | | मध्यमः | सिप् | थस् | थ |
| | | उत्तमः | मिप् | वस् | मस्। |

यैः धातुभिः सह परस्मैपदिनः प्रत्ययाः युज्यन्ते ते धातवः परस्मैपदिनः धातवः।

**आत्मनेपदं**

| | | | | | |
|---|---|---|---|---|---|
| तिङ् प्रत्ययाः | - | प्रथमः | त | आताम् | झ |
| | | मध्यमः | थास् | आथाम् | ध्वम् |
| | | उत्तमः | इड् | वहिङ् | महिङ्। |

यैः धातुभिः सह आत्मनेपदिनः प्रत्ययाः युज्यन्ते ते धातवः आत्मनेपदिनः धातवः।

यैः धातुभिः परस्मैपदिनः आत्मनेपदिनः चेति उभयविधाः प्रत्ययाः युज्यन्ते ते धातवः उभयपदिनः धातवः।

एककालं ९ प्रत्ययाः किञ्च अव्यवहितपराः इति नैव सम्भवति। अतः युगपत् ९ प्रत्ययाः प्रयोक्तुं न शक्यन्ते। परन्तु एकैकः पर्यायेण प्रयोक्तुं शक्यते।

केचन उपसर्गाणां योगेऽपि धातुभ्यः आत्मनेपदं परस्मैपदत्वेन, परस्मैपदम् आत्मनेपदत्वेन च विधीयन्ते। तत्सूचकं पाणिनिना परस्मैपदप्रकरणं आत्मनेपदप्रकरणं इत्येते प्रकरणे विधीयेते।

## पुनरावृत्तिः (Recap)

- धीयते सर्वम् अस्मिन् इति धातुः।
- डुधाञ् धारणपोषणयोः इत्यतः तुन् प्रत्यये धातुः इति पदं निष्पद्यते।
- पाणिना धातुपाठे प्रायेण २००० धातवः उपदिष्टाः।
- धातोः लक्षणं - भूवादयो धातवः (१.३.१) सनाद्यन्ताः धातवः (३.२.३२) चेति।

- धातुः- औपदेशिकाः धातवः आतिदेशिकाः धातवः चेति द्विविधा।
- स्वरूपानुसारं धातवः त्रिधा।
- परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः चेति।
- लः परस्मैपदम्।
- तङानावात्मनेपदम्।
- अनुदात्तङित आत्मनेपदम्।
- स्वरितञितः कर्त्रभिप्राये क्रियाफले।
- शेषात् कर्तरि परस्मैपदम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. धातुः नाम किम्?
2. स्वरूपानुसारं धातुः कति विधः?
3. औपदेशिकः धातवः के?
4. लः परस्मैपदं इत्यनेन किं विधीयते?
5. आत्मनेपदप्रत्ययाः के?
6. शेषात् कर्तरि परस्मैपदमित्यत्र कः शेषपदार्थः?
7. ञितो धातोः आत्मनेपदं कदा विधीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. पाणिनिनोक्तं धातुलक्षणसूत्राणि कानि?
2. सनादयः के?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

| |
|---|
| केषां आत्मनेपदसंज्ञा? विशदयत। |

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| आत्मनेपदं परस्मैपदं च प्रतिपादयत। |

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. धीयते सर्वम् अस्मिन् इति धातुः।
2. त्रिविधः।
3. तत्र भ्वादिगणपठिताः क्रियावाचकाः शब्दाः औपदेशिकाः धातवः।
4. परस्मैपदसंज्ञा।
5. त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति। एवञ्च शानच् कानच् च आत्मनेपदसंज्ञा।
6. आत्मनेपदनिमित्तहीनः धातुः हि शेषपदार्थः।
7. ञितो धातोः कर्तृगामिनि क्रियाफले आत्मनेपदं स्यात्।

## सूचनाग्रन्थाः (References)


1. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००
2. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्दप्रसादशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
3. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३

# Unit - 4
## भूधातोः लटि रूपनिष्पत्तिः
## 'वर्तमाने लट्' इति सूत्रात् आरभ्य 'अतो दीर्घो यञि' इति सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- भूधातोः लट्लकारे रूपाणि साधयितुं प्रक्रियाम् अवगच्छति।
- सूत्राणि व्याख्यातुं क्षमता।
- व्याकरणशास्त्रे प्रथम-मध्यम-उत्तमपुरुषादीनां प्रयोगं जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

भाषा आशयविनिमायाय उपयुज्यते। भाषायाः अविभाज्यघटकं भवति पदम्। व्याकरणशास्त्रे सुप्तिङन्तं पदं भवति। सुबन्तपदमधिकृत्य वयं अधीतवन्तः। तिङन्तं किमिति पश्यामः। तिङ् अन्ते यस्य तत् तिङ्न्तम्। तिङ् इति प्रत्याहाराः तेन अष्टादश प्रत्ययाः अभिधीयन्ते। ते प्रत्ययाः यस्य शब्दस्वरूपस्य अन्ते दृश्यन्ते ते शब्दाः तिङन्तशब्देन अभिधीयन्ते। सामान्यतः क्रियापदं इति उच्यमानं तिङ्न्तं। यथा - भवति, पठति, पचति इत्यादि।

व्याकरणमते वाक्ये तिङ्न्तस्यैव प्राधान्यम्। तिङन्तं विना वाक्यमेव न सम्भवति। तिङन्ते प्रकृतिभावः प्रत्ययभावश्च अस्ति। तत्र तिङन्तस्य प्रकृतिः धातुः इति कथ्यते। पाणिनिना विरचितः धातुपाठः इत्येते धातूनां आवलिः विद्यते। तत्र प्रायः द्विसहस्रं धातवः विद्यन्ते। ते च धातवः धातुपाठे दशगणेषु विभक्ताः सन्ति - भ्वादि, अदादि, जुहोत्यादि, दिवादि,स्वादि, तुदादि, रुदादि, तनादि, क्र्यादि तथा चुरादि इति। तस्मिन् गणे प्रथमं धातुः भवति भूधातुः। अस्मिन् एकके भूधातोः वर्तमानकालक्रियारूपाणि कथं निष्पन्नं इति चर्चयामः।

## मुख्यपदानि (Keywords)

लट्, तिङ् प्रत्ययाः, परस्मैपदं, आत्मनेपदं, प्रथमामध्यमोत्तमााः, वचनानि, सार्वधातुकं, आर्धधातुकं, शप्, अन्तादेशः, दीर्घः।

## Discussion

**भू-धातुः लट् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भवति | भवतः | भवन्ति |
| **मध्यमपुरुषः** | भवसि | भवथः | भवथ |
| **उत्तमपुरुषः** | भवामि | भवावः | भवामः |

1. **वर्तमाने लट् (३.२.१२३)**

वर्तमाने लट् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण लट् विधीयते। वर्तमानक्रियावृत्तेः धातोः लट् स्यात् इति सूत्रार्थः। अटावितौ। उच्चारमसामर्थ्याल्लस्य नेत्वम्। भू सत्तायाम्। कर्तृविवक्षायां भू ल इति स्थिते। वर्तमाने इति तत्र अन्वेति। लट् इत्यत्र अकारटकारौ इतौ भवतः। ल् एव अवशिष्यते।

2. **तिप्तस्झिसिप्थस्थमिप्वस्मस्ताताञ्झथासाथांध्वमिड्वहिङ्महिङ् (पा.३.४.७८)**

अत्र एकमेव पदं वर्तते, तत् समस्तपदं च भवति। एतेन अष्टादश प्रत्ययाः विधीयन्ते। एतेऽष्टादश लादेशाः स्युः इति सूत्रार्थः। लस्य इति अनुवर्तते। तिप्तस्झिसिप्थस्थमिप्वस्मस्ताताञ्झथासार्थाध्वमिड्-हिङ्महिङ् (तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इड् वहिङ् महिङ) चेति। अतः अयं प्रत्ययः प्रथमा-एकवचनम् भवति। लस्य इति अनुवर्तते। तत् च स्थानषष्ठयन्तम्। अतः ते लादेशाः इति कथ्यन्ते।

| | | |
|---|---|---|
| तिप् | तस् | झि |

| | | |
|---|---|---|
| सिप् | थस् | थ |
| मिप् | वस् | मस् |
| त | आताम् | झ |
| थास् | आथाम् | ध्वम् |
| इड् | वहिङ् | महिङ् |

**3. लः परस्मैपदम्। (१ .४ .९९)**

लः परस्मैपदम् इति पदच्छेदः। अनेन परस्मैपदसंज्ञा विधीयते। लादेशाः परस्मैपदसंज्ञाः स्युः इति सूत्रार्थः। लः इति षष्ठी विभक्तिः। परस्मैपदम् इति प्रथमा विभक्तिः। लः इति स्थाने - षष्ठ्या आदेशः इति अध्याहार्यः भवति। अतः एते अष्टादश लादेशाः। तिप् - तस् - झि - सिप्- थस्- थ- मिप्- वस् – मस्– त-आताम्-झ- थास्-आथां- ध्वम्- इड् - वहि महिङ् चेति परस्मैपदसंज्ञकाः स्युः इति अर्थः लभते।

**4. तङानावात्मनेपदम्। (१.४.९९)**

तड़ानौ आत्मनेपदम् इति पदच्छेदः। अनेन सूत्रेण आत्मनेपदसंज्ञा विधीयते। तङ् प्रत्याहारः शानच्-कानचौ चैतत्संज्ञाः स्युः। परस्मैसंज्ञापवादः। अत्र 'लः इति अनुवर्तते। तड़प्रत्याहारे त आताम् इति तशब्दम् आरभ्य महिङ् इत्यत्र ङकारपर्यन्तम्। एवं तङ् प्रत्याहाराः। त-आताम्-झ-थास् आथाम्-ध्वम् - इड् -वहि -महिङ् चेति नव तिप्प्रत्ययाः अन्तर्भवन्ति। आन इत्युक्ते शानच्कानचौ प्रत्ययौ एव। एवं तङ् प्रत्याहारः शानच्कानचौ च आत्मनेपदसंज्ञाः स्युः इति अर्थः। एतत् सूत्रं परस्मैपदसंज्ञायाः अपवादः भवति।

| | | |
|---|---|---|
| त | आताम् | झ |
| थास् | आथाम् | ध्वम् |
| इड् | वहि | महिङ् |

5. **अनुदात्तङित आत्मनेपदम्। (१.३.१२)**

अनुदात्तङितः आत्मनेपदम् इति पदच्छेदः। अनेन सूत्रेण आत्मनेपदसंज्ञा विधीयते। अनुदात्तेतो ङितश्च धातोरात्मनेपदं स्यात्। अत्र धातोः इति अनुवर्तते। अनुदात्तश्च ङि च अनुदात्तङौ तौ च इतौ यस्य स अनुदात्तङित्, तस्मात् अनुदात्तङितः। द्वन्द्वान्ते इत् शब्दस्य प्रत्येकमन्वयः। अतः अनुदात्तेतः ङितः च धातोः आत्मनेपदं स्यात् इति सूत्रार्थः भवति। अर्थात् यस्य धातोः परे अनुदात्तेतः ङितः वा भवति तस्य धातोः परे आत्मनेपदप्रत्ययाः भवन्ति।

6. **स्वरितञितः कर्त्रभिप्राये क्रियाफले। (१.३.७२)**

स्वरितञितः कर्त्रभिप्राये क्रियाफले इति पदच्छेदः। अनेन सूत्रेण आत्मनेपदसंज्ञा विधीयते। स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले इति सूत्रार्थः। अत्र धातोः इति पदम् अनुवर्तते। स्वरितश्च ञश्च स्वरितञौ इतौ यस्य सः स्वरितञित् तस्मात्। द्वन्द्वान्ते इत्-शब्दः प्रत्येकं सम्बध्यते। अतः स्वरितेतः ञितश्चेति धातोः इत्यनन्तरं लस्य स्थाने इति शेषः। कर्त्तारम् अभिप्रैति गच्छति इति कर्त्रभिप्रायम्। एवं स्वरितेतः ञितः च धातोः आत्मनेपदं स्यात् कर्तृगामिनि क्रियाफले इति अर्थः प्राप्तः।

7. **शेषात् कर्तरि परस्मैपदम् (१.३.७८)**

शेषात् कर्तरि परस्मैपदम् इति त्रिपदं सूत्रमिदम्। अनेन सूत्रेण परस्मैपदसंज्ञा विधीयते। आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् इति सूत्रार्थः। आत्मनेपदविषयादन्यः उक्तः शेषः, तस्मात् शेषात्। 'अनुदात्तङितः इति 'स्वरिततञितः इति च उक्ताद् आत्मनेपदविषयाद् अन्यः शेषः इति पदस्य अर्थः यस्मिन् धातौ आत्मनेपदनिमित्तकलक्षणानि न स्यात् तत्र कर्तरि परस्मैपदप्रत्ययाः स्युः इति अर्थः लभते।

8. **तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः (१.४.१००)**

तिङः त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति चतुष्पदं सूत्रं वर्तते। तिङः उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः इति सूत्रार्थः। तिङ उभयोः अपि इति भावः। परस्मैपदस्य आत्मनेपदस्य चेति

उभयोः अपि प्रत्येकं त्रयस्त्रिकाः सन्ति। प्रथमादिसंज्ञाः प्रवर्तन्ते इति भावः। प्रथमादिषु पुरुषसंज्ञा तु प्राचीनाचार्य शास्त्रसिद्धा इति बोध्यम्। तत्र प्रत्येकं नव प्रत्ययाः यथासंख्यन्यायेन क्रमशः भवन्ति।

| **परस्मैपदम्/** | **आत्मनेपदम्/संज्ञा** |
|---|---|
| प्रथमत्रिकाः | तिप् तस् झि / त आताम्-झ / प्रथम-पुरुषः |
| द्वितीयत्रिकाः | सिप्-थस्-थ/ थास्-आथां ध्वम्/ मध्यम पुरुषः |
| तृतीयत्रिकाः | मिप्-वस्-मस्/ इड्-वहिङ्-महिङ्/ उत्तम पुरुषः |

**9. तान्येकवचनद्विवचनबहुवचनान्येकशः (१.४.१०१)**

तानि एकवचनद्विवचनबहुवचनानि एकशः इति पदच्छेदः। लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकम् एकवचनादिसंज्ञानि स्युः इति सूत्रार्थः। अथ प्रथमादिषु एकैकस्मिन् पुरुषे प्रत्ययत्रिकात्मके युगपत् पर्यायेण वा एकैकप्रत्यये प्राप्ते द्वयोकयोर्द्विवचनैकवचने, 'बहुषु बहुवचन' मिति व्यवहारार्थमेकवचनादिसंज्ञां कथ्यते। अत्र तानि इति पदेन प्रथम-मध्यम-उत्तमाख्यानि तिङः त्रीणि त्रीणि परामृश्यन्ते। अतः लब्ध प्रथमादिसंज्ञानि इति। एकश इत्यस्य विवरणं प्रत्येकम् इति । संख्यैकवचनाच्च वीप्सायाम् इति शस् इति भावः। अधोलिखितेन फलकेन सूत्रमेतत् सम्यगवगन्तुं शक्यते -

| | **परस्मैपदम्** | **आत्मनेपदम्** |
|---|---|---|
| **त्रिकाः** | **पुरुषा एक. द्वि. बहु/** | **एक. द्वि. बहु.** |
| प्रथमत्रिकाः | (प्र.पु.) तिप-तस्- झि / | त-आताम्-झ |
| द्वितीयत्रिकाः | (म.पु.) सिप्-थस्-थ / | थास्-आथाम्-ध्वम् |
| तृतीयत्रिकाः | (उ.पु.) मिप्-वस्-मस् / | इड्- वहि -महिङ् |

**10. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः (१.४.१०४)**

युष्मदि, उपपदे, समानाधिकरणे, स्थानानि, अपि, मध्यमः इति पदच्छेदः। तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमाने अप्रयुज्यमाने च मध्यमः। तिङ् - वाच्य कारकवाचिनि युष्मदि प्रयुज्यमानेऽ-प्रयुज्यमाने च मध्यमः इति अर्थः लभते।

**11. अस्मद्युत्तमः। (१.४.१०६)**

अस्मदि उत्तमः इति पदच्छेदः। तथाभूते अस्मद्युत्तमः स्यात् इति सूत्रार्थः। उपपदे, समानाधिकरणे, स्थानिन्यपि, इति च अनुवर्तते। एवं तिङ्वाच्यकारकवाचिनि अस्मदि अप्रयुज्यमाने प्रयुज्यमाने च उत्तमः पुरुषः स्याद् इति अर्थः लभते।

**12. शेषे प्रथमः (१.४.१०७)**

शेषे प्रथमः इति द्विपदं सूत्रमिदम्। मध्यमोत्तमयोरविषये प्रथमः स्यात् इति सूत्रार्थः। उक्तात् मध्यम-उत्तम-विषयाद् अन्यः शेषः इति। एवं युष्मद् अस्मद् इति पदे विहाय तिङ्वाच्यकारकवाचिषु अप्रयुज्यमानेषु प्रयुज्यमानेषु पदेषु प्रथमः पुरुषः स्याद् इति।

**13. तिङ्शित्सार्वधातुकम् (३.४. ११३)**

तिङ्शित् सार्वधातुकम् इति पदच्छेदः। अनेन सार्वधातुकसंज्ञा विधीयते। तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः। अत्र धातोः इति अधिक्रियते। तेन तिङ्शितश्च धातुः अधिकारोक्ताः सार्वधातुक संज्ञाः स्युः इति सूत्रार्थः। सार्वधातुकार्धातुकयोः इत्यादावस्य प्रयोजनम्।

**14. कर्तरि शप् (३.१.६८)**

कर्तरि शप् इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण शप् विधीयते। कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात् इति सूत्रार्थः। अत्र धातोः इति पदम् अनुवर्तते। अत्र 'सार्वधातुके यक्' इत्यस्मात् सार्वधातुके' इति। अतः कर्त्रर्थे सार्वधातुके परे धातोः परः शप्-प्रत्ययः स्यात् इति अर्थः लभते।

## 15. सार्वधातुकार्धधातुकयोः (७.३.८४)

सार्वधातुकाऽऽर्धधातुकयोः इति समस्तपदं भवति। अनयोः परयोरिगन्ताङ्गस्य गुणः। यथा- भूधातोः लटि प्रथमपुषैकवचने तिप्प्रत्यये 'कर्तरिशप्' इति शप् प्रत्यये भू अ ति। अत्रानेन सूत्रेण गुणे भो अ ति। अवादेशे भवति।

### भवति

भू सत्तायाम्' इति "भूवादयो धातवः इति धातुसंज्ञायां 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे लकारस्य 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्गहिङ्' इति सूत्रेण तिबादयः अष्टादश लादेशाः प्राप्ते 'तङानावात्मनेपदम्' इति सूत्रेण त आताम् झ थास् आथाम् ध्वम्, इड् वहि महिङ् इत्येतेषां प्रत्ययानाम् आत्मनेपदसंज्ञायां 'शेषात् कर्तरि' 'लः परस्मैपदम्' इति भू-धातोः परस्मैपदे 'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः' इत्यनेन त्रयाणां त्रिकाणां प्रथम-मध्यम-उत्तम संज्ञायां 'तान्येकवचनद्विवचन-बहुवचनान्येकशः' इति तिङः त्रयाणां वचनानां क्रमश: एकवचन द्विवचन बहुवचन-संज्ञायां, प्राप्ते 'शेषे प्रथमः' इति सूत्रेण प्रथम पुरुषे 'द्वयोकयोर्द्विवचनैकवचने' इति एकवचने तिप्प्रत्यये अनुबन्धलोपे 'भू ति'। 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणे प्राप्ते 'भूसुवोस्तिङ्' इति निषेधे 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भू अ ति' इति। सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे 'भो अ ति'। 'एचोऽयवायावः' इति सूत्रेण अवादेशे भवति' इति रूपम्।

### भवतः

भूधातोः लट्लकारे 'वर्तमाने लट्' इति सूत्रेण लट् प्रत्यये अनुबन्धलोपे 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-ताञ्झथासाथाध्वमिड्वहिङ्गहिङ्' इति सूत्रेण तस्प्रत्यये 'भू तस्'। 'तिङ्शित्सार्वधातुकम् इति सार्वधातुक-संज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भू अ तस्' इति। सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे भवतस्'। सकारस्य रुत्वे विसर्गे च भवतः इति रूपं सिद्ध्यति।

**16. झोऽन्तः। (७.१.३)**

झः अन्तः इति पदच्छेदः। अनेन सूत्रेण अन्तदेशः विधीयते। प्रत्ययावयवस्य झस्यान्तादेशः स्यात् इति सूत्रार्थः। प्रत्ययावयवस्य झस्य अन्तादेशः भवति इति अर्थः। यथा- भवन्ति।

**भवन्ति**

भू-धातोः लट् इति लकारे तत्स्थाने प्रथम-पुरुष-बहुवचन-विवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-ताञ्झथासाथाध्वमिड्वहिङ्महिङ्' इति सूत्रेण झि प्रत्यये 'झोऽन्तः' इत्यनेन अन्तादेशे 'भु-अन्ति' इति स्थिते सार्वधातुकत्वात् 'कर्तरि शप्' इत्यनेन शप्प्रत्यये अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे अवादेशे 'अतो गुणे' इति सूत्रेण पररूपे 'भवन्ति' इति रूपम्।

**भवसि**

भूधातोः लट्लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे मध्यमपुरुषे एकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्महिङ्' इति सूत्रेण सिप्रत्यये अनुबन्धलोपे 'भू सि'। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भो अ सि' इति। अवादेशे 'भवसि' इति रूपम्।

**भवथः**

भूधातोः लट्लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे मध्यमपुरुष द्विवचने 'तिप्तस्झि-सिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्महिङ्' इति सूत्रेण थस्प्रत्यये 'भू थस्'। तिङ्शित्सा-र्वधातुकम् इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः इति गुणे कर्तरि शप्' इति सूत्रेण शप् प्रत्यये अनुबन्धलोपे 'भो अ थस्' इति। अवादेशे 'भवथस्'। सकारस्य रुत्वे विसर्गे च भवथः इति रूपं सिद्ध्यति।

**भवथ**

भूधातोः लट्लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे मध्यमपुरुषबहुवचने 'तिप्तस्झि-सिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिङ्महिङ्' इति सूत्रेण थप्रत्यये 'भू थ'। 'तिङ्शित्सार्वधातु-

कम्’  इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः’ इति गुणे ‘कर्तरि शप्’ इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भो अ थ' इति। अवादेशे संयोगे भवथ इति रूपं सिद्ध्यति।

17. **अतो दीर्घा यञि। (७.३.१०१)**

अतः दीर्घः यञि इति पदच्छेदः। अनेन सूत्रेण दीर्घः विधीयते। अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके इति सूत्रार्थः। अदन्ताङ्गस्य अलः स्थाने दीर्घो भवति यञादौ सार्वधातुके परे।  यथा -भवामि भवावः भवामः।

**भवामि**

भूधातोः लट्लकारे 'वर्तमाने लट्’  इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे उत्तमपुरुषे एकवचने ‘तिप्तस्झि-सिप्थस्थमिब्वस्मस्तातांझथासाथाध्वमिड्वहिमहिङ्’ इति सूत्रेण मिप्प्रत्यये अनुबन्धलोपे 'भू मि'। ‘तिङ्शित्सार्वधातुकम्’  इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः’ इति गुणे ‘कर्तरि शप्’ इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे ‘भो अ मि’ इति। अवादेशे ‘भव् अ मि’ इति जाते  'अतो दीर्घो यञि' इति अदन्ताङ्गस्य दीर्घे ‘भवामि’ इति रूपं सिद्धम्।

**भवावः**

भूधातोः लट्लकारे 'वर्तमाने लट्’  इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे उत्तमपुरुषे द्विवचने ‘तिप्तस्झि-सिप्थस्थमिब्वस्मस्तातांझथासाथाध्वमिड्वहिमहिङ्’ इति सूत्रेण वस्प्रत्यये अनुबन्धलोपे 'भू वस्'। ‘तिङ्शित्सार्वधातुकम्  इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः’ इति गुणे ‘कर्तरि शप्’ इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भो अ वस्' इति। अवादेशे ‘भव् अ वस्’ इति जाते 'अतो दीर्घो यञि' इति अदन्ताङ्गस्य दीर्घे संयोगे' ‘भवावस्’ इति स्थिते सकारस्य रुत्वे विसर्गे च कृते ‘भवावः’ रूपं सिद्धम्।

**भवामः**

भूधातोः लट्लकारे 'वर्तमाने लट्' इति सूत्रेण लट्प्रत्यये अनुबन्धलोपे उत्तमपुरुषे बहुवचने 'तिप्तस्झि-सिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिमहिङ्' इति सूत्रेण मस्प्रत्यये अनुबन्धलोपे 'भू वस्'। 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे 'कर्तरि शप्' इति सूत्रेण शप्प्रत्यये अनुबन्धलोपे 'भो अ मस्' इति। अवादेशे 'भव् अ मस्' इति जाते 'अतो दीर्घो यञि' इति अदन्ताङ्गस्य दीर्घे संयोगे 'भवामस्' इति स्थिते सकारस्य रुत्वे विसर्गे च कृते 'भवामः' रूपं सिद्धम्।

**प्रथमपुरुषः** सः भवति, तौ भवतः, ते भवन्ति।

**मध्यमपुरुषः** त्वं भवसि, युवां भवथः, यूयं भवथ।

**उत्तमपुरुषः** अहं भवामि, आवां भवावः, वयं भवामः।

## पुनरावृत्तिः (Recap)

- वर्तमाने लट् - लट् लकारः विधीयते।
- तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथाध्वमिड्वहिमहिङ् - अष्टादश तिङ्प्रत्ययाः।
- लः परस्मैपदम् - लस्य अष्टादशादेशस्य परस्मैपदसंज्ञा।
- तङानावात्मनेपदम् - लस्य तङ् प्रत्याहारः शानच् कानच् च आत्मनेपदसंज्ञा।
- अनुदात्तङित आत्मनेपदम् - अनुदात्तेतो ङितश्च धातोः आत्मनेपदसंज्ञा।
- स्वरितञितः कर्त्रभिप्राये क्रियाफले - स्वरितेत् ञित् वा धातोः आत्मनेपदं कर्तृगामिनि क्रियाफले।
- शेषात् कर्तरि आत्मनेपदं - आत्मनेपदहीनाद्धातोः कर्तरि परस्मैपदम्।
- तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः - प्रथम-मध्यम-उत्तमसंज्ञकाः स्युः।
- तान्येकवचनद्विवचनबहुवचनान्येकशः - एकवचन-द्विवचन-बहुवचनसंज्ञानि स्युः।
- युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः - युष्मदि उपपदे प्रयुज्यमाने मध्यमः भवति।

- अस्मद्युत्तमः - अस्मदि प्रयुज्यमाने उत्तमः भवति।
- शेषे प्रथमः - मध्यमोत्तमयोः अविषये धातोः प्रथमः।
- तिङ् शित् सार्वाधातुकं - तिङ् शित् च सार्वाधातुकसंज्ञा।
- कर्तरि शप् - विकरणप्रत्ययः शप् भवति।
- सार्वधातुकार्धधातुकयोः - गुणः भवति।
- झोऽन्तः - अन्तादेशः भवति।
- अतो दीर्घो यञि - दीर्घः भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भू झि इत्यत्र अन्तादेशः केन सूत्रेण विधीयते?
2. कर्तरि शप् इत्यनेन किं विधीयते?
3. तिङ् प्रत्ययाः कति?
4. लः परस्मैपदम् इति सूत्रस्य अपवादसूत्रं किम्?
5. केन सूत्रेण उत्तमः विधीयते?
6. तिङाम् एकवचनादि संज्ञा केन सूत्रेण?
7. भू अ ति इति स्थिते केन सूत्रेण गुणः विधीयते?
8. लट्लकारं विधीयमानं सूत्रं किम्?
9. आत्मनेपदं कस्य स्थाने विधीयते?
10. शप् कदा विधीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. अतो दीर्घो यञि इति सूत्रेण कस्य दीर्घादेशः भवति ? कदा भवति?

2. शेषे प्रथमः इत्यत्र कः शेषः?
3. तिङ् प्रत्ययाः कति ? के?
4. सार्वधातुकार्धधातुकयोः इति सूत्रस्य अर्थं लिखत।
5. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः अर्थं लिखत।
6. ञितो धातोः आत्मनेपदं कदा विधीयते?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्राणि व्याख्यात-**

1. तिङ्शित् सार्वधातुकम्।
2. अतो दीर्घो यञि
3. झोऽन्तः।
4. तान्येकवचनद्विवचनबहुवचनान्येकशः।
5. सार्वधातुकार्धधातुकयोः।

**सप्रमाणं प्रक्रियां साधयत-**

1. भू धातोः प्रथमपुरुष द्विवचनम्।
2. भू धातोः मध्यमपुरुष एकवचनम्।
3. भू धातोः उत्तमपुरुष बहुवचनम्।

## निर्दिष्टाभ्यासः (Assignments)

1. सूत्राणि व्याख्यात - तङानावात्मनेपदम्, अनुदात्तङित आत्मनेपदम्, स्वरितञितः कर्त्रभिप्राये क्रियाफले।
2. एतानि रूपाणि ससूत्रं साधयत - भवति, भवन्ति, भवामि।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. झोऽन्तः।
2. शप्।
3. अष्टादश।
4. तङानावात्मनेपदम्।
5. अस्मद्युत्तमः।
6. तान्येकवचनद्विवचनबहुवचनान्येकशः।
7. सार्वधातुकार्धधातुकयोः।
8. वर्तमाने लट्।
9. लस्य (लकारस्य)
10. कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात्।

## सूचनाग्रन्थाः (References)


1. श्रीवरदराजाचार्यकृतः लघुसिद्धान्तकौमुदी. श्रीसूर्यनारायणशुक्लः, 'बालमनोरमा' संस्कृत - हिन्दीटीका सहित प्रकाशकः, वाराणासी, संस्कृत संस्थान सीरीज़, १०००
2. श्रीमद्वरदराजाचार्यप्रणीता लघुसिद्धान्तकौमुदी. श्रीधरमुखोल्लासिनी, हिन्दी- व्याख्यासमन्विता व्याख्याकारः गोविन्दप्रसादशर्मा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
3. लघुसिद्धान्तकौमुदी प्रथमो भागः. प्रोफसर् आर् वासुदेवन् पोट्टि, सर्वकारीयसंस्कृत- कलालयः, तृप्पूणित्तुरा, १९९३

BLOCK-4

# लघुसिद्धान्तकौमुद्याः भ्वादिप्रकरणे भूधातोः लिट् - लृट्- लोट्लकारेषु रूपनिष्पत्तिः

SGOU

# Unit - 1
## ‘परोक्षे लिट्’ इत्यारभ्य ‘आर्धधातुकस्येड्वलादेः’ इति सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- धातुसम्बन्धिनः सामान्यस्वभावान् जानाति।
- परस्मैपदिनः लिट्लकारस्य परिनिष्ठतप्रत्ययान् गृह्णाति।
- भू धातोः लिटि रूपाणि अवगच्छति।
- भू धातोः लिटिरूपाणि निष्पादयितुं जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

दधाति शब्दान् इति धातुः। धातुः नाम क्रियावाचको शब्दविशेषः। ‘भूवादयो धातवः’ इति पाणिनीयसूत्रम्। क्रियावाचकाः भूप्रभृतयः धातुसंज्ञां लभन्ते। सर्वेषां नाम्नां प्रकृतिभूतः भूप्रभृतिभिः। तिङन्तरूपस्य पदस्य प्रकृतिः धातुः। धातुपाठे प्रायः द्विसहस्रं धातवः उपदिष्टाः। सिद्धान्तकौमुद्यां १९४४ धातवः दर्शिताः। धातवः अजन्ताः हलन्ताः चेति द्विविधाः। धातवः परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः चेति त्रिविधाः। प्रायेण अनुदात्तेतः आत्मनेपदिनः। प्रायेण परस्मैपदिनः उदात्तेतः भवन्ति। प्रायेण उभयपदिनः स्वरितेतः भवन्ति।

अस्माकं पाठभागे परस्मैपदिनः भू सत्तायाम् इति धातोः रूपनिष्पत्तिरेव पठनाय वर्तते।

धातवः दशसु गणेषु विभक्ताः सन्ति। तेषु प्रथमः गणः भवति भ्वादिगणः। दशलकाराः च सन्ति। तेषु प्रथमः लकारः भवति लट्। लट् वर्तमानकाले प्रयुज्यते इत्यादिकं वयं जानीमः। द्वितीयः लकारः भवति लिट्। लिट् भूतकाले प्रयुज्यते। लिटः प्रत्ययान् परिनिष्ठितप्रत्ययान् रूपाणि च पठितुमवसरः। तदेव अस्मिन्नेकके वर्तते। अतः सन्नद्धं पाठभागं प्रविशामः।

## मुख्यपदानि (Keywords)

परोक्षे लिट्, परस्मैपदानां णलतुसुस्थलथुसणल्वमाः, वुगागमः, अनाभ्यासस्य अभ्यासः, हलादिः शेषः, ह्रस्वः, भवतेरः, अभ्यासे चर्च, लिट् च, इडागमः।

## Discussion

लटः इव लिटः अपि नवप्रत्ययाः। ते

| | | |
|---|---|---|
| तिप् | तस् | झि |
| सिप् | थस् | थ |
| मिप् | वस् | मस् |

तेषां नवानां प्रत्ययानां नव परिनिष्ठितताः प्रत्ययाः सन्ति। ते

| | | |
|---|---|---|
| अ (णल्) | अतुः (अतुस्) | उः (उस्) |
| थ (थल्) | अथुः (अथुस्) | अ |
| अ (णल्) | व | म |

झटिति पठनाय लिटः रूपाणि पठामः। तानि

**भू-धातुः लिट् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | बभूव | बभूवतुः | बभूवुः |
| **मध्यमपुरुषः** | बभूविथ | बभूवथुः | बभूव |
| **उत्तमपुरुषः** | बभूव | बभूविव | बभूविम |

### 1. परोक्षे लिट् (३.२.११५)

द्विपदम् सूत्रम्। अनेन सूत्रेण लिट् विधीयते। भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट् स्यात्। अर्थात् भूतं भवेत्, अद्यतनं भवेत् (न अद्यतनम् अनद्यतनम् - अतीतायाः रात्रेः अन्त्ययामेन

आगमिरात्रेराद्ययामेन सहितो दिवसः अद्यतनः।) पारोक्ष्यं च भवेत्। पारोक्ष्यं नाम इन्द्रियगोचरत्वम्। यथा बभूव। भूधातोः परोक्षेलिट् इति लिट्लकारः। तिप्तस्झि .... इत्यादिना तिप्। भू ति।

**2. परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (३.४. ८२)**

द्विपदम् सूत्रम्। लिटस्तिबादीनां नवानां णलादयः स्युः इति सूत्रार्थः। यथा बभूव। भूधातोः परोक्षेलिट् इति लिटि भू लिट्। तिप्तस्झि .... इत्यादिना भू ति। अनेन सूत्रेण तिपः स्थाने णलि भू णल्। णलि अकार एव शिष्यते। भू अ।

**3. भुवो वुग्लुङ्लिटोः (६.४.८८)**

भुवः वुक् लिङ्लिटोः  इति त्रिपदम् सूत्रम्। अनेन सूत्रेण वुगागमः विधीयते। लुङ् च लिट् च लुङ्लिटौ, तयोः लुङ्लिटोः। भुवो वुगागमः स्यात् लुङ्लिटोरचि इति सूत्रार्थः। वुगागमे व् शिष्यते। यथा बभूव। भू धातोः परोक्षेलिट् इति लिट्। तिप्तस्झि .... इत्यादिना तिपि भू ति। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इति सूत्रेण णलि भू अ। अत्र भुवो वुग्लुङ्लिटोः इति वुगागमे भूव् अ।

**4. लिटि धातोरनभ्यासस्य (६.१.८)**

लिटि धातोः अनभ्यासस्य इति त्रिपदं सूत्रम्। अनेन सूत्रेण द्वित्वं विधीयते। लिटि परे अनभ्यास-धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः आदिभूतादचः परस्य तु द्वितीयस्य इति सूत्रार्थः। यत्र द्वे विहिते तस्य पूर्वस्य अभ्याससंज्ञा। अभ्यासरहितः अनभ्यासः। यथा बभूव। भू धातोः परोक्षेलिट् इति लिट्। तिप्तस्झि .... इत्यादिना तिपि भू ति। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इति सूत्रेण णलि भू अ। अत्र भुवो वुग्लुङ्लिटोः इति वुगागमे भूव् अ। अत्र अनभ्यासधात्वावयवस्य एकाच् भवति भूव्। तस्य लिटिधातोरनभ्यासस्य इति द्वित्वे भूव् भूव् अ।

**5. पूर्वोऽभ्यासः ( ६.१.४)**

पूर्वः  अभ्यासः  इति द्विपदं सूत्रम्। अनेन सूत्रेण अभ्याससंज्ञः विधीयते। ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् इति सूत्रार्थः।

यथा भूव् भूव् अ इत्यत्र पूर्वस्य भूव् इत्यस्य अभ्याससंज्ञा। अभ्यासे चर्च इत्यादावस्य प्रयोजनम्।

**6. हलादिः शेषः (७.४.६०)**

हलादिः शेषः इति द्विपदं सूत्रम्। अनेन सूत्रेण अभ्यासस्यादिः हल् शिष्यते, अन्ये हलो लुप्यन्ते। यथा बभूव। भू धातोः लिटि तिप्तस्झि ....... इत्यादिना तिपि भू ति। परस्मैपदानां णलतुसुस्थलथु - सणल्वमाः इति सूत्रेण णलि भू अ। भुवो वुग्लुङ्लिटोः इति वुगागमे भूव् अ। लिटिधातोरनभ्यासस्य इति द्वित्वे भूव् भूव् अ। अत्र पूर्वस्य भूव् इत्यस्य अभ्याससंज्ञायां हलादिः शेषः इति सूत्रेण आदिः हल् शिष्यते। अर्थात् वलोपः। भू भूव् अ।

**7. ह्रस्वः (७.४.५९)**

ह्रस्वः इति एकपदं सूत्रम्। अभ्यासस्याचो ह्रस्वः स्यात्। यथा बभूव। भू धातोः परोक्षेलिट् इति लिटि भू लिट्। तिपि। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इति सूत्रेण णलि भू अ। भुवो वुग्लुङ्लिटोः इति वुगागमे भूव् अ। लिटिधातोरनभ्यासस्य इति द्वित्वे भूव् भूव् अ। हलादिः शेषः इति हलादिशेषे भू भूव् अ। अत्र अनेन ह्रस्वः इति सूत्रेण ह्रस्वे भु भूव् अ।

**8. भवतेरः (७.४.७३)**

भवतेः अः इति द्विपदं सूत्रम्। अनेन सूत्रेण अत्वं विधीयते। भवतेः इत्यस्य भू धातोः इत्यर्थः। भवतेरभ्यासस्योकारस्य अः स्याल्लिटि इति सूत्रार्थः। यथा बभूव। भू धातोः परोक्षेलिट् इति लिटि भू लिट्। तिपि।परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इति सूत्रेण णलि भू अ। भुवो वुग्लुङ्लिटोः इति वुगागमे भूव् अ। लिटिधातोरनभ्यासस्य इति द्वित्वे भूव् भूव् अ। हलादिः शेषः इति हलादिशेषे भू भूव् अ। अत्र अनेन ह्रस्वः इति सूत्रेण ह्रस्वे भु भूव् अ। अत्रानेन भवतेरः इति सूत्रेण उकारस्यात्वे भ भूव् अ।

## 9. अभ्यासे चर्च (८.४.५३)

अभ्यासे चर् च इति त्रिपदं सूत्रम्। अनेन सूत्रेण चर्त्वं जश्त्वं च विधीयते। अभ्यासे झलां चरः स्युः जशश्च इति सूत्रार्थः। झशां जशः, खयां चरः। वर्गाणां तृतीयचतुर्थाः झशाः। यथा बभूव।

**बभूव -**

भूधातोः 'परोक्षे लिट्' इति सूत्रेण लिटि तस्य स्थाने प्रथमपुरुषैकवचने 'तिप्तस्झि ......' इत्यादि सूत्रेण तिपि भू ति। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपः णलादेशे अनुबन्धलोपे 'भू-अ'। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण भूधातोः वुगागमे अनुबन्धलोपे कित्वाद् अन्त्यावयवे 'भूव् अ'। 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति प्रथमस्य भूव् इत्यस्याभ्याससंज्ञायां 'हलादिः शेषः' इति वलोपे 'ह्रस्वः' इति उकारस्य ह्रस्वे 'भु भूव् अ'। 'भवतेरः' इति अभ्यासोकारस्य अकारे 'भ भूव् अ'। 'अभ्यासे चर्च' इति पूर्वभकारस्य जश्त्वेन बकारे बभूव इति रूपम्।

**बभूवतुः -**

भूधातोः 'परोक्षे लिट्' इति लिटि 'भू लिट्' प्रथमपुरुषद्विवचने 'तिप्तस्झि ......' इत्यादिना तसि 'भू तस्'। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण अतुसि 'भू अतुस्'। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे 'भूव् अतुस्'। द्वित्वे 'भूव् भूव् अतुस्'। 'हलादिः शेषः' इति हलादिशेषे 'भू भूव् अतुस्'। 'ह्रस्वः' इति ह्रस्वे 'भु भूव् अतुस्'। 'भवतेरः' इति अत्वे 'भभूव् अतुस्'। 'अभ्यासे चर्च' इति चर्त्वे 'बभूवतुस्'। रुत्वे खरवसालयोर्विसर्जनीयः इति विसर्गे 'बभूवतुः' इति रूपम्।

**बभूवुः -**

भूधातोः लिटि प्रथमपुरुषबहुवचने 'तिप्तस्झि ......' इत्यादिना झिप्रत्यये 'भू झि'। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण उसि 'भू उस्'। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे 'भूव् उस्'। 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'भूव् भूव् उस्'। 'हलादिः शेषः' इति हलादिशेषे 'भू

भूव् उस्’। 'ह्रस्वः' इति ह्रस्वे ‘भु भूव् उस्’। 'भवतेरः' इति अत्वे ‘भभूव् उस्’। 'अभ्यासे चर्च' इति चर्त्वे ‘बभूवुस्’। ‘ससजषो रुः’ इति रुत्वं ‘बभूवुर्’। विसर्गे ‘बभूवुः’ इति रूपम्।

**10. लिट् च (३.४.११५)**

द्विपदं सूत्रम्। अनेन सूत्रेण अर्धाधातुकसंज्ञः विधीयते। लिडादेशस्तिङ् आर्धाधातुसंज्ञः स्यात्। आर्धाधातुकस्येड्वलादेः इत्यादावस्य प्रयोजनम्।

**11. आर्धधातुकस्येड् वलादेः (७.३.३५)**

आर्धधातुकस्य इट् वलादेः इति त्रिपदं सूत्रम्। अनेन सूत्रेण इडागमः विधीयते। आर्धधातुकस्य इडागमः स्यात् इति सूत्रार्थः। यथा बभूविथ।

**बभूविथ -**

भूधातोः ‘परोक्षे लिट्’ इति लिटि अनुबन्धलोपे मध्यममपुरुषैकवचने तस्य स्थाने ‘तिप्तस्झि ......’ इत्यादिना सिपि ‘भू सि’। अत्र ‘लिट् च’ इति सूत्रेण आर्धधातुकत्वे ‘परस्मैपदानां णलतुसुस्थलथु - सणल्वमाः’ इति सूत्रेण सिपः थलादेशे ‘भू थ’। अत्र ‘स्थानिवदादेशोऽनल्विधौ’ इति स्थानिवद्भावने थस्य आर्धधातुकत्वात् ‘आर्धधातुकस्येड् वलादेः’ इति इडागमे ‘भू इ थ’। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे ‘लिटि धातोरनभ्यासस्य’ इति सूत्रेण द्वित्वे ‘भूव् भूव् इ थ’। 'पूर्वोऽभ्यासः' इत्याभ्यासत्वे ‘हलादिः शेषः' इति वस्य लोपे ‘भू भूव् इ थ’। 'ह्रस्वः' इति ह्रस्वे ‘भु भूव् इ थ’। 'भवतेरः' इति अत्वे ‘भभूव् इ थ’। 'अभ्यासे चर्च' इति भस्य बकारे ‘बभूविथ’ इति रूपम्।

**बभूवथुः -**

'भूधातोः ‘परोक्षे लिट्’ इति लिटि भू लिट् मध्यमपुरुषद्विवचने ‘तिप्तस्झि ......’ इत्यादिना थसि ‘भू थस्’। ‘परस्मैपदानां णलतुसुस्थलथुसणल्वमाः’ इति सूत्रेण अथुसि ‘भू अथुस्’। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे ‘भूव् अथुस्’। द्वित्वे ‘भूव् भूव् अथुस्’। ‘हलादिः शेषः' इति हलादिशेषे ‘भू भूव् अथुस्’। 'ह्रस्वः' इति ह्रस्वे ‘भु भूव् अथुस्’। 'भवतेरः' इति अत्वे ‘भभूव् अथुस्’। 'अभ्यासे चर्च' इति चर्त्वे ‘बभूवथुस् ‘। रुत्वे ‘खरवसालयोर्विसर्जनीयः’ इति विसर्गे ‘बभूवथुः’ इति रूपम्।

**बभूव -**

भूधातोः 'परोक्षे लिट्' इति सूत्रेण लिटि तस्य स्थाने मध्यमपुरुषबहुवचने 'तिप्तस्झि ......' इत्यादि सूत्रेण थप्रत्यये 'भू थ'। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण थस्य णलादेशे 'भू-अ'। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण भूधातोः वुगागमे अनुबन्धलोपे कित्वाद् अन्त्यावयवे 'भूव् अ'। 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति प्रथमस्य भूव् इत्यस्याभ्याससंज्ञायां 'हलादिः शेषः' इति वलोपे 'ह्रस्वः' इति उकारस्य ह्रस्वे 'भु भूव् अ'। 'भवतेरः' इति अभ्यासोकारस्य अकारे 'भ भूव् अ'। 'अभ्यासे चर्च' इति पूर्वभकारस्य जश्त्वेन बकारे 'बभूव' इति रूपम्।

**बभूव -**

भूधातोः 'परोक्षे लिट्' इति सूत्रेण लिटि तस्य स्थाने उत्तमपुरुषैकवचने 'तिप्तस्झि ......' इत्यादि सूत्रेण मिपि 'भू मि'। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण मिपः णलादेशे अनुबन्धलोपे 'भू-अ'। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण भूधातोः वुगागमे अनुबन्धलोपे कित्वाद् अन्त्यावयवे 'भूव् अ'। 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति प्रथमस्य भूव् इत्यस्याभ्याससंज्ञायां 'हलादिः शेषः' इति वलोपे 'ह्रस्वः' इति उकारस्य ह्रस्वे 'भु भूव् अ'। 'भवतेरः' इति अभ्यासोकारस्य अकारे 'भ भूव् अ'। 'अभ्यासे चर्च' इति पूर्वभकारस्य जश्त्वेन बकारे 'बभूव' इति रूपम्।

**बभूविव -**

भूधातोः 'परोक्षे लिट्' इति लिटि अनुबन्धलोपे उत्तमपुरुषद्विवचने तस्य स्थाने 'तिप्तस्झि ......' इत्यादिना वसि 'भू वस्'। अत्र 'लिट् च' इति सूत्रेण आर्धधातुकत्वे 'परस्मैपदानां णलतुसुस्थलथु-सणल्वमाः' इति सूत्रेण वसः वादेशे भू व। अत्र स्थानिवदादेशोऽनल्विधौ इति स्थानिवद्भावने वस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड् वलादेः' इति इडागमे 'भू इ व'। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'भूव् भूव् इ व'। 'पूर्वोऽभ्यासः' इत्याभ्यासत्वे 'हलादिः शेषः' इति वस्य लोपे 'भू भूव् इ व'। 'ह्रस्वः' इति ह्रस्वे 'भु भूव् इ व। 'भवतेरः' इति अत्वे 'भभूव् इ व'। 'अभ्यासे चर्च' इति भस्य बकारे 'बभूविव' इति रूपम्।

**बभूविम -**

भूधातोः 'परोक्षे लिट्' इति लिटि अनुबन्धलोपे उत्तमपुरुषबहुवचने तस्य स्थाने 'तिप्तस्झि ......' इत्यादिना वसि 'भू मस्'। अत्र 'लिट् च' इति सूत्रेण आर्धधातुकत्वे 'परस्मैपदानां णलतुसुस्थलथु-सणल्वमाः' इति सूत्रेण मसः मादेशे 'भू म'। अत्र 'स्थानिवदादेशोऽनल्विधौ' इति स्थानिवद्भावने वस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड् वलादेः' इति इडागमे 'भू इ म'। 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण वुगागमे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'भूव् भूव् इ म'। 'पूर्वोऽभ्यासः' इत्याभ्यासत्वे 'हलादिः शेषः' इति वस्य लोपे 'भू भूव् इ म'। 'ह्रस्वः' इति ह्रस्वे 'भु भूव् इ म'। 'भवतेरः' इति अत्वे 'भभूव् इ म'। 'अभ्यासे चर्च' इति भस्य बकारे 'बभूविम' इति रूपम्।

## पुनरावृत्तिः (Recap)

- लटः इव लिटः अपि नव प्रत्ययाः।
- परोक्षे लिट् इति सूत्रेण लिट्।
- भिटिधातोरनभ्यासस्य इति द्वित्वम्।
- हलादिः शेषः इति हलादिशेषः।
- अभ्यासे चर्च इति चर्त्वम्।
- भूधातोः लिटि प्रथमपुरुषद्विवचनरूपं बभूवतुः।
- आर्धधातुकस्येड् वलादेः इति इडागमः।
- प्रथमपुरुषरूपाणि - बभूव- बभूवतुः -बभूव।
- मध्यमपुरुषरूपाणि - बभूविथ-बभूवथुः - बभूव
- उत्तमपुरुषबहुवचनरूपाणि - बभूव- बभूविव-बभूविम।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. परोक्षेभूतकाले कः लकारः प्रयुज्यते ?
2. परस्मैपदे लिटः स्थाने आगताः परिनिष्ठप्रत्ययाः के ?
3. अभ्याससंज्ञा केन सूत्रेण विधीयते ?
4. अभ्यासस्यादिः हल् शिष्यते केन सुत्रेण?
5. भवतेः इत्यस्य कोऽर्थः?
6. वुगागमः केन सूत्रेण विधीयते ?
7. ह्रस्वः इति सूत्रस्य वृत्तिः का ?
8. अभ्यासे चर्च इति सुत्रेण किं विधीयते ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. अभ्याससंज्ञाविधायकं सूत्रं व्याख्यात।
2. बभूव इति रूपनिष्पत्तिः कथं भवति?
3. लिट् च इति सूत्रस्यावश्यकता का ?
4. बभूवथुः इत्यस्य रूपनिष्पत्तिः कथं भवति?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्राणि व्याख्यात-**

1. परस्मैपदानां णलतुसुस्थलथुसणल्वमाः।
2. परोक्षे लिट्।
3. भवतेरः।

**सप्रमाणं रूपाणि साधयत**

1. मध्यमपुरुषैकवचनम्
2. उत्तमपुरुषबहुवचनम्
3. मध्यमपुरुषबहुवचनम्

## निर्दिष्टाभ्यासः (Assignments)

1. सोदाहरणं शूत्राणि व्याख्यात - भूवो वुग्लुङ्लिटोः, लिट् च, आर्धधातुकस्येड्वलादेः
2. बभूव बभूविम बभूवथुस् - एतानि रूपाणि साधयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. लिट्।
2. अ णल् अतुः अतुस् उः उस् थ थल् अथुः अथुस् अ अ णल् व म।
3. पूर्वोऽभ्यासः।
4. हलादिः शेषः।
5. भूधातोः इत्यर्थः।
6. भूवो वुग्लिङ्लिटोः।
7. अभ्यासस्याचो ह्रस्वः स्यात्।
8. जश्त्वं चर्त्वं च विधीयते।

## सूचनाग्रन्थाः (References)

1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारती प्रकाशन, वारणसी २०११ पुटानि १०१-१०२

2. वरदराजाचार्यः,लघुसिद्धान्तकौमुदी, व्याख्या, श्रीगिरिशकुमारठक्कुरः, कृष्णदास अकादमी वारणासी १९९८ पुटानि ८८-८९
3. जनार्दन हेगदे, धातुरूपनन्दिनी, संस्कृतभारती, नवदेहली, पुटानि (I-XVIII).

SGOU

# Unit - 2
## भूधातोः लृटि रूपनिष्पत्तिः

### उद्देश्यानि (Learning Outcomes)

- धातुसम्बन्धान् सामान्यस्वभावान् जानाति।
- भूत - वर्तमान - भविष्यत्काले प्रयुक्तमानानां लकारणां सामान्यवबोधं जानाति।
- सामान्यभाविनं लृट्लकारं गृह्णाति।
- भूधातोः लृट्लकाररूपाणि अवगच्छति।

### प्राग्व्यपेक्षाः (Prerequisites)

धीयते सर्वमस्मिन्निति धातुः। आरोग्यशास्त्रे इव भाषायामपि सर्वं कार्यं धातुसम्बन्धं भवति। क्रियावाचकः शब्दविशेषः धातुः। शब्दादेव सर्वं ज्ञानमुत्पाद्यते। शब्दः नाम ज्योतिरेव। शब्दाः धात्वाश्रयाः। आकृत्यानुसारं परस्मैपद - आत्मनेपद - उभयपदभेदात् धातुः त्रिविधः। परस्मैपदधातवः प्रायेणउदात्तेतः भवन्ति। दशलकाराः। वर्तमानकाले लट्लकारः। भूतकाले लिट् - लङ् - लुङ् च सन्ति। सामान्यभाविकाले लृट्लकारः। अस्मिन् एकके परस्मैपदिनः लृटः परिनिष्ठितप्रत्ययान् रूपाणि चाधिकृत्य पठामः। सश्रद्धं पाठभागं प्रविश्यामः।

### मुख्यपदानि (Keywords)

लृट् शेषे च, स्यप्रत्ययः. आर्धधातुकसंज्ञाः, इडागमः, भविष्यति, भविष्यतः, भविष्यन्ति, भविष्यसि भविष्यामः।

## Discussion

लट्लिटौ इव लृटः अपि नवप्रत्ययाः। लृटः परिनिष्ठितप्रत्ययाः यथा

| | | |
|---|---|---|
| स्यति | स्यतः | स्यन्ति |
| स्यसि | स्यथः | स्यथ |
| स्यामि | स्यावः | स्यामः |

झटिति पठनाय लृटः रूपाणि पठामः

**भू-धातु लृट् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचन** |
|---|---|---|---|
| **प्रथमपुरुषः** | भविष्यति | भविष्यतः | भविष्यन्ति |
| **मध्यमपुरुषः** | भविष्यसि | भविष्यथः | भविष्यथ |
| **उत्तमपुरुषः** | भविष्यामि | भविष्यावः | भविष्यामः |

1. **लृट् शेषे च (३.३.१३)**

   लृट्  शेषे च इति त्रिपदं सूत्रम्। अनेन सूत्रेण लृट्लकारः विधीयते। भविष्यदर्थाद्धातोर्लृट् क्रियार्थायां क्रियायां सत्यामसत्यां वा। यथा - भविष्यति। भू धातोः परस्मैपदि लृटि प्रथमपुरुषैकवचनं रूपम्। भूधातोः 'लृट् शेषे च' इति सूत्रेण लृट्। भू लृट्।

2. **स्यतासी लृलुटोः (३.१.३३)**

   स्यतासी लृलुटोः इति द्विपदं सूत्रम्। अनेन सूत्रेण स्यतासी विधीयेते। स्य च तासि च स्यतासि। तासेरिकारः उच्चारणार्थः। लृ च लुट् च लृलुटौ, तयोः लृलुटोः। लृ इत्यनेन लृट् लुङ् च गृह्यते। धातोः स्यतासी एतौ प्रत्ययौ स्तः लृलुटोः परतः। यथा - भविष्यति। यथा भूधातोः 'लृट् शेषे च' इति लृटि 'तिप्तस्झि ...' इत्यादि  सूत्रेण तिपि भू ति। अत्रानेन 'स्यतासी लृलुटोः' इति स्यप्रत्यये भू स्य ति।

## 3. आर्धधातुकं शेषः (३.४.११४)

आर्धधातुकम् शेषः  इति द्विपदं सूत्रम्। अनेन आर्धधातुकसंज्ञः विधीयते। तिङ्ङ्भ्योऽन्यो धातोरिति विहितः प्रत्ययः आर्धधातुकसंज्ञः स्यात्। तिङ्गशित्सार्वधातुकं इति सूत्रान्यदन्यस्यार्धधातुकत्वम्। आर्धाधातुकस्येड् वलादेः इत्यादावस्य प्रयोजनम्।

**भविष्यति -**

भूधातोः कर्त्रर्थे 'लृट्  शेषे' च इति सूत्रेण लृट् लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अनूबन्धलोपे  'भू ति' इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अनुबन्धलोपे 'भू स्य ति'। अत्र स्यप्रत्ययस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे 'भू इ स्य ति'। अत्र 'सार्वधातुकार्धधातुकयोः'  इति गुणे अवादेशे संयोगे 'भवि स्य ति'। अत्र स्य इत्यत्र 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे 'भविष्यति' इति रूपम्।

**भविष्यतः -**

भूधातोः कर्त्रर्थे 'लृट्  शेषे' च इति सूत्रेण लृट् लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये 'भू तस्' इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अनुबन्धलोपे 'भू स्य तस्'। अत्र स्यप्रत्ययस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे 'भू इ स्य तस्'। अत्र 'सार्वधातुकार्धधातुकयोः'  इति गुणे अवादेशे संयोगे 'भवि स्य तस्'। अत्र स्य इत्यत्र 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे रुत्वे विसर्गे च 'भविष्यतः' इति रूपम्।

**भविष्यन्ति -**

भूधातोः कर्त्रर्थे 'लृट्  शेषे' च इति सूत्रेण लृट् लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण प्रथमपुरुषबहुवचने झिप्रत्यये 'भू झि' इति जाते 'झोऽन्तः' इत्यनेन अन्तादेशे भू अन्ति। 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अनुबन्धलोपे 'भू स्य अन्ति'। अतो गुणे इत्यनेन पररुपे 'भू स्यन्ति'। अत्र

स्यप्रत्ययस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे भू इ स्यन्ति। अत्र 'सार्वधातुकार्धाधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे भवि स्यन्ति। अत्र स्य इत्यत्र 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्यन्ति इति रूपम्।

**भविष्यसि -**

भू-धातोः कर्त्रर्थे 'लृट् शेषे' च इति सूत्रेण लृट् लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण मध्यमपुरुषैकवचने सिप्प्रत्यये अनूबन्धलोपे 'भू सि' इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अनुबन्धलोपे 'भू स्य सि'। अत्र स्यप्रत्यस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे 'भू इ स्य सि'। अत्र 'सार्वधातुकार्धाधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे 'भवि स्य सि'। अत्र स्य इत्यत्र 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे 'भविष्यसि' इति रूपम्।

**भविष्यथः-**

भूधातोः कर्त्रर्थे 'लृट् शेषे' च इति सूत्रेण लृट् लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण मध्यमपुरुद्विवचने थस्प्रत्यये 'भू थस्' इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अनुबन्धलोपे 'भू स्य थस्'। अत्र स्यप्रत्यस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे 'भू इ स्य थस्'। अत्र 'सार्वधातुकार्धाधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे 'भवि स्य थस्'। अत्र स्य इत्यत्र 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे रुत्वे विसर्गे च कृते 'भविष्यथः' इति रूपम्।

**भविष्यथ-**

भूधातोः कर्त्रर्थे 'लृट् शेषे' च इति सूत्रेण लृट् लकारे तत्स्थाने 'तिप्तस्झि.....' इत्यादि सूत्रेण मध्यमपुरुषबहुवचने थप्रत्यये 'भू थ' इति जाते 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये अनुबन्धलोपे 'भू स्य थ'। अत्र स्यप्रत्यस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे 'भू इ स्य थ'। अत्र 'सार्वधातुकार्धाधातुकयोः' इत्यनेन गुणे

अवादेशे संयोगे ‘भवि स्य थ’। अत्र स्य इत्यत्र ‘आदेशप्रत्ययोः’ इति सूत्रेण षत्वे भविष्यथः इति रूपम्।

**भविष्यामि -**

भूधातोः कर्त्रर्थे ‘लृट् शेषे’ च इति सूत्रेण लृट् लकारे तत्स्थाने ‘तिप्तस्झि.....’ इत्यादि सूत्रेण उत्तमपुरुषैकवचने मिप्प्रत्यये अनूबन्धलोपे ‘भू मि' इति जाते ‘स्यतासी लृलुटोः’ इत्यनेन स्यप्रत्यये अनुबन्धलोपे ‘भू स्य मि’। अत्र स्यप्रत्यस्य 'आर्धधातुकं शेषः’ इति सूत्रेण आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड् वलादेः' इति सूत्रेण स्य इत्ययस्य इडागमे ‘भू इ स्य मि’। अत्र ‘सार्वधातुकार्धाधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे ‘भवि स्य मि’। अत्र स्य इत्यत्र ‘आदेशप्रत्ययोः’ इति सूत्रेण षत्वे ‘भविष्यमि’ इति जाते ‘अतो दीर्घो यञि’ इत्यनेन दीर्घे च ‘भविष्यामि’ इति रूपम्।

**भविष्यावः -**

भूधातोः कर्त्रर्थे ‘लृट् शेषे’ च इति सूत्रेण लृट् लकारे तत्स्थाने ‘तिप्तस्झि.....’ इत्यादि सूत्रेण उत्तमपुरुषद्विवचने वस्प्रत्यये ‘भू वस्' इति जाते ‘स्यतासी लृलुटोः’ इत्यनेन स्यप्रत्यये अनुबन्धलोपे ‘भू स्य वस्’। अत्र स्यप्रत्यस्य 'आर्धधातुकं शेषः’ इति सूत्रेण आर्धधातुकसंज्ञायां ‘आर्धधातुकस्येड् वलादेः’ इति सूत्रेण स्य इत्ययस्य इडागमे ‘भू इ स्य वस्’। अत्र ‘सार्वधातुकार्धाधातुकयोः' इत्यनेन गुणे अवादेशे संयोगे ‘भवि स्य वस्’। अत्र स्य इत्यत्र ‘आदेशप्रत्ययोः’ इति सूत्रेण षत्वे, ‘अतो दीर्घो यञि’ इत्यनेन दीर्घे च ‘भविष्यावस्’ सस्य रुत्वे विसर्गे च कृते ‘भविष्यावः’ इति रूपम्।

**भविष्यामः -**

भूधातोः कर्त्रर्थे ‘लृट् शेषे’ च इति सूत्रेण लृट् लकारे तत्स्थाने ‘तिप्तस्झि.....’ इत्यादि सूत्रेण उत्तमपुरुषबहुवचने मस्प्रत्यये ‘भू मस्' इति जाते ‘स्यतासी लृलुटोः’ इत्यनेन स्यप्रत्यये अनुबन्धलोपे ‘भू स्य मस्’। अत्र स्यप्रत्यस्य 'आर्धधातुकं शेषः’ इति सूत्रेण आर्धधातुकसंज्ञायां ‘आर्धधातुकस्येड् वलादेः’ इति सूत्रेण स्य इत्ययस्य इडागमे ‘भू इ स्य मस्’। अत्र ‘सार्वधातुकार्धाधातुकयोः' इत्यनेन

गुणे अवादेशे संयोगे 'भवि स्य मस्' । अत्र स्य इत्यत्र 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे, 'अतो दीर्घो यञि' इत्यनेन दीर्घे च 'भविष्यामस्' सस्य रुत्वे विसर्गे च कृते 'भविष्यामः' इति रूपम् ।

## पुनरावृत्तिः (Recap)

- लृट् शेषे च इति सूत्रेण सामान्यभूते लृट् विधीयते ।
- स्यतासी लृलुटोः इत्यनेन स्य तासि प्रत्ययौ विधीयेते ।
- आर्धधातुकं शेषः इति सूत्रेण आर्धाधातुकसंज्ञा विधीयते ।
- अतो दीर्घो यञि इति सूत्रेण उत्तमपुरुषे दीर्घं विधीयते ।
- लृटि प्रथमपुरुषरूपाणि - भविष्यति -भविष्यतः - भविष्यन्ति ।
- लृटि मध्यमपुरुषरूपाणि - भविष्यसि -भविष्यथः - भविष्यथ ।
- लृटि उत्तमपुरुषरूपाणि - भविष्यामि -भविष्यावः- भविष्यामः ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. स्यप्रत्ययः केन सूत्रेण विधीयते ?
2. परस्मैपदी लृटि उत्तमपुरुषे परिनिष्ठित प्रत्ययाः के?
3. भविष्यति कः लकारः?
4. भू झि इत्यत्र केन सूत्रेण अन्तादेशः विधीयते ?
5. भू इ स्य ति इत्यवस्थायां गुणः केन सूत्रेण विधीयते
6. एचोऽयवायावः इति सूत्रेण कानि विधीयन्ते?
7. भविष्यामर् कथं भविष्यामः इत्यायाति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. लृटि आर्धधातुकसंज्ञविधानस्य सूत्रस्यावश्यकता का ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्राणि व्याख्यात -**

1. लृट् शेषे च ।
2. स्यतासि लृलुटोः ।
3. आर्धधातुकं शेषः ।

**रूपाणि सप्रमाणं साधयत -**

1. लृटि मध्यमपुरुषैकवचनम् ।
2. लृटि उत्तमपुरुषद्विवचनम् ।
3. लृटि प्रथमपुरुषबहुवचम् ।

## निर्दिष्टाभ्यासः (Assignments)

रूपाणि सप्रमाणं निष्पादयत - भविष्यन्ति भविष्यथः भविष्यामि

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. स्यतासि लृलुटोः इति सूत्रेण ।
2. स्यामि - स्यावः- स्यामः ।
3. लृट् ।
4. झोऽन्तः इति सूत्रेण ।
5. सार्वधातुकार्धधातुकयोः इति सुत्रेण ।

6. अयवायावः विधीयन्ते।
7. खरवसानयोर्विसर्जनीयः इति सूत्रेण।

## सूचनाग्रन्थाः (References)


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुभारती प्रकाशन, वारणसी २०११, पुटं- १०३
2. वरदराजाचार्यः,लघुसिद्धान्तकौमुदी, व्याख्या, श्रीगिरिशकुमारठक्कुरः, कृष्णदास अकादमी वारणासी १९९८, पुटानि ८९-९०
3. भट्टोजिदीक्षितः, वैय्याकरणसिद्धान्तकौमुदी, बालमनोरमा टीका, तृतीयः भागः चौखम्बा संस्कृत सिरीज़ आफीस, वारणसि, १९६९, पुटं -१३

# Unit - 3
## भूधातोः लोटि रूपनिष्पत्तिः

## उद्देश्यानि (Learning Outcomes)

- धातुसम्बन्धान् सामान्यस्वरूपान् जानाति।
- भविष्यत्काले प्रयुक्तानां लकाराणां सामान्यज्ञानं सिद्ध्यति।
- सूत्रव्याख्याने परिचयं सम्पादयति।
- भूधातोः लोट्लकाररूपाणि गृह्णाति।

## प्राग्व्यपेक्षाः (Prerequisites)

'भूवादयो धातवः' इति सूत्रेण धातुसंज्ञः विधीयते। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः इत्यर्थः। यः शब्दः क्रियां भावयति प्रतिपादयति सः धातुसंज्ञः भवति। धातवः त्रिप्रकारकः। परस्मैपदिनः आत्मनेपदिनः उभयपदिनः चेति। प्रायः धातवः सानुबन्धं निर्दिष्टाः भवन्ति। यथा गम्लृ गतौ। अत्र लृकारः इत्। एतादृशैः इत्संज्ञकैः वर्णैः सहितया धातूनां निर्देशः एव 'सानुबन्धः'। प्रयोजनविशेषं मनसि निधाय पाणिनिना एषा सानुबन्धव्यवस्था कल्पिता। परस्मैपदिनः धातवः प्रायेण उदात्तेतः भवन्ति।

दश लकाराः। लट्, लिट् ,लुट् ,लृट् ,लेट् ,लङ् ,लिङ्, लुङ्, लृङ् चेति। एषु लेट् छन्दस्येव। लिङ् द्विधा - आर्शिलिङ्, विधिलिङ् चेति। एषु वर्तमानकाले लट्। भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट्। भविष्यति अनद्यतनेऽर्थे लुट्। भविष्यत्सामान्यर्थे लृट्। विद्याद्यर्थेषु आशिषि च लोट्। अतद्यतनभूते लङ्। विध्यादौ विधिलिङ्। आशीर्थे आर्शिलिङ्। भूतार्थे लुङ्। हेतुहेतुमद्भावादिलिङ्गिमित्ते भविष्यति काले क्रियातिपत्तौ सत्यां लृङ्।

अस्मिन्नेकके भूधातोः लोटि वर्तमानानि निष्पादयितुं श्रमः करिष्यामः। सर्वे श्रद्धया भवन्तु।

## मुख्यपदानि (Keywords)

लोट् च - आशिषिलिङ्लोटौ - इकारस्य उः - तुर्व्योः तातङ् - लोटो लङ्वत् - तमादयः - तस्थस्थमिपां - सेर्ह्यपिच्च - अतो हेः - भवतात् - मेर्निः - आडुत्तमस्य - भवानि - आनि लोट् - प्रभवाणि - दुर्यवानि - नित्यं ङितः - भवाव।

## Discussion

परस्मैपदे लोटः परिनिष्ठिताः प्रत्ययाः यथा

| | | |
|---|---|---|
| तु-तात् | ताम् | अन्तु |
| हि-तात् | तम् | त |
| आनि | आव | आम |

भूधातोः लोटि रूपाणि यथा

**भू-धातु लोट् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भवतु, भवतात् | भवताम् | भवन्तु |
| **मध्यमपुरुषः** | भव, भवतात् | भवतम् | भवत |
| **उत्तमपुरुषः** | भवानि | भवाव | भवाम |

1. **लोट् च (३.३.१६२)**

   लोट् च इति द्विपदं सूत्रम्। अनेन सूत्रेण लृट्लकारः विधीयते। विध्याद्यर्थेषु धातोर्लोट् इति सूत्रार्थः। यथा - भवतु-भवतात्। भूधातोः विद्यार्थे लोट् स्यात्। भू लोट्।

2. **आशिषि लिङ्लोटौ (३.३.१७३)**

   आशिषि लिङ्लोटौ इति द्विपदं सूत्रम्। अनेन सूत्रेण आशिरर्थे लिङ्,लोट् च विधीयते। यथा भूधातोः आशिरर्थे आशिषि लिङ्लोटौ इति सूत्रेण लिङि (आशिर्लिङ्) भूयात् इति लोटि भवतु-भवतात् इति च।

**3. एरुः (३.४.८६)**

एः. उः इति द्विपदं सूत्रम्। अनेन सूत्रेण इकारस्य उत्वं विधीयते। एः इत्यस्य इकारस्य इत्यर्थः। लोटः इकारस्य उः स्यात्। यथा - भवतु।

भू धातोः लोटि प्रथमपुरुषैकवचने भवतु-भवतात् इति रूपद्वयम्।

**भवतु**

भूधातोः 'लोट् च' इति लोट्लकारे तत्स्थाने 'तिप्तस्झि...' इत्यादि सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये अनुबन्धलोपे 'भू ति'। सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे 'भू अ ति'। 'तिङ्शित्सार्वधातुकम्' इति शित्वात् शपः अकारस्य अपि सार्वधातुकसंज्ञायां गुणे अवादेशे 'भ् अव् अ ति'। 'एरुः' इत्यनेन इकारस्य उकारे 'भवतु' इति रूपम्।

**4. तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् (७.१.३५)**

तुह्योः, तातङ्, आशिषि, अन्यतरस्याम् इति चतुष्पदं सूत्रम्। अनेन सूत्रेण विकल्पेन तातङ् विधीयते। तु च हि च तयोः तुह्योः। अन्यतरस्याम् इति पदेन वैकल्पिकोऽयं तातङ्।

आशिषि तुह्योः तातङ् वा स्यात्। अनेकाल्त्वात् परत्वात् च सर्वादेशत्वेन स्यात्। यथा - भवतात्।

**भवतात्**

भूधातोः लोटि तिपि 'भू ति'। 'कर्तरि शप्' इति शपि गुणे 'भो अ ति'। अवादेशे 'भवति'। अत्र 'एरुः' इति सूत्रेण लोटः इकारस्य उकारे 'भवतु'। अत्र 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति सूत्रेण तातङादेशः। तातङि तात् शिष्यते। तत् सर्वादेशत्वेन आयाति 'भवतात्' इति रूपम्।

**5. लोटो लङ्वत् (३.४.८५)**

लोटः लङ्वत् इति द्विपदं सूत्रम्। लोटः लङ् इव कार्यं स्यात्। लङः कार्यमेव ताम्, तं, त, आमः, च स्युः। यथा भवताम्।

**6. तस्थस्थमिपां तान्तन्तामः (३.४.१०१)**

तस्थस्थमिपाम् तान्तन्तामः इति द्विपदं सूत्रम्। अनेन सूत्रेण तान्तम्तामः आदेशः विधीयन्ते। तस् च थस् च थ च मिप् तस्थस्थमिपाम्, तेषां तां च तं च अम् च तान्तम्तामः। ङितश्चतुर्णां (तस्, थस्, थ, मिप्, इतयेषां) तामादयः क्रमात् स्युः इति सूत्रार्थः। यथा - भवताम्।

**भवताम्**

भूधातोः 'लोट् च' इति सूत्रेण लोट्लकारे अनुबन्धलोपे तत्स्थाने 'तिप्तस्झि ....'इत्यादि सूत्रेण प्रथमपुरुषद्विवचने तस्प्रत्यये 'भू तस्' । तस् प्रत्ययस्य सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे शित्त्वात् सार्वधातुकत्वे गुणे अवादेशे च 'भव तस्' इति स्थिते 'लोटो लङ्वत्' इति सूत्रेण लङ्वत्कार्ये 'तस्थस्थामिपां तान्तन्तामः' इति सूत्रेण तामादेशे 'भवताम्' इति रूपं सिद्धम् ।

**भवन्तु**

भू धातोः लोटि प्रथमपुरुषबहुवचनविवक्षायां झिप्रत्यये 'झोऽन्तः' इत्यन्तादेशे च 'भू न्ति' । शपि, गुणे अवादेशे 'एरुः' इति उत्वे च 'भवन्तु' ।

**7. सेर्ह्यपिच्च (३.४.८७)**

सेः हि अपित् च इति पदच्छेदः। अनेन सूत्रेण सेः हिः विधीयते। लोटः सेः हिः स्यात् सोऽपित् च। यथा भूधातोः 'लोट् च' इति लोट्। 'तिप्तस्झि .....' इत्यदिना सिपि अनुबन्धलोपे भू सि। अत्रानेन 'सेर्ह्यपिच्च' इति सूत्रेण सेः हित्वे भू हि।

**8. अतो हेः (६.४.१०५)**

अतः हेः इति द्विपदम्। अनेन सूत्रेण अतः परस्य हेः लुक् विधीयते। अतः परस्य हेर्लुक् इति सूत्रार्थः। यथा -भव। भूधातोः लोटि सिपि 'सेर्ह्यपिच्च' इति सेः हित्वे भू हि। 'कर्तरि शप्' इति शपि भू अ हि। 'सार्वधातुकार्धाधातुकयोः' इति गुणे अवादेशे च भव हि। अत्रानेन 'अतो हेः' इति सूत्रेण हेः लुकि भव इति रूपम्।

**भव-भवतात्**

भूधातोः लोटि मध्यमपुरुषैकवचने भव-भवतात् इति रूपद्वयम्।

भूधातोः लोटि सिपि शपि 'सार्वधातुकार्धाधातुकयोः' इति गुणे 'भो अ सि'। अवादेशे 'भव सि'। 'सेर्ह्यपिच्च' इति सेः हित्वे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति विकल्पेन तातङि 'भवतात्' इति। तातङः अभावे 'अतो हेः' इति हेः लोपे 'भव' इति।

**भवतम्**

भूधातोः लोटि मध्यमपुरुषद्विवचने थस्प्रत्यये शपि च 'भू अ थ'। 'सार्वधातुकार्धाधातुकयोः' इति गुणे अवादेशे च 'भवथ'। 'तस्थस्थमिपां तान्तन्तामः' इति तमादेशे 'भवतम्' इति।

**भवत**

भू लोटि मध्यमपुरुषबहुवचने थप्रत्यये शपि, गुणे अवादेशे च 'भवथ'। 'तस्थस्थमिपां तान्तन्तामः' इति तादेशे च 'भवत'।

**9. मेर्निः (३.४.८९)**

मेः निः इति द्विपदं सूत्रम्। अनेन सूत्रेण मेः नित्वं विधीयते। लोटो मेर्निः स्यात् इति सूत्रार्थः। यथा भवानि। भू धातोः लोटि मिपि च भू मि। शपि गुणे अवादेशे च भव मि। मेर्निः इति नित्वे भव नि इति।

**10. आडुत्तमस्य पिच्च (पा.३.४.९२)**

आट् उत्तमस्य पित् च इति पदच्छेदः। अनेन लोट उत्त्मपुरुषस्य आडागमः स्यात्। लोडुत्तमस्य आट् स्यात्, पिच्च। यथा भवानि।

**भवानि**

भूधातोः लोटि उत्तमपुरुषैकवचने मिपि 'भू मि'। शपि गुणे आवादेशे च 'भव मि'। 'मेर्निः' इति नित्वे 'भव नि'। अत्र 'आडुत्तमस्य पिच्च' इति सूत्रेण आडागमे 'भव आनि'। 'अकः सवर्णे दीर्घः' इति दीर्घे भवानि।

हि, नि इत्यनयोः 'एरुः इति सूत्रेण उत्वं न। मेर्निः इत्यत्र इकारोच्चारणसामार्थ्यात्।

**11. ते प्राग्धातोः (१.४.८०)**

त्रिपदं सूत्रम्। ते प्राक् धातोरिति। ते इत्यस्यात्र गाति - उपसर्गसंज्ञकाः। गाति- उपसर्गाः धातोः प्रगेव प्रयोक्तव्याः। 'भवति' इत्यस्य पूर्वमेव गाति (उपसर्गः वा) प्रयोक्तव्याः।

**12. आनि लोट् (८.४.१६)**

द्विपदं सूत्रम्। अनेन सूत्रेण नस्य णः विधीयते। उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्य अनित्यस्य नस्य णः स्यात् इति सूत्रार्थः। यथा प्रभवाणि। 'प्र' इत्युपसर्गपूर्वस्य भूधातोः लोटि उत्तमपुरुषस्य एकवचने 'प्रभवानि' इत्यवस्थायां 'आनि लोट्' इति सूत्रेण नस्य णत्वे प्रभवाणि इति।

**13. दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः। (वार्तिकम्)**

वार्तिकमिदम्। षत्वस्य णत्वस्य च विधौ दुरः उपसर्गत्वं न। अतः दुःसिथितिः, दुर्भवनानि इत्यादौ 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इति वार्तिकेन 'दुरः' उपसर्गत्वं न। अतः 'आनि लोट्' इति सूत्रेण दुर्भवनानि इत्यत्र णत्वं न।

**14. अन्तश्शब्दस्यङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्। (वार्तिकम्)**

अन्तश्शब्दस्य अङ्किविधिणणत्वेषु उपसर्गत्वं वाच्यम् इति चतुष्पदं वार्तिकमिदम्। अङ्विधौ किविधौ णत्वविधौ च 'अन्तर्' शब्दस्य उपसर्गसंज्ञा सिद्ध्यति। यथा 'अन्तर्' पूर्व भवानि अन्तर्भवाणि। अत्र

अन्तश्शब्दस्याङ्किविधिणत्वेषुपसर्गत्वं वाच्यम् इति वार्तिकेन उपसर्गत्वं 'आनि लोट्' इति णत्वं अन्तर्भवाणि।

### 15. नित्यं ङितः (३.४.९९)

नित्यं ङितः इति द्विपदं सूत्रम्। अनेन सूत्रेण सस्य लोपः विधीयते। ङितः इत्यनेन लङ् - लिङ् - लुङ् - लृङ् लकाराः विवक्षिताः। अयं सकारलोपः 'अलोऽन्त्यस्य' इति परिभाषासूत्रेण अन्त्यस्यैव स्यात्। यथा भवाव।

**भवाव**

भूधातोः 'लोट् च' इति लोट्। उत्तमपुरुषद्विवचने 'तिप्तस्झि .....' इत्यादिना 'भू वस्'। 'कर्तरि शप्' इति शपि, 'सार्वधातुकार्धाधातुकयोः' इति गुणे 'भो अ वस्'। 'एचोऽयवायावः' इत्यवादेशः। 'आडुत्तमस्य पिच्च' इत्याडागमे च 'भव आ वस्'। 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे 'भवावस्'। अत्रानेन 'नित्यं ङितः' इति सूत्रेण सकारलोपे 'भवाव' इति रूपम्।

**भवाम**

भूधातोः लोटि उत्तमपुरुषबहुवचने मसि शपि, 'सार्वधातुकार्धधातुकयोः' इति गुणे च 'भो अ मस्'। अवादेशे आडागमे सवर्णदीर्घे च 'भवावस्'। 'नित्यं ङितः' इति सकारलोपे 'भवाव'।

## पुनरावृत्तिः (Recap)

- परस्मैपदे लोटः परिनिष्ठितप्रत्ययाः यथा तु तात् ताम् अन्तु हि तात् तम् त तानि आव आम।
- एरुः इत्यनेन इकारस्य उत्वं भवति।
- तस्थस्थमिपां तान्तन्तामः इत्यनेन तमादयः विधीयन्ते।
- तुह्योस्तातङशिष्यन्यतरस्याम् इत्यनेन तातङादेशः।
- लोटो लङ्वत् इति सूत्रेण लङ्वत् कार्यं भवति।

- लोटः सेः हिः पिच्च।
- अतो हेः इति सूत्रेण अतः हेः विधीयते।
- मेर्निः इत्यनेन मेः नित्वं विधीयते।
- आडुत्तमस्य पिच्च इत्यनेन आडागमः भवति।
- आनि लोट् इति सूत्रेण नस्य णत्वं भवति।
- नित्यं ङितः इति सूत्रेण सस्य लोपः भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. विद्याद्यर्थेषु आशिरर्थे कः लकारः प्रयुज्यते?
2. भूधातोः लोटि उत्तमपुरुषरूपाणि कानि?
3. लोट्लकारं काभ्यां सूत्राभ्यां विधीयेते ?
4. लोटि तातङ् विधीयमानं सूत्रं किम् ?
5. लङ्वत् कार्यं लोटः स्यात् केन सुत्रेण?
6. लोटः हेः लुक् केन सूत्रेण विधीयते ?
7. सेर्ह्यपिच्च इति सूत्रस्यार्थः कः ?
8. आनि लोट् इति सूत्रेण किं विधीयते ?
9. लोटि उत्तमपुरुषे आडागमं विधीयमानं सूत्रं किम्?
10. भवाम धातुपदलकारपुरुषवचनानि निर्दिश्यत।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. लोटो लङ्वत् इति सूत्रस्यावश्यकता का ?
2. दुरः षत्वणत्वयोरूपसर्गत्वप्रतिषेधो वक्तव्यः इति वार्तिकस्य अर्थं लिखत।

## एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

**सूत्राणि व्याख्यात**

1. तुह्योस्तातङाशिष्यन्यतरस्याम्।
2. अतो हेः।
3. ते प्राग्धातोः।

**रूपाणि सप्रमाणं निष्पादयत -**

1. लोटि प्रथमपुरुषैकवचनम्।
2. लोटि उत्तमपुरुषद्विवचनम्।
3. लोटि मध्यमपुरुषबहुवचनम्।

## निर्दिष्टाभ्यासः (Assignments)

1. रूपाणि सप्रमाणं निष्पादयत - भवन्तु ,भव ,भवानि।
2. सोदाहरणं सूत्राणि व्याख्यात - मेर्निः, नित्यं ङितः, तस्थस्थमिपां तान्तन्तामः।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. लोट्।
2. भवानि भवाव भवाम।
3. लोट् च आशिषिलिङ्लोटौ।
4. तुह्योस्तातङाशिष्यन्यतरस्याम्।
5. लोटो लङ्वत्।
6. अतो हेः।

7. लोटः सेः हिः स्यात् सोऽपिच्च।
8. नस्य णत्वम्
9. आडुत्तमस्य पिच्च।
10. भूधातु परस्मैपदी लोट् उत्तमपुरुष बहुवचनम्।

## सूचनाग्रन्थाः (References)


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुभारती प्रकाशन, वारणसी २०११, पुटानि- १०३-१०५
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या, श्रीगिरिशकुमारठक्कुरः, कृष्णदास अकादमी वारणासी १९९८, पुटानि ९०-९२
3. भट्टोजिदीक्षितः, वैय्याकरणसिद्धान्तकौमुदी, बालमनोरमा टीका, तृतीयः भागः चौखम्बा संस्कृत सिरीज़ आफीस, वारणसि, १९६९, पुटं -१६-१८

BLOCK-5

# लघुसिद्धान्तकौमुद्याः भ्वादिप्रकरणे भूधातोः लङ् लकारे रूपनिष्पत्तिः

SGOU

# Unit - 1
## भूधातोः लङिरूपनिष्पत्तिः

### उद्देश्यानि (Learning Outcomes)

- परस्मैपदिनः लङ्लकारस्य परिनिष्ठितप्रत्ययान् गृह्णाति।
- भूतकाले प्रयुक्तमानानां लकाराणां सामान्यावबोधनं जायते।
- सूत्राणां व्याख्याने परिचयं सम्पादयति।
- भूधातोः लङि रूपाणि परिशील्य तत्सदृशनि रूपाणि विविच्य ज्ञातुं शक्यते।

### प्राग्व्यपेक्षाः (Prerequisites)

आत्मनेपद - परस्मैपद - उभयपदभेदेन धातवः त्रिप्रकारकाः। प्रायेण अनुदात्तेतः आत्मनेपदिनः। उदात्तेतः प्रायेण परस्मैपदिनः। उभयपदिनः प्रायेण स्वरितेतः। दशलकाराः सन्ति। दशधातुगणश्च। प्रथमः धातुगणः भवति भूधातुः। अस्य गणस्य विकरणप्रत्ययः भवति शप्। वर्तमानकाले एकः लकारः प्रयुज्यते लट्। भूतकाले त्रयः लकाराः लिट् लङ् लुङ् च। परोक्षभूते लिट्। अनद्यतने लङ्। सामान्यभूते लुङ्। लङः परिनिष्ठितप्रत्ययाः भवन्ति त् ताम् अन् प्रभृतयः।
अस्मिन् प्रकरणे लङ् रूपाणां निष्पत्तिं विकरणप्रत्ययान् चाधिकृत्य पठामः। अस्मिन् खण्डे एकः एककैव। श्रद्धया अस्मिन् खण्डे प्रविशामः।

### मुख्यपदानि (Keywords)

अनद्यतने लङ् - लुङ्लङ्लृङ्क्ष्वडुदात्तः - इतश्च - अभवत् - अभवतम् - अभवाम।

### Discussion

लङः परिनिष्ठितप्रत्ययाः तावत्

त्  ताम्  अन्

स्	तम्	त
म्	व	म

भूधातोः लङः रूपाणि तु

**भू-धातुलङ् लकाररूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अभवत् | अभवताम् | अभवन् |
| **मध्यमपुरुषः** | अभवः | अभवतम् | अभवत |
| **उत्तमपुरुषः** | अभवम् | अभवाव | अभवाम |

1. **अनद्यतने लङ् (३.२.१११)**

अनद्यतने लङ् इति द्विपदं सूत्रम्। अनेन सूत्रेण लङ् विधीयते। न अद्यतनं अनद्यतनम्, तस्मिन् अनद्यतने। अनद्यतनभूतार्थवृत्तेः र्धातोः लङ् स्यात् इति सूत्रार्थः। यथा अभवत् - अभवताम् - अभवन् इत्यदीनि।

2. **लुङ्लङ्लृङ्क्ष्वडुदात्तः (६.४.७२)**

लुङ्लङ्लृक्षु अट् उदात्तः इति त्रिपदं सूत्रम्। अनेन सूत्रेण अडागमः विधीयते। लुङ्लङ्लृक्षु अङ्गस्याडागमः स्यात्, स चोदात्तः। यथा भूधातोः अनद्यतने लङ् इति लङि, तस्य तिपि भू ति। तस्य स्थानित्वे लुङ्लङ्लृक्ष्वडुदात्तः इति अडागमे अ भू ति।

3. **इतश्च (३.४.१०२)**

इतः च इति द्विपदं सूत्रम्। अनेन सूत्रेण इकारलोपः विधीयते। ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्य लोपः स्यात् इति सूत्रार्थः। यथा-अभवत्।

**अभवत्**

भूधातोः 'अनद्यतने लङ्' इति 'भू लङ्' । 'तिप्तस्झि .....' इत्यादिना प्रथमपुरुषैकवचनप्रत्यये तिप्प्रत्यये अनुबन्धलोपे 'भू ति' । 'कर्तरि शप्' इति शपि 'भू अ ति' । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमे 'अ भू अ ति' । 'सार्वधातुकार्धदातुकयोः' इति गुणे 'अभो अ ति' । 'एचोऽयवायावः' इत्यवादेशे 'अभव ति' । अनेन 'इतश्च' इति सूत्रेण इकारलोपे 'अभवत्' ।

**अभवताम्**

लङि प्रथमपुरुषद्विवचनरूपम् अभवताम् ।

भूधातोः लङि तसि शपि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमे गुणे 'अभो अ ति' । अवादेशे 'अभवतस्' । 'तस्थस्थमिपां तान्तम्तामः' इति तमादेशे 'अभवताम्' ।

**अभवन्**

लङि प्रथमपुरुषबहुवचनरूपम् अभवन् ।

भूधातोः लङि झिप्रत्यये शपि अडागमे च 'अभू अ झि' । 'झोऽन्तः' इत्यन्तादेशे गुणे अवादेशे च 'अभव अन्ति' । 'अतो गुणे' इति पररूपे 'अभवन्ति' । 'इतश्च' इति इकारलोपे 'अभवन्त्' । 'संगान्तस्य लोपः' इति तकारलोपे 'अभवन्' ।

**अभवः**

लङि मध्यमपुरुषैकवचनरूपम् अभवः ।

भूधातोः लङि सिपि शपि 'भू अ सि' । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमे गुणे 'अभो अ सि' । अवादेशे अनेन 'इतश्च' इति सूत्रेण इकारलोपे 'अभवस्' । 'ससजुषो रुः' इति रुत्वे 'अभवर्' । 'खरवसानयोर्विसर्जनीयः' इति विसर्गे 'अभवः' ।

**अभवतम्**

लङि मध्यमपुरुषद्विवचनरूपम् अभवतम् ।

भू धातोः लङि थासि शपि अडागमे 'अभू अ थस्' । गुणे अवादेशे 'तस्थस्थामिपां तान्तम्तामः' इति तमादेशे 'अभवतम्' ।

**अभवत**

लङि मध्यमपुरुषबहुवचनरूपम् अभवत ।

भूधातोः 'अनद्यतने लङ्' इति लङि 'तितस्झि.......' इत्यादिना थप्रत्यये अडागमे च 'अभू थ'। शपि गुणे अवादेशे 'तस्थस्थामिपां तान्तम्तामः' इति तादेशे 'अभवत'।

**अभवम्**

लङि उत्तमपुरुषैकवचनरूपम् अभवम्।

भूधातोः लङि मिपि 'कर्तरिशप्' इति शपि अनुबन्धलोपे च 'भू अ मि'। गुणे अडागमे अमादेशे च 'अभवम्'।

**अभवाव**

लङि उत्तमपुरुषद्विवचनरूपम् अभवाव।

भूधातोः लङि वसि शपि 'सार्वधातुकार्धाधातुकयोः' इति गुणे 'भो अ वस्'। अवादेशे अडागमे 'अभव वस्'। 'अतो दीर्घो यञि' इति दीर्घे 'नित्यं ङितः' इति सकारलोपे 'अभवाव' इति रूपम्।

**अभवाम**

लङि उत्तमपुरुषबहुवचनरूपम् अभवाम।

भूधातोः लङि मसि शपि गुणे 'एचोऽयवायावः' इति अवादेशे च 'भव मस्'। 'लुङ्लङ्लृक्ष्वडुदात्तः' इत्यडागमे 'अभवमस्'। दीर्घे 'नित्यं ङितः' इति सकारलोपे 'अभवाम' इति रूपम्।

## पुनरावृत्तिः (Recap)

- परस्मैपदिनः लङः परिनिष्ठितप्रत्ययाः त् ताम् अन् प्रभृतयः।
- अनद्यतनभूतार्थवृत्तेः धातोः लङ् स्यात्।
- लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमः।
- तस्थस्थमिपां तान्तम्तामः इति सूत्रेण तामादयः विधीयन्ते।
- इतश्च इति सूत्रेण इकारलोपः भवति।
- भूधातोः लङः प्रथमपुरुषरूपाणि अभवत् - अभवताम् - अभवन् इति।
- भूधातोः लङः मध्यपुरुषरूपाणि अभवः - अभवतम् - अभवत इति।
- भूधातोः लङः उत्तमपुरुषरूपाणि अभवम् - अभवाव - अभवाम इति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. लङि अडागमः केन सूत्रेण विधीयते ?
2. अभवति इत्येतद् अभवत् इत्यायाति - केन सूत्रेण ?
3. भूधातोः लङि प्रथमपुरुषद्विवचनरूपं किम्?
4. भूधातोः थप्रत्ययः केन सूत्रेण विधीयते ?
5. अभवम् -धातुपदलकारपुरुषवचनानि लिखत?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. भूधातोः लङि रूपाणि लिखत।
2. इतश्च इति सूत्रस्य वृत्तिः का?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्राणि व्याख्यात -**

1. अनद्यतने लङ्।
2. लुङ्लङ्लृङ्क्ष्वडुदात्तः।

**रूपाणि सप्रमाणं निष्पादयत**

1. लङि मध्यपुरुषद्विवचनम्।
2. लङि उत्तमपुरुषैकवचनम्।

## निर्दिष्टाभ्यासः (Assignments)

1. रूपाणि सप्रमाणं निष्पादयत - अभवन् अभवः अभवाव।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. लुङ्लङ्लृङ्क्ष्वडुदात्तः।
2. इतश्च इति सूत्रेण।
3. अभवताम्।
4. तिप्तस्झि .... इत्यादिना सूत्रेण।
5. भूधातुः - परस्मैपदी - लङ् - उत्तमपुरुषैकवचनम्।

## सूचनाग्रन्थाः (References)


1. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या श्रीगोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुभारती प्रकाशन, वारणसी २०११, पुटं- १०५
2. वरदराजाचार्यः,लघुसिद्धान्तकौमुदी, व्याख्या, श्रीगिरिशकुमारठक्कुरः, कृष्णदास अकादमी वारणासी १९९८, पुटं - ९२
3. भट्टोजिदीक्षितः, वैय्याकरणसिद्धान्तकौमुदी, बालमनोरमा टीका, तृतीयः भागः चौखम्बा संस्कृत सिरीज़ आफीस, वारणासी, १९६९, पुटे -१८ - १९

BLOCK-6

# लघुसिद्धान्तकौमुद्यां आत्मनेपद - परस्मैपदप्रक्रियाः

SGOU

# Unit - 1
## आत्मनेपद - परस्मैपदप्रक्रिययोः प्राधान्यम्

### उद्देश्यानि (Learning Outcomes)

- क्रियापदैः सह परिचायनम्
- क्रियायाः सविशेषतां धातूनां प्रयोगं चावगच्छति।
- क्रियापदानां पदव्यवस्थानुसारमर्थभेदान् गृह्णाति।
- आत्मनेपद - परस्मैपद क्रियायोः प्राधान्यं जानाति

### प्राग्व्यपेक्षाः (Prerequisites)

आशयविनिमाय भाषा विनियुज्यते। भाषायाः अविभाज्यघटकाः भवन्ति वाक्यानि। वाक्येषु पदानि सन्ति। पदानां रूपनिष्पत्तिः धातुभ्यः एव। धीयते सर्वमस्मिन्निति धातुः। आरोग्यशास्त्रे इव भाषायामपि सर्वं कार्यं धातुजमेव। शब्दादेव सर्वं ज्ञानमुत्पाद्यते। शब्दः दिव्यः ज्योतिरेव। प्रकाशः सर्वान् प्रकाशयति। शब्दस्तु प्रकाशमपि प्रकाशयति इति भर्तृहरिः वाक्यपदीये।

धातवः त्रिविधाः। आत्मपद - परस्मैपद - उभयपदभेदात्। अस्मिन्नेकके आत्मनेपदधातवः के, परस्मैपदधातवः के, उभयोः प्राधान्यं किम् इत्यादिना विषयानधिकृत्य पठामः।

### मुख्यपदानि (Keywords)

धातुः, सानुबन्धनिर्देशः, उदात्तानुदात्तस्वरितभेदात्, त्रिप्रकारकाः, धातवः आत्मनेपदिनः, परस्मैपदिनः, उभयपदिनः. अनुभवबलात् ग्रन्थादिन् परिशील्य, धातुनिर्णयः, धातुस्थान् स्वरान् अवलम्ब्य, प्रतिज्ञानुनासिक्याः पाणिनियाः, आत्मनेपदस्य प्राधान्यं, परस्मैपदस्य प्राधान्यम्।

## Discussion

दधाति शब्दान् इति धातुः। सर्वे शब्दाः धातुजा इति शाकटायनः। सर्वेषां नाम्नां प्रकृतिभूतः भूप्रभृतिः। क्रियावाचकः शब्दविशेषः धातुः। यः शब्दः क्रियां भावयति प्रतिपादयति सः धातुसंज्ञः भवति। प्रायेण धातवः सानुबन्धनिर्दिष्टः। यथा गम्लृ - शीङ् - डुकृञ् प्रभृतयः। गम्लृ इत्यत्र डुञ् च। अनुबन्धौ। अनुबन्धेन सह निर्देशात् प्रयोजनमस्ति।

सप्तम्यन्तपदेन धात्वर्थः निर्दिश्यते। यथा भू सत्तायाम् एध वृद्धौ शीङ् स्वप्ने इत्येवम्। धातवः अनेकार्थाः। धातुना सह अर्थनिर्देशो प्रसिद्धिप्राचुर्यम् अवलम्बते। शिष्टसम्मताः प्रामाणिकाः अन्ये अर्थाः सन्ति। उच्यते च

**धातवश्चोपसर्गश्च निपातश्चेति ते त्रयः।**

**अनेकार्थाः स्मृताः प्राज्ञैः पाठस्तेषां निदर्शनम्॥ इति।**

अपि च उपसर्गबलात् धातूनां नानार्थत्वं सिद्ध्यति।

धात्वर्थनिर्देशः सर्वत्र न हि पाणिनिना कृतः। प्रतिधातु अर्थनिर्देशः भीमसेनाचार्याख्येन न कृतः इति प्राज्ञाः वदन्ति। धातवः परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः चेति त्रिविधा। अनुभवबलात् ग्रन्थादिन् परिशील्य आत्मनेपद्यादिकं निर्णयन्ति।

प्रायेण धातुस्थान् स्वरान् अनुबन्धस्थान् स्वरान् वा अवलम्ब्य आत्मनेपदपरस्मैपदोभयपदव्यवस्थां कर्तुं शक्यते। 'अनुदात्तङित आत्मनेपदम्' 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्याद्यैः सूत्रैः आत्मनेपदित्वं विधीयते। आत्मनेपदमित्यस्य स्वस्य कार्याय उपयुक्तमिति विवक्षा। यथा पाकं कुरुते इत्युच्यते चेत् पाचितं भक्ष्यं स्वयमेव उपयुज्यते। पाकं करोति इत्तुच्यते चेत् पचितं भक्ष्यं अन्येभ्यः एव। मुख्यतः अन्यान् उद्दिश्यैव पाकं कृतम् इत्यर्थः। पाकं कुरुते इत्यत्र मुख्यतः आत्मानमुद्दिश्यैव पाककरणामिति सामान्यतया वक्तुं शक्यते। आत्मनेपदमित्यस्य आङ्गलभाषायाम् 'word for 'the self, fruit of action' इत्यर्थः। परस्मैपदस्य तु ' word for another'.

यद्यपि एतादृश्यमर्थकथनं सर्वत्र युज्यते इति वक्तुं न शक्यते। धातुस्थान् स्वरान् आश्रित्य धातोः पदनिर्णयं साध्यं चेदपि तत्रायं प्रश्नः उदेति। उदात्त - अनुदात्त - स्वरित - अनुनासिकभेदान् कथं ज्ञातुं शक्यते। उच्चारणं श्रुत्वा वैयाकरणाः जानन्ति कः स्वरभेदः अत्र वर्तत इति। किन्तु मुद्रितं धातुं दृष्ट्वा कथं निर्णेतुं शक्यते। अत्रेदं समाधानं वक्तुं शक्येत। 'प्रतिज्ञानुनासिक्याः पाणिनियाः' इति। पाणिनीयाः प्रकृतिप्रत्यय विवेचनशिलाः भवन्ति पुस्तकादिषु यदुक्तं मुद्रितं वा तद् दृष्ट्वा अनुनासिकता स्वरितानुदात्ततादयः च अनुमीयन्ते।

सस्वर धातुपाठविषये सत्यनन्दवेदवागीशः पाणिनीय शब्दानुशासनाख्ये ग्रन्थे लिखति - 'सूत्रकृता पाणिनिना स्वधातुपाठे सर्वे धातवः उदात्तादिस्वरैः वर्णधर्मैः युक्ता एव उपदिश्यन्ति। सर्वान् च धातून् उदात्ताद्युच्चारयुक्तान् एव स्वशिष्यान् अध्यापयामास। लेखने च तान् स्वबोधकचिह्नयुक्तान् एव लिलेख लेखायाम्बभूव वा। सः तथाविधः स्वरचिह्नयुक्तः पाठः सानुनासिकपाठवत् सर्वथैव भ्रष्टताम् इपाय' इति। किन्तु सामान्यत्या आत्मनेपदिनः अनुदात्तेतः भवन्ति। यथा एध वृद्धौ। स्पर्ध सङ्घर्षे। दध धारणे। स्कुदि आप्रवणे।

यदि कल्याणे सुखे च। मुद हर्षे। स्वर्द आस्वादने इति। परस्मैपदिनः प्रायेण उदात्तेतः भवन्ति।

यथा अत सातत्यगमने। चिति संज्ञाने। षिध गत्याम्। खाद्द भक्षणे। रद विलेखने। नर्द शब्दे। कर्द कुत्सिते शब्दे। उभयपदिनः प्रायेण स्वरितेतः भवन्ति। यथा डुदाञ् दाने। टुयाचृ याञ्चायाम्। डुकृञ् करणे अञ्चु गतौ याचने च। हिक्क अव्यक्ते शब्दे। चते याचने। बुधिर् बोधने।

परस्मैपद - आत्मनेपद - उभयपदभेदं कथं ज्ञातुं शक्यते? दशगणेषु प्रथमं भवति भवादिगणः। भ्वादिगणे विकरणप्रत्ययः शप् भवति। शपि अकारः शिष्यते। परस्मैपदधातुः चेत् लटि ति तः अन्ति, सि थः थ, मि वः मः इत्येवं रूपेण पर्यवस्यति।

उभयपदं चेत् उभयमपि रूपं स्यात्।

केरलीय कश्चन विद्याभ्याससविचक्षणः वैय्याकरणाचार्यः च भवति डा. के पि नारायणपिषारटिमहाशयः। तेन महात्मना उक्तं कतिपयेभ्यः धातुभ्यः परस्मैपदित्वं अन्येभ्यः कतिपयेभ्यः आत्मनेपदित्वं, अपरे केचन धानवः उभयपदित्वं च वहन्ति।

यथार्थतः भाषायाम् आदिकालादारभ्य दृश्यमानानां पदानां साधुत्वकल्पनम् अचार्यैः कृतम्। भाषायां येन रूपेण दृश्यन्ते, तदनुकूला व्याकरणरचना पाणिनी प्रभृतिभिराचार्यैः कृता। तदनुकूलं परस्मैपद - आत्मनेपद - उभयपदधातूनां प्रयोगोऽपि कृतः।

## पुनरावृत्तिः (Recap)

- दधाति शब्दान् इति धातुः।
- धातवः अनेकार्थः।

- धातुना सह अर्थनिर्देशे प्रसिद्ध प्राचुर्यम् अवलम्बते।
- उपसर्गबलात् धातूनां नानार्थत्वं लभते।
- सामान्यतया आत्मनेपदिनः स्वरितेतः च भवन्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. धातूनां सानुबन्धनिर्देशः किमर्थं ?
2. धातोः पदं किमिति कथं निर्णयति ?
3. धातवः कतिविधाः? ते च के?
4. सिद्धान्तकोमुद्यां धातूनां कति गणाः सन्ति ?
5. पचति - पचते इत्यनयोः अर्थभेदः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत धातो
## (Answer the following questions in one or two sentences)

1. आत्मनेपद विधायके सूत्रे के ?

## एकैकया खण्डिकया उत्तराणि लिखत
## (Answer the following questions in a paragraph)

1. धातोः सविशेषतां विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. धातोः आत्मनेपद - परस्मैपदभेदं सोदाहरणं संसूच्य धातुनिर्देशः कथं कार्यः इति विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. किं पदमिति झटिति ज्ञातुं सानुबन्धनिर्देशः।
2. सामान्यतया स्वरान् अनुबन्धस्वरन् चाश्रित्य तथा च उदात्तानुदात्त स्वरितानुनासिकानुसारं धातूनां पदं निर्णयति।
3. त्रिविधाः - आत्मनेपद -परस्मैपद - उभयपदभेदात्।
4. दशगणाः।
5. पचति अन्यान् उद्दिश्य पाकं करोति। पचते स्वयम् (आत्मने) भक्षणाय पाकं करोति।

## सूचनाग्रन्थाः (References)


1. जनार्दन हेगडे, धानुरूपनन्दिनी, संस्कृतभारती, नवदेहली, २०२०, पुटानि १-१८
2. भट्टोजिदीक्षितः, वैय्याकरणसिद्धान्तकौमुदी, बालमनोरमा टीका, तृतीयः भागः, चैखम्बा सिरिज़ आफिस, वारणासी,१९६९, पुटे ४-५

# Unit - 2

## आत्मनेपदप्रक्रियायां ‘कर्तरि कर्मव्यतिहारे’ इति सूत्रादारभ्य ‘उदश्चर सकर्मकात्’ इति सूत्रपर्यन्तम्

### उद्देश्यानि (Learning Outcomes)

- धातूनां सविशेषतां जानाति।
- सूत्राणि व्याख्यातुं परिशीलयति।
- आत्मनेपद - परस्मैपदधातूनां सविशेषताः गृह्णाति।
- परस्मैपदधातूनाम् आत्मनेपदत्व विधायकानि सूत्राणि अवगच्छाति।

### प्राग्व्यपेक्षाः (Prerequisites)

पाणिनिना रचिते धातुपाठे प्रायः द्विसहस्रं धातवः सन्ति । धातवः दशसु गणेषु विभक्ताः। धीयते सर्वमस्मिन्निति धातुः। ‘भ्वादयो धातवः’ इति सूत्रेण धातुसंज्ञः विधीयते। धातवः सानुबन्धत्वेन निर्दिष्टाः। प्रयोजनविशेषं मनसि निधाय पाणिनिना एषा सानुबन्धव्यवस्था कल्पिता। धातवः आत्मनेपद - परस्मैपद - उभयपदभेदेन त्रिप्रकारकाः। धातोः पदत्वनिर्णये काचन व्यवस्था दृश्यते। ‘अनुदात्तङितः आत्मनेपदम्’ ‘स्वरितञितः कर्त्राभिप्राये क्रियाफले’ इति सूत्राभ्यां आत्मनेपदित्वं विधीयेते। ‘शेषात्कर्तरि परस्मैपदम्’ इति सूत्रेण परस्मैपदम् च। तथापि केषुचित् स्थलेषु इमां व्यवस्थां लङ्घयतीव दृश्यते। प्रायेण धातुस्थान् स्वरान् अनुबन्धस्थान् स्वरान् चावलम्ब्य पदव्यवस्थां कर्त्तुं शक्यते। तथापि पुस्तकादिषु यदुक्तं मुद्रितं वा दृष्ट्वा धातोः पदव्यवस्था निर्णेतव्या। धातवः अनेकार्थाः। उपसर्गसहितस्य धातोः प्रयोगे अर्थव्यतियानं प्रायेण जायते।

प्रायेण परस्मैपदिनः उदात्तेतः, आत्मनेपदिनः अनुदात्तेतः, उभयपदिनः स्वरितेतः च भवन्ति। तथापि अर्थानुसारम् उपसर्गानुसारं च परस्मैपदधातूनाम् आत्मनेपदित्वं, आत्मनेपदधातूनां परस्मैपदत्वं च लभते।

| |
|---|
| अस्मिन् एकके परस्मैपदधातूनाम् आत्मनेपदसिद्धिम् अधिकृत्य कतिपयानि सूत्राणि पठामः। |

## मुख्यपदानि (Keywords)

कर्मव्यतिहारे, न गतिहिंसार्थेभ्यः, परिव्यवेभ्यः, विपराभ्यां, समवप्रविभ्यः स्थः, अपह्नवे, अकर्मकात्, उदश्चरः।

## Discussion

1. **कर्तरि कर्मव्यतिहारे (१.३.१४)**

   द्विपदं सूत्रम्। अनेन सूत्रेण आत्मनेपदित्वं विधीयते। क्रियाविनिमये द्योत्ये कर्तरि आत्मनेपदं स्यात्। अत्र कर्मशब्दः क्रियापरः, व्यतिहारशब्दो विनियमपरः। यथा व्यतिलुनीते। अन्यस्य योग्यं (शुद्रादियोग्यं) लवनं (सस्यादिच्छेदनं) अन्यः (ब्राह्मणः) करोतित्यर्थः।

   अत्र क्रियाविनिमयः संजातः। 'लूञ् छेदने' इति धातुः परस्मैपदमेव। किन्तु 'वि, अति' इत्यनयोः योगे 'कर्तरि कर्मव्यतिहारे' इति सूत्रेण आत्मनेपदे, आत्मनेपदनिमित्ते तप्रत्यये 'वि अति लू त'। लू त इत्यत्र लटि लुनीते। 'वि अति लुनीते' इत्यत्र 'इको यणचि' इति यणि 'व्यतिलुनीते' इति रूपम्।

2. **न गतिहिंसार्थेभ्यः (१.३.१८)**

   द्विपदं सूत्रम्। अनेन सूत्रेण क्रियाविनिमयेऽपि आत्मनेपदनिषेधः विधीयते। गत्यर्थकेभ्यो हिंसार्थेभ्यश्च कर्मव्यतिहरे आत्मनेपदं न स्यात्। यथा व्यतिगच्छन्ति। 'गम्लृ गतौ' इति धातुः परस्मैपदी। 'वि अति' इत्यनयोः पूर्वत्वेऽपि 'गम्लृ धातोः' क्रियाविनिमयेऽपि 'न गतिहिंसार्थेभ्यः' इति सूत्रेण आत्मनेपदनिषेधे परस्मैपदे झि प्रत्यये व्यतिगच्छन्ति इति रूपम्।

   व्यतिघ्नन्ति -

   हिंसार्थक 'हन' धातोः 'वि + अति' इत्युपसर्गे पूर्वे क्रियाविनिमये द्योत्यपि 'न गतिहिंसार्थेभ्यः' इति सूत्रेण आत्मनेपदनिषेधे परस्मैपदे 'व्यतिघ्नन्ति' इति रूपम्। यथार्थतः हनधातुः परस्मैपदमेव।

3. **नेर्विशः (१.३.१७)**

   नेः विशः इति द्विपदं सूत्रम्। अनेन सूत्रेण निपूर्वस्य विश् धातोः 'नेर्विशः' इति सुत्रेण आत्मनेपदित्वम्। तथा लटि लः स्थाने 'नेर्विशः' इति आत्मनेपदे तप्रत्यये शपि अनुबन्धलोपे टेरेत्वे 'निविशते' इति रूपम्। विश प्रवेशने इति परस्मैपदधातुः।

4. **परिव्यवेभ्यः क्रियः (१.३.१८)**

द्विपदं सूत्रम्। अनेन सूत्रेण कृञ् धातोः आत्मनेपदित्वम्। परि च वि च अव च परिव्यवाः, तेभ्यः परिव्यवेभ्यः। परि - वि - अवपूर्वेभ्यः क्रीञ् धातोः आत्मनेपदं स्यात्। उभयपदी डुक्रीञ् द्रव्यविनिमये।

डुक्रीञ् द्रव्यविनिमये इति धातुः उभयपदी। यथा परिक्रीणीते। परिपूर्वक्रीञ् धातोः ' परिव्यवेभ्यः क्रियः' इति सूत्रेण आत्मनेपदे तप्रत्यये 'परिक्रीणीते' इति रूपम्।

एवं विक्रीणीते, अवक्रीणीते इत्यादिः।

डुकृञ् द्रव्यविनिमये। उभयपदधातुः। विपूर्वस्य क्रीञ्धातोः 'परिव्यवेभ्यः क्रियः' इति सूत्रेण आत्मनेपदे तप्रत्यये विभक्तिकार्ये 'विक्रीणीते' इति रूपम्।

अवक्रीणीते इत्यत्र अवपूर्वः क्रीञ्धातुः। उभयपदी डुकृञ् द्रव्यविनिमये इति धातुः। अत्र 'परिव्यवेभ्यः क्रियः' इति सूत्रेण आत्मनेपदे तप्रत्यये 'अवक्रीणीते' इति रूपम्।

5. **विपराभ्यां जेः (१.३.१९)**

द्विपदं सूत्रम्। अनेन सूत्रेण जिधातोरात्मनेपदं विधीयते। विपराभ्यां पूर्वस्य जिधातोरात्मनेपदं स्यात् यथा विजयते। जिधातुः परस्मैपदमेव। किन्तु विपूर्वस्य जिधातोः 'विपराभ्यां जेः' इति सुत्रेण आत्मनेपदे तप्रत्यये 'विजयते' इति। एवं 'पराजयते'।

'जि जये' इति धातुः परस्मैपदमेव। विपूर्वस्य जिधातोः 'विपराभ्यां जेः' इति सूत्रेण आत्मनेपदे तप्रत्यये विजयते इति।

6. **समवप्रविभ्यः स्थः (१.३.२२)**

द्विपदं सूत्रम्। सम् च अव च प्र च वि च समवप्रवयः। तेभ्यः समवप्रविभ्यः। स्थः इत्यस्य स्था (ष्ठा गतिनिवृत्तौ) धातोः इत्यर्थः।

'ष्ठा' धातुः परस्मैपदमेव। किन्तु समवप्रविभ्यः पूर्वस्य स्थाधातोः आत्मनेपदं स्यात्। यथा सन्तिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते।

सन्तिष्ठते

स्था (ष्ठा) धातुः परस्मैपदी। सम्पूर्वस्य स्थाधातोः 'समवप्रविभ्यः स्थः' इति सूत्रेण आत्मनेपदे त प्रत्यये 'सम् तिष्ठते'। 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णे 'सन्तिष्ठते' इति रूपम्।

अवतिष्ठते

स्था (ष्ठा) धातुः परस्मैपदी। अवपूर्वस्य स्थाधातोः 'समवप्रविभ्यः स्थः' इति सूत्रेण आत्मनेपदे त प्रत्यये 'अवतिष्ठते'।

प्रतिष्ठते

स्था (ष्ठा) धातुः परस्मैपदी। प्रपूर्वस्य स्था धातोः 'समवप्रविभ्यः स्थः' इति सूत्रेण आत्मनेपदे त प्रत्यये 'प्रतिष्ठते' इति।

वितिष्ठते

स्था (ष्ठा) धातुः परस्मैपदी। विपूर्वस्य स्था धातोः 'समवप्रविभ्यः स्थः' इति सूत्रेण आत्मनेपदे तप्रत्यये 'वितिष्ठते'।

7. **अपह्नवे ज्ञः (१.३.४४)**

द्विपदं सूत्रम्। अनेन सूत्रेण परस्मैपदिनः 'ज्ञा' धातोः अपह्नवे आत्मनेपदित्वं विधीयते। अपह्नावार्थे ज्ञाधातोरात्मनेपदं स्यात्। यथा शतमपजानीते। अपह्नवः अवलापः। अपोपसर्गपूर्वकस्य ज्ञाधातोः 'अपह्नवे ज्ञः' इति आत्मनेपदे तप्रत्यये 'अपजानीते' इति रूपम्। अवलपतीत्यर्थः।

8. **अकर्मकाच्च (१.३.४५)**

अकर्मकात् च इति द्विपदं सूत्रम्। अनेन सूत्रेण अकर्मकस्य ज्ञाधातोरात्मनेपदम्। अकर्मकस्य ज्ञाधातोरात्मनेपदं स्यात्। यथा सर्पिषो जानीते। सर्पिषोपायेन प्रवर्तते इत्यर्थः। अत्र ज्ञाधातोः 'अकर्मकाच्च' इति आत्मनेपदित्वम्। तप्रत्यये 'जानीते' इति रूपम्।

9. **उदश्चरः सकर्मकात् (१.३.५३)**

उदः चरः सकर्मकात् इति त्रिपदं सूत्रम्। अनेन सूत्रेण आत्मनेपदित्वं विधीयते। उत् पूर्वस्य चर् धातोरात्मनेपदं स्यात्।

यथा धर्ममुच्चरते। उल्लङ्घ्यगच्छतीत्यर्थः। चर् गतौ इति धातुः परस्मैपदमेव। उत्पूर्वस्य चर् धातोः 'उदश्चरः सकर्मकात्' इति आत्मनेपदे तप्रत्यये उत् चरते। स्तोः श्चुना श्चुः इति श्चुत्वे 'उच्चरते' इति रूपम्।

**संक्षिप्तीकरणम्**

| **धातुं पदं च** | **केन सुत्रेणेति** | **उदाहरणानि** | **किं विधीयते** |
|---|---|---|---|
| लूञ् छेदने -परस्मैपदं | कर्तरि कर्मव्यतिहारे | व्यतिलुनीते | आत्मनेपदम् |
| गम्लृ गतौ -परस्मैपदं | न गतिहिंसार्थेभ्यः | व्यतिगच्छन्ति,व्यतिघ्नन्ति | कर्मव्यतिहारेऽपि आत्मनेपदनिषेधः |
| विश प्रवेशने परस्मैपदं | नेर्विशः | निविशते | आत्मनेपदम् |
| डुक्रीञ् द्रव्यविनिमये उभयपदं | परिव्यवेभ्यः क्रियः | परिक्रीणीते, विक्रीणीते, अवक्रीणीते | आत्मनेपदम् |
| जि जये परस्मैपदं | विपराभ्यां जेः | विजयते, पराजयते | आत्मनेपदम् |
| ष्ठा गतिनिवृत्तौ परस्मैपदं | समवप्रविभ्यः स्थः | सन्तिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते | आत्मनेपदम् |
| ज्ञा अवरोधने परस्मैपदं | अपह्नवे ज्ञः | शपमपजानीते | आत्मनेपदम् |
| चर् गतौ परस्मैपदं | उदश्चरः सकर्मकात् | उच्चरते | आत्मनेपदम् |

**पुनरावृत्तिः (Recap)**

- कर्तरि कर्मव्यतिहारे इति सूत्रे कर्म इत्यस्य क्रियापरः इत्यर्थः।
- अन्यस्य योग्यं लवनं अन्यः करोति व्यतिलुनीते।
- न गतिहिंसार्थेभ्यः इत्यनेन कर्मव्यतिहारेऽपि आत्मनेपदनिषेधः भवति।
- नेर्विशः इत्यनेन निपूर्वकात् विश् धातोरात्मनेपदं भवति।
- परिव्यवेभ्यः क्रियः इत्यनेन परि वि अव एभ्यः परे क्रीञ् धातोः आत्मनेपदं भवति।
- विपराभ्यां जेः इति सूत्रेण वि पर इत्युपसर्गपूर्वक परस्मात् जि धातोः आत्मनेपदं भवति।

- समवप्रविभ्यः स्थः इत्यनेन सम्, अव, प्र, वि एभ्यः उपसर्गपूर्वकात् स्था धातोः परे आत्मनेपदं भवति।
- अपह्नवे ज्ञः इत्यनेन अपह्नवार्थे ज्ञा धातोः आत्मनेपदं भवति।
- अकर्मकाच्च इत्यनेन अकर्मकस्य ज्ञाधातोरात्मनेपदं भवति।
- उदश्चरः सकर्मकात् इत्यनेन उत् इत्युपसर्गपूर्वक सकर्मकात् चर् धातोः आत्मनेपदं भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. व्यतिगच्छन्ति इत्यत्र कुतः आत्मनेपदित्वं न ?
2. विजयते इत्यात्मनेपदित्वं केन सूत्रेण ?
3. धर्ममुच्चरते इत्यस्य कोऽर्थः ?
4. सर्पिषो जानीते इत्यर्थे आत्मनेपदित्वं केन सूत्रेण?
5. नेर्विशः इति सूत्रेण किं विधीयते?
6. अपह्नवः ज्ञः इति सूत्रेण कस्मिन् अर्थे ज्ञाधातोरात्मनेपदं भवति?
7. समवप्रवयः के?
8. गत्यर्थकेभ्यो हिंसार्थेभ्यश्च कर्मव्यतिहरे आत्मनेपदं न स्यात् - सूत्रं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. साधारणतथा के परस्मैपदधातवः ?
2. व्यतिघ्नन्ति इत्यत्र कर्मव्यतिहारे सत्यपि कुतो नात्मनेपदित्वम्?
3. विपराभ्यां जेः इति सूत्रस्य वृत्तिः का?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्रणि व्याख्यात**

1. न गतिहिंसार्थेभ्यः।
2. अकर्मकाच्च।
3. कर्तरि कर्मव्यतिहारे।

## निर्दिष्टाभ्यासः (Assignments)

1. पदसाधुतां सप्रमाणं साधयत - निविशते, परिक्रीणीते, विजयते, सन्तिष्ठते।
2. सोदाहरणं सूत्राणि - उदश्चरः सकर्मकात्, समवप्रविभ्यः स्थः, परिव्यवेभ्यः क्रियः।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. न गतिहिंसार्थेभ्यः इति सूत्रेण आत्मनेपदनिषेधात्।
2. विपराभ्यां जेः इति सूत्रेण।
3. धर्ममुल्लङ्घ्य गच्छतीत्यर्थः।
4. अकर्मकाच्च इति सूत्रेण।
5. आत्मनेपदम्।
6. अपह्नवार्थे।
7. सम् च अव च प्र च वि च समवप्रवयः।
8. न गतिहिंसार्थेभ्यः।

## सूचनाग्रन्थाः (References)


1. जनार्दन हेगडे, धातुरूपनन्दिनी, संस्कृतभारती, नवदेहली, २०२०।
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या - श्रीगिरीशकुमार ठक्कुरः, कृष्णदास आकादमी वारणासी, १९९८, पुटे १७७-१७८।
3. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या- गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारती प्रकाशन्, वारणासी, २०११, पुटं १८४।

# Unit - 3
## आत्मनेपदप्रक्रियायां शिष्टानि सूत्राणि

### उद्देश्यानि (Learning Outcomes)

- क्रियायोगे एव वाक्यस्य सम्पूर्णार्थसिद्धिरिति जानाति।
- धातूनां विभागान् गृह्णाति।
- धातुनामर्थभेदान् अवगच्छति।
- सूत्राणि व्याख्यातुं परिशीलनं सिद्ध्यति।

### प्राग्व्यपेक्षाः (Prerequisites)

भाषा आशयविनिमयाय उपयुज्यते। क्रियायाः योगे वाक्यस्य पूर्णतया अर्थसिद्धिः जायते। धातुभिः सह तङ्गत्ययानां योगे क्रियाः जायन्ते। सर्वाणि पदानि धातुजानि इति शाकटायनाचार्यः। तिङन्तरूपस्य पदस्य प्रकृतिः धातुः। दधाति शब्दान् इति धातुः। 'यः शब्दः क्रियां भावयति प्रतिपादयति सः धातुसंज्ञः स्यात्। धानवः अनेकार्थाः।

धातवः त्रिधा। आत्मनेपद - परस्मैपद - उभय पदभेदात्। प्रायेण धातौ सानुबन्धनिर्देशः वर्तते। धानुस्थान् स्वरान् अनुबन्धस्थान् स्वरान् वा अवलम्ब्य पदव्यवस्था निर्णयति। प्रायेण अनुदात्तेतः आत्मनेपदिनः भवन्ति। उदात्तेतः परस्मैपदिनः, स्वरितेतः उभयपदिनः च भवेत्। इयं व्यवस्था पूर्णतः साधुरिति वक्तुं न शक्यते।

भाषा अनुदिनं परिवर्तते। नूतनाः प्रयोगाः नूतनार्थकल्पनाः च जायन्ते। तदनुसारं व्याकरणेऽपि व्यतियानमायाति। व्याकरणं भाषायै भवति। भाषा व्याकरणस्य न। भाषां शुद्धीकरोति व्याकरणम्। अतः कालानुसृतं शिष्टाचारनुसृतं व्यतियानं क्रियायां सम्भवति। धातोः प्रयोगेऽपि व्यतियानं सम्भवति।

अस्मिन् एकके केषाञ्चन परस्मैपदधातूनाम् उपसर्गयोगे भिन्नार्थे च आत्मनेपदित्वं विशदयति। एतादृशानि कतिपयानि सूत्राणां अतीते एकके अपठाम। लघुसिद्धान्तकौमुद्याः अवशिष्टानि कतिपयानि सूत्राणि सविस्तरं पठामः।

## मुख्यपदानि (Keywords)

सञ्चरते - चतुर्थ्यर्थे - एदिधिषते - झलादिः कित् - सेवनसाहसिक्ये - प्रकुरुते - कटं करोति - महीं भुनक्ति।

## Discussion

1. **समस्तृतीयायुक्तात् (१.३.५४)**

   द्विपदं सूत्रम्। अनेन सूत्रेण सम्पूर्वस्य चर् धातोरात्मनेपदं विधीयते। तृतीयान्तेन युक्तात्सम्पूर्वात् चर् धातोरात्मनेपदं स्यात्। यथा रथेन सञ्चरते। 'चर् गतौ' इति धातुः परस्मैपदमेव। किन्तु तृतियान्तेन युक्तस्य सम्पूर्वस्य चर् धातोः 'समस्तृतीयायुक्तात्' इति सूत्रेण आत्मनेपदित्वम्। यथा रथेन सञ्चरते। अत्र सम्पूर्वस्य चर् धातोः समस्तृतीयायुक्तात् इत्यात्मनेपदे तप्रत्यये विभक्तिकार्ये 'अनुस्वारस्य यथि परसवर्णे' 'सञ्चरते' इति रूपम्।

2. **दाणश्च सा चेच्चतुर्थ्यर्थे (१.३.५५)**

   दाणः च सा चेत् चतुर्थ्यर्थे इति पञ्चपदं सूत्रम्। अनेन सूत्रेण आत्मनेपदं स्यात्। सम्पूर्वात् दाणस्तृतीयान्ते युक्तादात्मनेपदं स्यात्। तृतीया चेच्चतुर्थ्यर्थे। यथा दास्या संयच्छते कामि। अत्र 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया' इति वार्तिकेन तृतीया। 'दास्यै' इति प्रयोक्तव्ये दास्या इति तृतिया। अत्र 'दाणश्च सा चेच्चतुर्थ्यर्थे तृतीया' इति सूत्रेण आत्मनेपदे संयच्छते इति।
   सम्पूर्वस्य 'दाण् दाने' इति परस्मैपदधातोः अनेन सूत्रेण आत्मनेपदे तप्रत्यये विभक्तिकार्ये
   ' मोऽनुस्वारः' इति अनुस्वारे 'संयच्छते' इति।

3. **पूर्ववत्सनः (१.३.६२)**

   द्विपदं सूत्रम्। अनेन सूत्रेण आत्मनेपदं विधीयते। सनः पूर्वे यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। यथा एदिधिषते। एधधातोः सन्नत्वे द्वित्वादिके च एदिधिष्। तस्य धातुसंज्ञायां 'पूर्ववत्सनः' इत्यात्मनेपदे तप्रत्यये विभक्तिकार्ये ' एदिधिषते' इति रूपम्। एधितुम् इच्छा अस्तित्यर्थः।

4. **हलन्ताच्च (१.२.१०)**

द्विपदं सूत्रम्। अनेन सूत्रेण कित्वं विधीयते। कित्वात् ' गुणाभावः। सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। यथा निविविक्षते। निपूर्वात् विश् धातोः 'हलन्ताच्च' इति कित्वम्। कित्वात् 'ग्क्ङिति च' इति सूत्रेण गुणनिषेधः। पुनः द्वित्वे अभ्यादिकार्ये च 'निविविक्ष्' इत्यस्य धातुसंज्ञायां 'पूर्ववत्सनः' इत्यत्मनेपदे तप्रत्यये विभक्तिकार्ये च 'निविविक्षते' इति रूपम् प्रवेष्टुमिच्छास्तीत्यर्थः।

5. **गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१.३.३२)**

द्विपदं सूत्रम्। अनेन सूत्रेण आत्मनेपदित्वं विधीयते। गन्धनं (सूचनं), अवक्षेपणं ( भर्त्सनं), सेवनं, साहसिक्यं (बलात्कारं), प्रतियत्नं (गुणग्राहकता), प्रकथनं, उपयोगः इत्येतेषु अर्थेषु कृञ् धातोरात्मनेपदं स्यात्।

यथा उत्कुरुते। उत्पूर्वस्य कृञ् करणे इति धातोः 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनो-पयोगेषु कृञः' इति सूत्रेण आत्मनेपदे तप्रत्यये उत्कुरुते इति। सूचयतीत्यर्थः।

भत्सर्यति इत्यर्थे (अवक्षेपणार्थे) उत्कुरुते। श्येनो वार्तिकानुत्कुरुते।

हरिमुपकुरुते। उपपूर्वस्य 'डुकृञ् करणे' इति धातोः 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्न-प्रकथनोपयोगेषु कृञः' इत्यात्मनेपदे तप्रत्यये उपकुरुते। सेवते इत्यर्थः।

परदारान्प्रकुरुते। प्रपूर्वस्य डुकृञः 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनो पयोगेषु कृञः' इति आत्मनेपदे लटि तप्रत्यये प्रकुरुते इति। परदारेषु सहसा प्रवर्तते इत्यर्थः।

एधोदकस्योपकुरुते। एधः उदकस्य च गुणमाधत्ते इत्यर्थः उपपूर्वकस्य डुकृञ् धातोः 'गन्धनाऽव-क्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनो पयोगेषु कृञः' इत्यत्मनेपदे सुडागमे लटः तप्रत्यये विभक्तिकार्ये च उपकुरुते।

कथाः प्रकुरुते। प्रकथयतीत्यर्थः।

शतं प्रकुरुते। धर्मार्थं विनियुङ्क्ते।

गन्धनादिष्वर्थेष्वेव आत्मनेपदत्वम्। अन्येष्वर्थेषु परस्मैपदमेव। यथा कटं करोति।

**6. भुजोऽनवने (१.३.६६)**

भुजः अनवने इति द्विपदं सूत्रम्। अवनं रक्षणम्। अनेन सूत्रेण आत्मनेपदत्वं विधीयते। भुज् धातोः अनवनेऽर्थे (भक्षणार्थे) आत्मनेपदं स्यात्। यथा ओदनं भुङ्क्ते। पालनार्थे भुजधातुः परस्मैपदी। 'भुजोऽनवने' इत्यनेन भक्षणार्थे आत्मनेपदे लटः तप्रत्यये विभक्तिकार्ये च 'भुङ्क्ते' इति। अनवने किम्? पालनार्थे परस्मैपदमेव। यथा महीं भुनक्ति। महीं पालयतीत्यर्थः।

**संक्षिप्तीकरणम्**

| **धातुं पदं च** | **सूत्रम्** | **उदाहरणनि** | **किं पदम्** |
|---|---|---|---|
| चर् गतौ | समस्तृतीयायुक्तात् | रथेन सञ्चरते | आत्मनेपदम् |
| दाण् | दाणश्च सा चेच्चतुर्थ्यर्थे | दास्या कामी संयच्छते | आत्मनेपदम् |
| एध वृद्धौ- आत्म- सनि एदिधिष् | पूर्ववत्सनः | एदिधिषते | आत्मनेपदम् |
| डुकृञ् करणे- उभयपदी | गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः | उत्कुरुते,उपकुरुते, उपस्कुरुते, प्रकुरुते | आत्मनेपदम् |
| भुज पालने -पर | भुजोऽनवने | ओदनं भुङ्क्ते | आत्मनेपदम् |

## पुनरावृत्तिः (Recap)

- समस्तृतीयायुक्तात् इत्यनेन सम्पूर्वकस्य चर् धातोरात्मनेपदं भवति।
- दाणश्च सा चेच्चतुर्थ्यर्थे इत्यनेन सम्पूर्वात् दाणस्तृतीयान्ते युक्तादात्मनेपदं भवति।
- पूर्ववत्सनः इत्यनेन सनः पूर्वे यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं भवति।
- डुकृञ् धातोः गन्धनादिष्वर्थेषु आत्मनेपदम्।

- हलन्ताच्च इत्यनेन कित्वं विधीयते।
- गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः इति सूत्रेण गन्धनादिष्वर्थेषु आत्मनेपदं भवति।
- भुजोऽनवने इत्यनेन भुज् धातोः अनवनेऽर्थे (भक्षणार्थे) आत्मनेपदं भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. 'प्रतियत्नम्' इत्यस्य कोऽर्थः?
2. अवक्षेपणार्थे उत्पूर्वस्य कृञः किं पदं लभते ?
3. पालनार्थे भुजधातोः किं पदं लभते?
4. समस्तृतीयायुक्तात् इति सूत्रेण किं विधीयते?
5. सम्पूर्वात् दाणस्तृतीयान्ते युक्तादात्मनेपदं स्यात् - सूत्रं किं भवति?
6. 'उत्कुरुते' इत्यस्य कः अर्थः?
7. पूर्ववत्सनः इति सूत्रस्य वृत्तिः का?
8. हलन्ताच्च इति सूत्रेण किं विधीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. किं नाम धातुः ?
2. दास्यै संयच्छते कामी इत्यस्य साधुत्वं परिशोधयत।
3. उपकरोति - उपकुरुते इति पदयोः अर्थभेदं लिखत।

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**सूत्राणि व्याख्यात**

1. भुजोऽनवने।
2. हलन्ताच्च।
3. पूर्ववत्सनः।

## निर्दिष्टाभ्यासः (Assignments)

1. पदसाधुत्वं निर्णयत - रथेन सञ्चरते, परदारान् प्रकुरुते, दनं भुङ्क्ते।
2. सोदाहरणं सूत्राणि व्याख्यात - समस्तृतीयायुक्तात्, दाणश्च सा चेच्चतुर्थ्यर्थे, भुजोऽनवने।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. गुणग्राहकता।
2. उत्कुरुते।
3. महीं भुनक्ति।
4. सम्पूर्वकस्य चर् धातोरात्मनेपदं भवति।
5. दाणश्च सा चेच्चतुर्थ्यर्थे।
6. सूचयति।
7. सनः पूर्वे यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्।
8. कित्वम्।

## सूचनाग्रन्थाः (References)


1. जनार्दन हेगडे, धातुरूपनन्दिनी, संस्कृतभारती, नवदेहली, २०२० ।
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या - श्रीगिरीश कुमार ठक्कुरः, कृष्णदास आकादमी वाराणसी, १९९८, पुटे १७८-१७९ ।
3. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या- गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारती प्रकाशन्, वारणसी, २०११, पुटं १८५ ।

# Unit - 4
## परस्मैपदप्रक्रियायां सर्वाणि सूत्राणि

### उद्देश्यानि (Learning Outcomes)

- भाषाप्रयोगे क्रियापदानां प्राधान्यम्।
- पदनिष्पत्तौ धातूनां सविशेषताः।
- धातुविभागान् गृह्णाति।
- आत्मनेपदधातूनां परस्मैपदत्वप्राप्तिं जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

'सुप्तिङन्तं पदम्' इति सूत्रेण पदसंज्ञा विधीयते। सुबन्तं तिङन्तं च पदसंज्ञं स्यादित्यर्थः। एकविंशतिः सुप्प्रत्ययाः अष्टादश तिङ्प्रत्ययाः च सन्ति। तेषु अष्टादशतिङ्प्रत्ययेषु प्रथमाः नव प्रत्ययाः परस्मैपदिनः तङ् आत्मनेपद प्रत्ययाः च। पाणिनिना पठिताः धातवः प्रायः द्विसहस्रम् इति।

धातवः परस्मैपद - आत्मनेपद - उभयपदमिति त्रिधा विभक्ताः। धातु- धात्वर्थं निर्णयावसरे सानुबन्धत्वेन धातवः विहिताः। यथा 'भू सत्तायाम्', एध वृद्धौ, णुद- प्रेरणे इत्यादयः। प्रयोजनविशेषं मनसि निधाय पाणिनिना एषा अनुबन्धव्यवस्था परिकल्पिता। धातुस्थान् स्वरान् अनुबन्धस्थान् च स्वरान् अवलम्ब्यैव परस्मैपद - आत्मनेपद निर्णयः कृतः इति वक्तुं शक्यते।

प्रायः उदात्तेतः परस्मैपदिनः अनुदात्तेतः आत्मनेपदिनः स्वरितेतः उभयपदिनः इति वदन्ति केचन विद्वांसः। तथापि उदात्तानुदात्तस्वरितानां तथा अनुनासिकाननुनासिकस्यापि उच्चारणं कथं ज्ञायते इत्याशङ्कायां 'प्रतिज्ञानुनासिक्याः पाणिनियाः' इति वचनमस्ति। पाणिनीयशिष्याः वैयाकरणाः प्रकृतिप्रत्ययविवेचन-शीलाः भवन्ति।

पुस्तकादिषु यत् उक्तं मुद्रितं वा तद् दृष्ट्वा पदव्यवस्थां निर्णेतुं शक्यते। भाषायाः प्रयोगानुसारम् आचार्याणां वचनानुसारं, भाषायाः कालानुसृतप्रयोगं ज्ञात्वा च पदव्यवस्था निर्णीता। अपि च उपसर्गाणां सन्निध्ये अर्थव्यतियाने च कतिपयानां परस्मैपदधातूनाम् आत्मनेपदित्वं तथा आत्मनेपदधातूनां परस्मैपदत्वं च सिद्ध्यति। अस्मिन्नेकके कतिपयानाम् आत्मनेपदधातूनां परस्मैपदलब्धिमधिकृत्य पठामः।

## मुख्यपदानि (Keywords)

अनुपराभ्यां - क्षिप प्रेरणे - प्राद्वहः - परिमृषति - रमुक्रीडायां - यज्ञदत्तमुपरमति।

## Discussion

1. **अनुपराभ्यां कृञः (१.३.७९)**

   द्विपदं सूत्रम्। अनेन सूत्रेण परस्मैपदं विधीयते। कर्तृगे च फले गन्धनादौ च परस्मैपदं स्यात्। यथा अनुकरोति।

   अनुकरोति इत्यत्र 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः' इति सूत्रेण आत्मनेपदे प्राप्ते 'अनुपराभ्यां कृञः' इति सूत्रेण परस्मैपदे अनुकरोति।

   एवं पराकरोति। परापूर्वस्य डुकृञ् करणे इति धातोः 'अनुपराभ्यां कृञः' इति परस्मैपदे तिप्रत्यये 'पराकरोति' इति रूपम्।

2. **अभिप्रत्यभिभ्यः क्षिपः (१.३.८०)**

   द्विपदं सूत्रम्। अनेन सूत्रेण परस्मैपदं विधीयते। अभिप्रत्यभिभ्यः परस्मात् क्षिपः परस्मैपदं स्यात्। यथा स्वरितेतोः क्षिप प्रेरणे इति धातोः 'अभिप्रत्यभिभ्यः क्षिपः' इति परस्मैपदे तिप्रत्यये 'अभिक्षिपति'।

   एवं प्रतिक्षिपति, अतिक्षिपति।

3. **प्राद्वहः (१.३.८१)**

   द्विपदं सूत्रमिदम्। अनेन सूत्रेण परस्मैपदं विधीयते। प्र इति उपसर्गात् वह् धातोः परस्मैपदसंज्ञः स्यात्। यथा प्रवहति। उभयपदिनः 'वह् प्रापणे' इति धातुः। प्राद्परस्य वह्धातोः 'प्राद्वहः' इति सूत्रेण परस्मैपदे तिप्रत्यये 'प्रवहति' इति रूपम्।

**4. परेर्मुषः (१.३.८२)**

द्विपदं सूत्रमिदम्। अनेन सूत्रेण परस्मैपदं विधीयते। परिपूर्वान्मृषतेः परस्मैपदं स्यात्। यथा परिमृषति। स्वरितेतः 'मृष तितिक्षायाम्' इति धातोः 'स्वरितञितः कर्त्राभिप्राये क्रियाफले' इत्यनेन आत्मनेपदे प्राप्ते 'परेर्मृषः' इति सूत्रेण परस्मैपदे तिप्रत्यये 'परिमृषति' इति रूपम्।

**5. व्याङ्परिभ्यो रमः (१.३.८३)**

व्याङ्परिभ्यः रमः इति द्विपदं सूत्रमिदम्। अनेन सूत्रेण परस्मैपदं विधीयते। वि च आङ् च परि च व्याङ्पर्यः, तेभ्यः व्याङ्परिभ्यः।

वि, आङ्, परि, एभ्यः परस्य 'रमु क्रीडायाम्' इति धातोः परस्मैपदं स्यात्। यथा विरमति। विपूर्वक रम् - धातोः 'व्याङ्परिभ्यो रमः' इति परस्मैपदे तिप्रत्यये 'विरमति' इति रूपम्। एवम् 'आरमति', 'परिरमति'।

**6. उपाच्च (१.३.५८)**

उपात् च इति द्विपदं सूत्रमित्रम्। अनेन सूत्रेण परस्मैपदं विधीयते। उपाद्रमतेः परस्मैपदं स्यात्। यथा उपरमति। उपरमयति इत्यर्थः। अन्तर्भावितः णर्थोऽयम्। प्रेरकार्थः। उपपूर्वात् 'रमु क्रीडायाम्' इत्यात्मनेपदधातोः 'उपाच्च' इति 'उपरमति' इति रूपम्।

**संक्षिप्तीकरणम्**

| **धातुः अर्थः पदं च** | **सूत्रम्** | **उदाहरणम्** | **किं पदमायाति** |
|---|---|---|---|
| डुकृञ् करणे-उभयपदी | अनुपराभ्यां कृञः | अनुकरोति, परकरोति | परस्मैपदम् |
| क्षिप प्रेरणे-उभयपदी | अभिप्रत्यतिभ्यः क्षिपः | अभिक्षिपति, प्रतिक्षिपति अतिक्षिपति | परस्मैपदम् |
| वह प्रापणे - उभयपदी | प्राद्वहः | प्रवहति | परस्मैपदम् |
| मृष तितिक्षायाम् - उभयपदी | परेर्मृषः | परिहरति, परिमृषति | परस्मैपदम् |
| रमु, क्रीडायाम्- आत्म | व्याङ्परिभ्यो रमः | विरमति,आरमति, परिरमति | परस्मैपदम् |

| | | | |
|---|---|---|---|
| | उपाच्च | यज्ञदत्तमुपरमयति | परस्मैपदम् |

## पुनरावृत्तिः (Recap)

- अनुपराभ्यां कृञः इत्यनेन अनुपूर्वक डुकृञ् करणे धातोः परस्मैपदं भवति।
- अभिप्रत्यभिभ्यः क्षिपः इति सूत्रेण अभिप्रत्यभिभ्यः परस्मात् क्षिपः परस्मैपदं भवति।
- प्राद्वहः इत्यनेन प्र इति उपसर्गात् वह्धातोः परस्मैपदं भवति।
- परेर्मृषः इत्यनेन परुपूर्वान् मृषतेः परस्मैपदं भवति।
- उपाच्च इत्यनेन उपाद्रमतेः परस्मैपदं भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अनुकरोति इत्यत्र परस्मैपदं केन सूत्रेण लभते?
2. अभिप्रत्यतिभ्यः सुत्रेण किं विधीयते ?
3. प्राद् परस्य वह् धातोः परस्मैपदम्। कस्य सूत्रस्य वृत्तिरस्ति ?
4. प्रवहति इत्यत्र परस्मैपदं केन सूत्रेण?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. उपरमति -पदव्यवस्थां सूचयत।
2. रमते- विरमति अनयोः कः भेदः?

## एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

**सूत्राणि व्याख्यात**

1. अनुपराभ्यां कृञः।
2. व्याङ्परिभ्यो रमः।
3. अभिप्रत्यभिभ्यः क्षिपः।

## निर्दिष्टाभ्यासः (Assignments)

पदव्यवस्थां स्थापयत - प्रवहति, परिमृषति, अभिक्षिपति

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. अनुपराभ्यां कृञः।
2. परस्मैपदम्।
3. प्राद्वहः।
4. प्राद्वहः।

## सूचनाग्रन्थाः (References)


1. जनार्दन हेगडे, धातुरूपनन्दिनी, संस्कृतभारती, नवदेहली, २०२०।
2. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या - श्रीगिरीश कुमार ठक्कुरः, कृष्णदास आकादमी वाराणसी, १९९८, पुटं १८०।
3. वरदराजाचार्यः, लघुसिद्धान्तकौमुदी, व्याख्या- गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारती प्रकाशन्, वारणसी, २०११, पुटं १८६।

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE.................**

**Name........................**

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATIONS**
**DISCIPLINE CORE- B21SN05DC - व्याकरणम् 2**
**( CBCS - UG )**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

**SECTION - A**
**(प्रथमो भागः)**

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**

**(Answer any ten Questions in a word or Sentence)**

1. महाभाष्यं कस्य रचना ?
2. अष्टौ स्त्रीप्रत्ययाः के ?
3. सम्बुद्धौ च इत्यनेन सूत्रेण किं विधीयते?
4. अतोऽम् इति कस्य अपवादः ?
5. कालवाचिलकाराः के ?
6. क्रियायाः अनिष्पत्तौ कः लकारः ?
7. औपदेशिकः धातवः के ?
8. केन सूत्रेण अभ्यासस्यादिः हल् शिष्यते ?
9. भूधातोः थप्रत्ययः केन सूत्रेण विधीयते ?
10. अभवम् -धातुपदलकारपुरुषवचनानि लिखत।

11. परस्मैपदिनः लङः परिनिष्ठितप्रत्ययाः के ?

12. भूधातोः लङि प्रथमपुरुषद्विवचनरूपं किम् ?

13. धातवः कति विधाः?

14. पचति - पचते इत्यनयोः अर्थभेदः कः ?

15. पालनार्थे भुजधातोः किं पदं लभते?

## SECTION - B
**(द्वितीयो भागः)**

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**
**(Answer any five Questions in one or two sentences)**

16. सुप्प्रत्ययाः के ?

17. हे राम + सु इत्यत्र अङ्गं किम् ?

18. नपुंसकलिङ्गे कयोः विभक्तयोः रूपाणि पुंलिङ्गवत् भवन्ति ?

19. अकर्मकधातोः लक्षणं किम् ?

20. लिट् च इति सूत्रस्यावश्यकता का ?

21. भविष्यामर् कथं भविष्यामः इत्यायाति ?

22. इतश्च इति सूत्रस्य वृत्तिः का ?

23. लङ् लकारस्य कोऽर्थः ?

24. धर्ममुच्चरते इत्यस्य कोऽर्थः?

25. व्यतिघ्नन्ति इत्यत्र कर्मव्यतिहारे सत्यपि कुतो नात्मनेपदित्वम्?

## SECTION - C
**(तृतीयो भागः)**

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**
**(Answer any six Questions)**
**सोदाहरणं सूत्राणि व्याख्यात -**

26. ह्रस्वनद्यापो नुट्।

27. न विभक्तौ तुस्माः।

28. आङि चापः।

29. याडापः।

30. तिङ्शित्सार्वधातुकम्।

31. सार्वधातुकार्धधातुकयोः।

32. अतो हेः।

33. स्यतासि लृलुटोः।

34. परस्मैपदानां णलतुसुस्थलथुसणल्वमाः

35. आर्धधातुकं शेषः।

36. भुजोऽनवने।

37. हलन्ताच्च।

## SECTION - D
**(चतुर्थो भागः)**

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**
**(Write an essay on any two of the following)**

38. प्रदत्तानि रुपाणि ससूत्रं साधयत - रामान्, रामेण, रामेभ्यः।

39. अकारान्तस्य नपुंसकलिङ्गस्य ज्ञानशब्दस्य प्रथमा एकवचनद्विवचनबहुवचनानि रूपाणि सप्रमाणं निष्पादयत।

40. भवति, भवन्ति,भवामि - एषां रूपाणां निष्पत्तिं लिखत।

41. पदव्यवस्थां स्थापयत - परिक्रीणीते, परिमृषति, सन्तिष्ठते, अभिक्षिपति।

Model Question Paper (SET – B)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATIONS**
**DISCIPLINE CORE- B21SN05DC - व्याकरणम् 2**
**( CBCS - UG )**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**

**(Answer any ten Questions in a word or Sentence)**

1. लघुसिद्धान्तकौमुद्याः रचयिता कः?
2. लता, बाला, अध्यपिका, इत्यादीनां लिङ्गः कः?
3. क्तिन् इत्यत्र कः लिङ्गः आयाति ?
4. नपुंसके भावे क्तः इति सूत्रेण कः प्रत्ययः नपुंकसलिङ्गे भवति ?
5. वेदे एवायं लकारः प्रयुज्यते? (कः लकारः वेदे एव प्रयुज्यते)
6. आशिषिलिङ्लोटौ इत्यस्य अर्थः कः?
7. लः परस्मैपदं इति सूत्रेण किं विधीयते?
8. परस्मैपदे लिटः स्थाने आगताः परिनिष्ठितप्रत्ययाः के?
9. लङः मध्यमपुरुषद्विवचनरूपं किम्?
10. अ भू ति इत्यत्र इकारलोपः केन सूत्रेण भवति?
11. लङि अडागमः केन सूत्रेण ?

12. धातोः पदं किमिति कथं निर्णयति ?

13. व्यतिगच्छन्ति इत्यत्र कुतः आत्मनेपदित्वं न भवति ?

14. प्रतियत्नम् इत्यस्य कोऽर्थः ?

15. अनुकरोति इत्यत्र परस्मैपदं केन सूत्रेण विधीयते ?

## SECTION - B
**(द्वितीयो भागः)**

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**
**(Answer any five Questions in one or two sentences)**

16. वार्तिकलक्षणं लिखत।

17. वृत्तिः नाम का ?

18. यस्येति च इति सूत्रस्य अर्थं लिखत।

19. लकाराः कति? तेषां नामानि लिखत।

20. लृटि आर्धधातुकसंज्ञाविधानस्य सूत्रस्यावश्यकता?

21. अनद्यतने लङ् इति सूत्रस्य वृत्तिः का ?

22. अभवताम् इत्यत्र तामादेशः केन सूत्रेण भवति ?

23. आत्मनेपदं विधायके सूत्रे के ?

24. साधारणतया के परस्मैपदधातवः?

25. दास्यै संयच्छतो कामी इत्यस्य साधुत्वं परिशोधयत।

## SECTION - C
**(तृतीयो भागः)**

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**
**(Answer any six Questions)**

**सोदाहरणं सूत्राणि व्याख्यात -**

26. अर्थवदधातुरप्रत्ययः।



SGOU watermark

27. अट्कुप्वाङ्नुम्व्यवायेऽपि ।

28. जश्शसोः शिः ।

29. शि सर्वनामस्थानम् ।

30. तङानावात्मनेपदम् ।

31. झोऽन्तः ।

32. नित्यं ङितः ।

33. आडुत्तमस्य पिच्च ।

34. सेर्ह्यपिच्च ।

35. एरुः ।

36. व्याङ्परिभ्यो रमः ।

37. लङि मध्यमपुरुषद्विवचनरूपं सप्रमाणं निष्पादयत ।

## SECTION - D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत । (2x10=20)**
**(Write an essay on any two of the following)**

38. प्रदत्तानि रुपाणि ससूत्रं साधयत - रामयोः, रमाणाम्,रामेषु ।

39. आकारान्तस्य स्त्रीलिङ्गस्य रमाशब्दस्य तृतीया एकवचनद्विवचनबहुवचनानि रूपाणि सप्रमाणं निष्पादयत ।

40. भवामि, भवन्ति, भवथः - एषां रूपाणां निष्पत्तिं लिखत ।

41. पदसाधुत्वं निर्णयत - रथेन सञ्चरते, परदारान् प्रकुरुते, दानं भुङ्क्ते ।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

व्याकरणम् 2

COURSE CODE: B21SN05DC

SGOU

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-982096-8-9
9 788198 209689